सामाजिकविज्ञानम्

सामाजिक-राजनैतिक-जीवनम्-III

अष्टमकक्ष्यायै पाठ्यपुस्तकम्

सामाजिक-राजनैतिक-जीवनम् - III

अष्टमकक्षायै पाठ्यपुस्तकम्

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

दिसम्बरमासः 2014 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां यत् विद्यालयीयं जीवनम् अस्ति तद् विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम्। अयं सिद्धान्तः पुस्तकीयस्य ज्ञानस्य तस्य न्यायस्य विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधिः विद्यालयस्य गृहस्य च मध्ये अन्तरालं कल्पितवती। नूतनायां राष्ट्रिय-पाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च अस्मिन् आधारभूते विचारे क्रियान्वयनस्य प्रयासः अस्ति। एतस्मिन् प्रयासे प्रत्येकं विषयम् एकया दृढया भित्त्या आवरणस्य अथ च सूचनायाः संस्मारणस्य च प्रवृतेः विरोधः अपि सम्मिलितः अस्ति। आशासे यत् एते उपायाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितानां बालकेन्द्रितानां व्यवस्थानां दिशि अत्यधिकं दूरं यावत् नेष्यन्ति।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकेभ्यः कल्पनाशीलानां गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणस्य काले स्वस्य अनुभवैः चिन्तनस्य च अवसरान् कल्पयन्ति। अस्माकम् एतत् मन्तव्यं स्यात् यत् यदि समय स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः प्रदत्ताभिः सूचना-सामग्रीभिः सह युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति। शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकं परीक्षायाः एकमात्रम् आधारस्य निर्माणस्य प्रवृत्तिः अस्ति। सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् बालकाः शिक्षणस्य प्रक्रियायां सहभागिनः सन्ति इति अङ्गीकुर्युः अपि च तान् सहभागिनः कुर्वन्तु, ते बालकाः ज्ञानस्य निर्धारित-मात्रायाः ग्राहकाः सन्ति इति मतं त्यजन्तु।

एते उद्देश्याः विद्यालयस्य दैनिके जीवने कार्यशैल्यां च अत्यधिकस्य परिवर्तनस्य याचनां कुर्वन्ति। दैनन्दिन्यां समय-सारण्यां स्थिति-स्थापकत्वम् (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिकस्य कालन्धरस्य क्रियान्वयने जागरूकता, यतः शिक्षणस्य कृते नियतदिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात्। शिक्षणस्य मूल्याङ्कनस्य च विधयः अपि एनं विषयं निर्धारितं करिष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनानि मानसिकस्य उद्वेगस्य खिन्नतायाः च स्थाने, हर्षस्य वातावरणस्य निर्माणे कियता प्रभाविरूपेण चरितार्थं भविष्यति। भारस्य समस्यायाः समाधानार्थं पाठ्यक्रमस्य निर्मातारः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालानां मनोविज्ञानं मनसि निधाय एवञ्च अध्यापनस्य कृते उपलब्धः समयः कियान् अस्ति इति एतस्य विषयस्य अवधानं पूर्वापेक्षया अधिकेन सचेतरूपेण करणस्य प्रयासः कृतः। एषः प्रयासः इतोऽपि गभीरतया स्यात् एतदर्थम् इदं पाठ्यपुस्तकं चिन्तनस्य विषयस्य कृते, आश्चर्यस्य कृते, लघुषु समूहेषु वार्तालापस्य चर्चायाः कृते च, हस्ताभ्यां क्रियमाणानां गतिविधीनां कृते प्राथमिकतां प्रयच्छति ।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायाः कृते निर्मितस्य पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटीकरोति। परिषद् सामाजिक-विज्ञानम् इति पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षस्य प्रोफेसर-हरि-वासुदेवन-महोदयस्य तथा च एतस्य पाठ्यपुस्तकस्य समितेः मुख्यः परामर्शदातुः नीलाद्रिभट्टाचार्यस्य विशेषरूपेण कृतज्ञा अस्ति। एतस्य पाठ्यपुस्तकस्य विकासे बहुभिः शिक्षकैः योगदानं कृतम्, एतद् योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि कृतज्ञा स्मः। वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः ये अस्माकं स्वस्य सामग्र्या सहयोगिभ्यः साहाय्यस्य स्वीकरणे च उदारतापूर्वकं सहयोगं कृतवन्तः।

वयं माध्यमिक-शिक्षा-विभागस्य तथा च उच्चशिक्षाविभागस्य मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य प्रोफेसर-मृणाल-मोरी-महोदयस्य अपि च प्रोफेसर-जी.पी.देशपाण्डे-महोदयस्य अध्यक्षतायां निर्मितायां निरीक्षण-समितेः सदस्यानां कृते ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः तेषां कृते वयं धन्यवादस्य ज्ञापनं कुर्मः। व्यवस्थागतानां परिष्काराणां कृते प्रकाशनेषु च नैरन्तर्येण तस्मिन् परिष्कारे नावीन्यम् आनेतुं समर्पिता परिषद् टिप्पणीनां परामर्शानां च स्वागतं करिष्यति, यतः भाविसंशोधनेषु साहाय्यं लभ्येत।

निदेशकः,
राष्ट्रिय-शैक्षिकानुसन्धानं
प्रशिक्षण-परिषद् च,

नवदेहली,
20 नवम्बरः 2005

पाठ्यपुस्तकनिर्मातृसमितिः

अध्यक्षः, सामाजिक-विज्ञान-पाठ्यपुस्तक-परामर्शदातृ-समितिः

हरिवासुदेवनः, प्रोफेसरः, इतिहास-विभागः,कलकत्ताविश्वविद्यालयः कोलकाता

मुख्यपरामर्शदाता

शारदाबालगोपालनः, सेंटार फार दि स्टडी आफ डिवेलपिंग सोसायटीज (सीएसडीएस),राजपुररोड, दिल्ली

परामर्शदाता

दिप्ताभोगः, निरन्तर- जेंडर एवं शिक्षा संदर्भ समूह इति, नवदेहली।

सदस्याः

अरविन्दसरदाना, एकलव्य-शैक्षिक-शोध-नवाचार-संस्थानम्, देवासः, मध्यप्रदेशः।

अषितारवीन्द्रनः,प्रवक्ता, सा.वि.मा.शि.वि.,राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषद्,नवदेहली।

कृष्णामेननः,रीडर, लेडी श्रीरामकालेज,दिल्ली-विश्वविद्यालयः, देहली।

कृष्णानन्दपाण्डेयः,अध्यापकः,राजकीय-माध्यमिक-विद्यालयः, खोद्री, जनपदं बिलासपुरम्, छत्तीसगढम्।

भावना मुलीना, अध्यापिका, शिशुकुञ्ज-इण्टरनेशनलस्कूल,नवदेहली।

राजीवभार्गवः, वरिष्ठशोधाध्येता, सेण्टर-फार-दि-स्टडी-आफ-डिवेलपिंग-सोसायटीज (सीएसडीएस),देहली।

राममूर्तिः, अध्यापकः,राजकीय-उच्चतर-माध्यमिक-विद्यालयः, दीपसिंहवाला, जनपदं फरीदकोटः,पंजाबः,

लतिकागुप्ता, परामर्शदात्री,प्रा.शि.वि.,राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षणपरिषद्, नवदेहली।

वी.गीता, सम्पादकः, तारा-पब्लिशिङ्ग, चैन्नै, तमिलनाडुः।

वृन्दाग्रोवरः, अधिवक्त्री, नवदेहली।

सुकन्याबोसः, एकलव्य-रिसर्च-फेलो इति , नवदेहली।

हिन्द्यनुवादः

योगेन्द्रदत्तः, स्वतन्त्र-अनुवादकः सम्पादकश्च, देहली।

सदस्यसमन्वयकः

मल्ला वी.एस.वी.प्रसादः, प्रवक्ता, सामाजिक-विज्ञान-मानविकी-शिक्षा-विभागः, राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषद्, नवदेहली।

कृतज्ञता-ज्ञापनम्

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् इति संस्था तेषां सर्वेषां जनानां कृते कृतज्ञतां विज्ञापयति ये एतस्य पुस्तकस्य सज्जीकरणे प्रत्यक्षाप्रत्यक्षरूपेण साहाय्यं कृतवन्तः।

आदित्यनिगमः, एलेक्स-जार्जः, अवधेन्द्रशरणः,अजरा-रज्जाकः, फराह-नकवी, काईफ्रीजः, कौशिकघोषः,कुमकुमरायः,एम. वी.श्रीनिवासनः, राधिकासिंघा, राणाबहलः योगेन्द्रयादवः इत्येते सर्वे अस्मिन् पुस्तके समुपस्थापितविषयेषु महत्त्वपूर्णपरामर्शान् दत्तवन्तः। तान् प्रति कृतज्ञाः स्मः।

पूर्वाभारद्वाजः एतस्य पुस्तकस्य सम्पादनम् अकरोत्। एतत् कार्यं तया यावता धैर्येण कृतं तद्विषये वयं शब्दैः न वर्णयितुं शक्नुमः। तया अत्र अवधानं कृतं यत् पुस्तकस्य भाषा अष्टमकक्षायाः छात्राणाम् अनुरूपं स्यात्। एतस्मिन् कार्ये सा जयाशर्मणः शालिनीजोशिनः निधिगौडस्य हुमाखानस्य मिलानीभेंगरायाः च साहाय्यं प्राप्नोत्। एतेषां सर्वेषां सहयोगिनां धन्यवादं कुर्मः।

चित्रकथापट्टस्य विषये परामर्शाय वयम् आरिजीतसेनं प्रति कृतज्ञतां विज्ञापयामः। गृह्यहिंसाविधेयकविषयाय चित्रकथापट्टरचनायां लायर्सकलेक्टिव इत्यस्य सदस्यान् प्रति धन्यवादं विज्ञापयामः।

परिषद् निम्नलिखितसंस्थानैः प्रदत्तसहयोगं स्वीकरोति तथा च तेषां श्लाघाम् अपि करोति। लोकसभासचिवालयः, राज्यसभासचिवालयः, प्रेस-इन्फार्मेशन-ब्यूरो, सूचना-प्रसारण-मन्त्रालयस्य फोटो डिवीजन, निर्वाचनायोगः, नैशनल इन्फार्मेटिक्स सेंटर, दि हिन्दुस्तान टाइम्स, आउटलुक, डाउन टू अर्थ इत्येतेषां तथा च एतेषां सर्वेषां संस्थानानां कर्मचारिणां कृते कृतज्ञतां विज्ञापयति। वयम् उपभोक्तृ-प्रकरण-मन्त्रालयस्य अपि धन्यवादं कुर्मः यत् तेन प्रतीकचिह्नस्य नाम- (अनुचित-प्रयोग-निषेधः) अधिनियम 1950 इत्यस्य अन्तर्गतं संसदः न्यायपालिकायाः च चित्राणां प्रयोगाय अनुमतिः प्रदत्ता।

चित्राणां भित्तिचित्राणां च कृते वयं निम्नलिखितानां कृते कृतज्ञतां विज्ञापयामः – भोपालात् सम्बद्धचित्राणां कृते शीबाछाछी इत्यस्याः तथा च सम्भावना-ट्रस्ट इत्यस्य तथा च माडे-डोर, शालिनीशर्मा, रेयान बोदन्याई, जाय-अथिली, ग्रीनपीसः, विशेषतया, जयश्रीनन्दी, भोजनाधिकाराभियानस्य सदस्याः इत्येतेषां सर्वेषाम् धन्यवादं कुर्मः। श्रवणीरायः एतस्य पुस्तकस्य रूपसज्जायाः विषये गहनसमर्पणेन कौशलेन च कार्यं कृतम् अस्ति। एतस्मिन् उपक्रमे तया महान् धैर्यः उत्साहः च प्रदर्शितः सः प्रशंसनीयः अस्ति।

सूजनस्कूल, देहली तथा च सर्वोदय-कन्या-विद्यालयः देहली इत्यस्य नैकविद्यार्थिनः धार्णिकसहिष्णुताविषयके प्रश्ने पुस्तकाय नैकचित्राणि रचितवन्तः। वयं तेषां बालकानां तेषां च अध्यापिकयोः नताशादत्तायाः ज्योतिसेठिनः च कृते धन्यवादं विज्ञापयामः। वयं फराहफारूक्याः अपि धन्यवादं कुर्मः सा तस्याः पुत्र्याः ऐनीद्वारा लिखितनिबन्धम् अस्मान् पाठितवती तथा च अस्मिन् पुस्तके प्रयोगाय अनुमतिम् अपि प्रदत्तवती। सरदारपटेलविद्यालयस्य अष्टमकक्षायाः छात्रा अरुन्धतिराजेशः पञ्चमघट्टस्य विषये प्रतिपुष्टिम् (फीडबैक) अददात् तदर्थं सा धन्यवादार्हा अस्ति।

विकासशीलसमाजाध्ययनपीठ-एकलव्यः निरन्तर इत्यनेन च सर्वदावत् पुस्तकाय मुक्तहृदयेन सहयोगः समर्थनं च कृतम्। निरन्तर इति संस्थाने कार्यरतौ प्रसन्ना अनिलः च अपि सहायतार्थं धन्यवादार्हौ स्तः।

वयं वरिष्ठाचार्यायाः सवितासिन्हायाः, विभागाध्यक्षायाः, सामाजिक-विज्ञान-मानविकी-शिक्षा-विभागस्य प्राप्तसहायतार्थं तस्याः धन्यवादं कुर्मः। वयं डी.ई.एस.एच.एच इत्यस्य कर्मचारिभिः कृतप्रयासाय समर्पणाय च तेषां कृते कृतज्ञतां विज्ञापयामः। वयं राकेशकुमारमीणा, नरेशकोहली, एम.सिराजानवर, रमेशकुमार इत्येतेषां कृते अपि कृतज्ञतां विज्ञापयामः ये एतस्य पुस्तकस्य कृतानुवादं श्रेष्ठम् अकुर्वन्। सुरेखालोणारे इत्यस्याः अपि धन्यवादं कुर्मः या 96 तमे पृष्ठे प्रदत्तकवितायाः अनुवादम् अकरोत्।

एतस्य पुस्तकस्य रचनायां प्रकाशनविभागस्य प्रयासैः लाभः जातः अस्ति। तदर्थं विभागस्य धन्यवादं कुर्मः। डीटीपी आपरेटरर्स उत्तमकुमारः, विजयकौशलः, नरगिस इस्लाम, कापी एडीटर मनोजमोहनः इत्येतेषां सर्वेषाम् अपि विशेषरूपेण धन्यवादं कुर्मः।

शिक्षकाणां कृते आरम्भिक-टिप्पणी







सामाजिक-राजनैतिक-जीवनयोः आधरितम् इदं तृतीयम् अन्तिमं च पुस्तकं वर्तते। एतेषु पुस्तकेषु राजनीतिशास्त्रस्य अर्थशास्त्रस्य च ये विषयाः चर्चिताः, तान् विषयान् विद्यार्थिनः अग्रे आगम्यमानासु कक्षासु विस्तरेण पठिष्यन्ति। गतद्वयोः वर्षयोः स्वपरिचयात्मक-टिप्पण्यां वयम् अस्मिन् तथ्ये बलाघातं कृतवन्तः, यत् इदं नूतनं विषयक्षेत्रं कस्मिन् सन्दर्भे वर्तते इति बोधनस्य वयं प्रयासं कृतवन्तः। साम्प्रतिकी टिप्पणी अधिका व्यक्तिगता वर्तते। सम्प्रति वयम् इमां चर्चां कर्तुम् इच्छामः यत् एतानि पाठ्यपुस्तकानि अस्माभिः कया प्रेरणया लिखितानि सन्ति, अपि च एतेषां पुस्तकानां छात्रेषु सम्प्रेषणे शिक्षक-शिक्षिकाणां कियती केन्द्रीय-भूमिका वर्तते।

पाठ्यचर्यायां पुनः पुनः संशोधनैः शिक्षकाः प्रायः उद्विग्नताम् अनुभवन्ति। एतादृशेषु संशोधनेषु तेषां काऽपि भूमिका अपि न भवति, पुनरपि शिक्षकाः एव तेषां क्रियान्वयनं कुर्वन्ति। एतस्य परिणामः अयं भवति यत् एतादृशानां परिवर्तनानां लाभ-हानीः इत्यादिषु विषयेषु विचिन्त्य शिक्षकाः स्वमनस्सु नैराश्यं व्यर्थतां च उत्पादयन्ति। बहुवारं एतादृशी उद्विग्नता एव शिक्षकान् नूतनविषयक्षेत्राणि गाम्भीर्येण ग्रहणात् रुणद्धि। एतस्मात् कारणात् एव शिक्षकाः तासां नूतन-शिक्षापद्धतीनां ग्रहणात् बिभ्यति, यासाम् आधारे एते विषयाः रच्यमानाः सन्ति। वयम् आशास्महे यत् एतेषां पाठ्यपुस्तकानां निर्माणार्थं वयं यैः विषयैः पीडिताः, तान् विषयान् ज्ञात्वा भवन्तः अपि अस्माकम् एतया मान्यतया सहमताः भविष्यन्ति यत् सामाजिक-राजनैतिक-जीवनस्य शिक्षाशास्त्रीयोद्देश्यान् सफलीकर्तुं भवतां कियती महत्त्वपूर्णा भूमिका वर्तते।

वर्षत्रयपूर्वं यदा वयं माध्यमिक-विद्यालयीय-स्तरे सामाजिक-विज्ञानस्य क्षेत्रे एकं नूतनं विषय-क्षेत्र-सज्जीकरणस्य सङ्कल्पं स्वीकृतवन्तः, तदा वयम् इदं विचिन्त्य उत्तेजिताः आस्म यत् वयम् एकं बृहत्तमं कार्यं स्वहस्तेषु स्वीकुर्वन्तः स्मः। इदं कार्यम् एतस्मात् कारणात् अपि उत्तेजकं प्रतिभाति स्म यत् अस्मासु केचन जनाः विद्यालयेषु नागरिकशास्त्रं पाठयन्तः स्म। पुनरपि अस्माकम् अनुभवः आसीत् यत् एषः विषयः छात्राणां कृते कियान् जटिलः भविष्यति ? अस्माभिः नागरिकशास्त्रस्य पुस्तकानां विश्लेषणं कृत्वा इदम् अपि अनुभूतम् आसीत् यत् तानि पुस्तकानि भारतीय-लोकतन्त्रस्य कियत् सीमितं ज्ञानं ददति। अस्माकम् उद्विग्नतायाः मुख्यतया कारणद्वयम् आसीत् – प्रथमः, पुरातनेषु पाठ्यपुस्तकेषु तादृशानि सम्यक्-उदाहरणानि न आसन् यैः उदाहरणैः जनानां जीवने लोकतन्त्रस्य स्थिति-विषये सम्यक् प्रकटीकरणं स्यात्। अपरः - तेषु पुस्तकेषु संस्थानानां प्रक्रियाणां च चित्रणस्य प्रयासः तेन प्रकारेण क्रियते स्म यत् ते सर्वथा तथैव कार्यं कुर्वन्ति यथा ते संविधाने चित्रिताः आसन्।

अस्मासु केचन जनाः ताभिः शोधपरियोजनाभिः सह अपि सम्बद्धाः आसन् याभिः ज्ञायते स्म यत् सर्वकारीय-प्रक्रियाणां संस्थानानां जनानां च विषये विद्यार्थिनः प्रायः भ्रमिताः एव तिष्ठन्ति। उदाहरणार्थं ते प्रायः विधायिकायाः कार्यपालिकायाः च विषये भेदं न जानन्ति स्म। शिक्षकरूपेण भवता अपि नागरिकशास्त्रस्य पुस्तकेषु एतादृश्यः न्यूनताः अनुभूताः स्युः। एका पीडा इयम् अपि आसीत् यत् माध्यमिकविद्यालयस्य पाठ्यचर्यायां वर्तमान-सामाजिक-राजनैतिक-विषयाणां कृते स्थानं न

दीयते स्म। नागरिकशास्त्रस्य पुस्तकेषु सर्वकारम् एव केन्द्रे स्थापयित्वा एतेषां विषयाणाम् चर्चायाः प्रयासः तु क्रियते स्म, परन्तु एकं नूतनं विषयक्षेत्रम् आविष्कृत्य अपि च एतं केन्द्रं विस्तारयितुं सर्वकारस्य भूमिकाम् अदृष्ट्वा तस्य अधिक-आकर्षकरूपेण पाठनम् अपि आवश्यकम् आसीत्।

वयं त्रिप्रकारकैः प्रश्नैः समस्याग्रस्ताः आस्म। प्रथमः प्रश्नः अयम् आसीत् यत् वयं विद्यार्थिनां वर्तमान-सामाजिक-राजनैतिक-प्रश्नैः च कथं परिचिताः भवेम। एतस्मिन् विषये कृतेन विचारविमर्शेन एते तथ्याः प्राप्ताः यत् अस्माकं कृते एतादृशस्य विषयवस्तुनः आवश्यकता भविष्यति यत् विद्यार्थिनां जीवनेन सम्बद्धं स्यात्। विद्यार्थिनः एतं विषयं जानीयुः यत् "लोकतन्त्रम्"सर्वकारीय-संस्थानानां कार्यनिर्वहणं यावत् एव सीमितं न भवति अपितु तत् आधिक्येन सामान्यजनानां भूमिकायाम् अपि आश्रितं भवति; अपि च विषयवस्तुनि परिवर्तनेन सह एव शिक्षाशास्त्रीयशैल्याम् अपि परिवर्तनम् आवश्यकं भविष्यति।

अपरः प्रश्नः अयम् आसीत् यत् नूतनस्य विषयक्षेत्रस्य कृते शीर्षकाणां चयनं कथं करणीयम् इति। अत्र अस्माभिः बहवः नूतनाः विषयाः आविष्कृताः। विषयचयनकाले अस्माभिः इदम् अपि मनसि धृतं यत् ते विषयाः माध्यमिकविद्यालयस्य विद्यार्थिनां कृते अपि अनुरूपाः भवेयुः अपि च तेषु विषयेषु विश्लेषणम् अपि स्यात्। दुर्भाग्यवशात् छात्राः सामाजिकविज्ञानम् अपि सामान्यज्ञान-पूर्णाया कस्याश्चित् सिद्धान्त-पेटिकायाः इव पश्यन्तः सन्ति। ते अनुभवन्ति यत् ते विज्ञानं केवलं रटित्वा एव ज्ञातुं शक्नुवन्ति। इदं चिन्तनं सामाजिकविज्ञानस्य विषये सम्यक् न वर्तते। सामाजिकविज्ञानस्य लक्ष्यं तु एकं तादृशं दूरदर्शि-यन्त्र-प्राप्तिकारणं वर्तते यत् येन माध्यमेन वयं स्वपरिवेशं परितः यः संसारः वर्तते तस्य विश्लेषणं कर्तुं शक्नुयाम। इदानीं तु सामाजिकविषयाणां विश्लेषणस्य इयं क्षमता तेषां जनानां कृते अपि आवश्यकी उपयोगिनी च इति कथ्यते अथवा मन्यते ये जनाः विश्वविद्यालयेषु विज्ञानं पाठयन्ति। समाज-विज्ञानाध्यापक-रूपेण वयं स्वविषयक्षेत्रं जानीमः अपि च अनेन विद्यार्थिनः स्वपरिवेशम् अवगन्तुं क्षमतायुक्ताः जायन्ते। एतत् तथ्यं मत्वा अस्माभिः गर्वान्वितैः भाव्यम्।

तृतीयः प्रश्नः एवम् आसीत् यत् अस्मिन् नूतने विषयक्षेत्रे शिक्षकाणां कीदृशी भूमिका भविष्यति। एषः प्रश्नः समाजशास्त्र-क्षेत्रस्य आसीत् अपि च एतस्मिन् अस्माकं विचाराः एवंविधाः आसन्; प्रथमतया अस्माकं कृते चर्चायाम् आगम्यमानाः याः अवधारणाः सन्ति तासाम् अवधारणानां परिभाषादानस्य आवश्यकता न भविष्यति। अपरः प्रश्नः आसीत् यत् चर्चायां प्रादुर्भवन्तः ये विषयाः सन्ति तेषां विषयाणाम् अवगमने वयं सहायक-चित्रकथा-पट्टानां कथानां च सामायोजनं करिष्यामः सह एव रचनात्मक-अभिव्यक्तेः अपरेषां रूपाणाम् अपि प्रयोगं करिष्यामः। तृतीयः विषयः आसीत् यत् अध्याय-समायोजन-काले अपि च अध्यायस्य अन्ते वयं तादृशान् प्रश्नान् दास्यामः यत् ते विद्यार्थिनां विश्लेषण-क्षमता-वर्धनार्थं सहायकाः भविष्यन्ति। पुस्तकेषु येषां चित्राणां प्रयोगः कृतः ते यद्यपि चित्रकथा-पट्ट-रूपेण भवेयुः, चित्राणि वा भवेयुः अपि वा चित्रनिबन्धाः भवेयुः - ते विषयवस्तुनः अभिन्न-अङ्गत्वेन सन्ति अपि च तेषां साहाय्येन विषयाणाम् अधिकाधिक-विश्लेषणं कर्तुं शक्यते। तानि साधनानि वयं केवलं सज्जार्थम् एव न गृहीतवन्तः।

कक्षायाः अन्तः एतावतः विचारान् साकारीकर्तुं केवलं पाठ्यपुस्तकेषु एव आश्रितैः न भवितुं शक्यते स्म। वयं जागरूकतया एतत् तथ्यम् स्वीकुर्मः यत् देशस्य विभिन्नेषु भागेषु निवासकर्तृणां छात्राणां विविध-जीवन-शैल्याः समावेशकर्तुः कस्यचित् राष्ट्रिय-पाठ्यपुस्तकस्य सज्जीकरणम् असम्भवम् अस्ति। विविधतायाः संक्षेपीकरणं यावत् पर्यन्तं सम्भवम् आसीत् अस्माभिः विविधक्षेत्राणि सामाजिकसमूहान् स्पर्शकर्त्र्याः व्यक्तित्व-अध्ययन-प्रक्रियायाः चयनं कृतम्। अपरदृष्ट्या यतोहि समकालीनप्रश्नानां चर्चासु अस्माकं सामाजिकपरिवेशस्य विविधानाम् असमानतानाम् उद्घाटनम् अवश्यम्भावि अस्ति, अतः कक्षायाः अन्तः सूचनानां दृष्टिकोणानां च समावेशः अपि आवश्यकः आसीत्। इमां भूमिकां शिक्षकम् अतिरिच्य सम्यक्तया कः पालयितुं शक्नोति। प्रायः भवतां भूमिका केवलम् इयम् एव नास्ति यत् पाठ्यपुस्तकस्य विषयवस्तुनः केवलं बालानां पुरतः स्थापनं करणीयम्। भवतः इयम् अपि आशां कुर्मः यत् भवान् विभिन्नानि स्थानीयानि उदाहरणानि तेषां पुरतः उपस्थापयेत् अपि च महत्त्वपूर्णेषु विषयेषु तान् बालकान् स्वयं विश्लेषणं कर्तुं सज्जीकुर्यात्। एतानि पाठ्यपुस्तकानि पुरातनेभ्यः पाठ्यपुस्तकेभ्यः अस्मिन् अर्थे पृथक् सन्ति यत् एतेषु विभिन्नप्रकाराः असमानताः स्पष्टरूपेण चिह्नीकृताः वर्तन्ते। एताः जातीयाः, धार्मिक्यः अपि च लैङ्गिक्यः असमानताः स्वयं भवतां कक्षायाम् अपि भविष्यन्ति। अतः वयं भवद्भ्यः आशास्महे यत् भवन्तः एतान् विषयान् यावत् शक्यं संवेदनशीलतया सम्बोधयिष्यन्ति।

ब्राजीलस्य महाशिक्षाशास्त्री पाउलो फ्रेरे येन रटितज्ञानं वित्तकोशे धनयोजनेन तुल्यम् उक्तम् । सःलिखितवान् यत् शिक्षकैः "स्वशैक्षणिकपरिधौ अर्थात् विद्यालये एव स्वस्वप्नान् जीवितुं प्रयासः करणीयः । वयम् आशास्महे यत् सामाजिक-राजनैतिक-जीवनस्य कक्षा-शिक्षकाणां कृते एतादृशः परिधिः भवितुं शक्नोति । एतेषु पाठ्यपुस्तकेषु उद्भाविताः विषयाः न्याय-समानता-प्रतिष्ठादीनां कृते जनैः क्रियमाणैः सङ्घर्षैः गभीरतया सम्बद्धाः वर्तन्ते । वयम् आशावन्तः स्मः यत् एतैः विषयैः शिक्षकाणां घनिष्ठसम्बन्धः स्यात् तेन विद्यार्थिनः समकालीनविषयेषु प्रश्नान् कर्तुं सज्जीभवितुं साहाय्यं लप्स्यन्ते ।

वयम् एतत् तथ्यम् अवगच्छन्तः स्म यत् आलोचनात्मकं दूरदर्शी-यन्त्रस्य विद्यार्थिनां हस्ते स्थापनस्य यः प्रयासः अस्माभिः क्रियते, सः प्रयासः अस्माकं व्यापकदृष्टेः योजनेन विना न सेत्स्यति। भारतस्य सामाजिकजीवनस्य राजनैतिकजीवनस्य च अस्मिन् विश्लेषणकार्ये अपि च तस्य यथार्थस्य कारणात् जायमानं नैराश्यं दूरीकर्तुम् इदम् अपि आवश्यकम् आसीत् । वयम् इच्छामः यत् विद्यार्थिनः आलोचनात्मिकीं दृष्टिं धारयेयुः आशावन्तः च अपि भवेयुः । इदं तथ्यं विरोधि अस्ति इति भवन्तः चिन्तयेयुः, परन्तु वयम् आशावन्तः स्मः यत् एतत्-तथ्यद्वयं परस्परं चलितुं शक्नोति । यदि विद्यार्थिनां परिचयः वास्तविकीभिः समानताभिः कारयेम परन्तु ते इदं तथ्यम् अपि न अवगच्छेयुः अनुभवेयुः वा यत् एताः परिस्थितयः कथं सम्यक् भवितुं शक्नुवन्ति इति अज्ञात्वा विद्यार्थिनः हतोत्साहाः भविष्यन्ति । अपरस्मिन् पक्षे बालानाम् उत्साहम् आशावादं च स्थिरीकर्तुं तेषां केवलम् अस्य विषयस्य पाठनम् अपि सम्यक् न स्यात् यत् भारतम् एकम् आदर्श-लोकतन्त्रम् अस्ति यतोहि बालैः अनुभूतं दैनिक-यथार्थं पौनःपुन्येन तान् एकां भिन्नां कथां श्रावयति ।

सौभाग्यवशात् अस्माकं देशे संविधानरूपः कल्पनाशीलः अभिलेखः अपि अस्ति अपि च जन-सङ्घर्षाणां कश्चिद् बृहद् इतिहासः अपि वर्तते। अत्र अस्माभिः ज्ञात्वा एव द्वयोः साधनयोः चयनं कृतम् अस्ति। एतस्य साहाय्येन विद्यार्थिनः आलोचनात्मकं विश्लेषणं कर्तुं शक्नुवन्ति । इदं विश्लेषणं तेषां कृते किञ्चिद् आशायुक्तं सकारात्मकं च अनुभवरूपं भवितुं शक्नोति । भारतीयसंविधानम् एकम् अतिमहत्त्वपूर्णम् कल्पनाशीलम् अभिलेखम् वर्तते । अन्याय-उत्पीडन-प्रभृतीन् विषयान् सम्बोधयितुम् अनेकैः जनैः सामाजिक-आन्दोलनैः च अस्य अभिलेखस्य अति-रचनात्मक-प्रकारेण उपयोगः कृतः । वयं संविधानम् अस्य नूतनस्य विषय-क्षेत्रस्य कृते नैतिक-धुरी-रूपेण आधारीकृत्य प्रयुक्तवन्तः । अपरस्मिन् पक्षे अस्मिन् पुस्तके सामाजिक-आन्दोलनैः विद्यार्थिनः अवगच्छेयुः इति प्रयासः कृतः अपि च ते विद्यार्थिनः एतत् तथ्यम् अपि जानीयुः यत् संविधानस्य उपस्थितिमात्रेण समानतायाः सम्मानस्य च आश्वासनं न दातुं शक्यते। संविधानस्य आदर्शान् साकारीकर्तुं जनैः नैरन्तर्येण सङ्घर्षः कर्तव्यः भवति ।

अस्याः शृङ्खलायाः इदम् अन्तिमं पुस्तकम् अस्ति इति चिन्तयन्तः वयम् एतेन् तथ्येन अपि अवगताः आस्म यत् भविष्यत्-काले न केवलम् एतेषु पाठ्यपुस्तकेषु अपितु सामाजिक-राजनैतिक-जीवनम् इति विषयस्य पाठ्यचर्यायाम् अपि परिवर्तनानि नैरन्तर्येण भविष्यन्ति । वयम् आशावन्तः स्मः यत् उपर्युक्त-कारणैः भवन्तः एतत् ज्ञास्यन्ति – यत् अस्माभिः एतानि पाठ्यवस्तुनि किमर्थं रचितानि, अपि च एतैः शिक्षकाणां छात्राणां कृते किं लप्स्यते । एतत् सर्वं भवतां पुरः स्थापिते सति भवन्तः एतं विषयक्षेत्रं इतोऽपि गभीरतया ज्ञास्यन्ति । वयम् आशास्महे यत् भवन्तः इदं ज्ञास्यन्ति यत् माध्यमिक-विद्यालयीय-स्तरे वर्तमान-सामाजिकम् एवं राजनैतिक-विषय-स्पर्शन-शीलान् विषयान् एकमात्रक्षेत्ररूपेण सामाजिक-राजनैतिक-जीवन-शृङ्खला भवताम् अवगमनाय एकं विशिष्टम् अवसरं कल्पयति यत् भवतां विद्यार्थिनां जीवनं व्यापक-सामाजिक-विषयैः केन प्रकारेण सम्बद्धम् अस्ति । वयं भवद्भ्यः आशां कुर्मः यत् भवन्तः एतस्य अवसरस्य लाभं स्वीकुर्वन्तः रटन-पद्धत्याः स्थाने सम्यक् पाठनपद्धतेः प्रयोगं कर्तुं अग्रेसराः भविष्यन्ति । एतेषु पाठ्यपुस्तकेषु प्रदत्ताः सूचनाः परस्परं ग्रथिताः वर्तन्ते अपि च स्थानीयचिन्ताः पुरः स्थापयित्वा अपि च एतदाधारित-विश्लेषणस्य विकसनस्य च अपि अवसरं प्रददाति । अतः भवद्भिः न केवलं कक्षायाः अन्तः उत्साहपूर्णं वातावरणं करणीयम् अपितु एतत् अपि ध्यातव्यं यत् विभिन्नेभ्यः विविध-पृष्ठ-भूमिभ्यः आगतेभ्यः बालकेभ्यः स्वविचाराणाम् अभिव्यक्तेः अवसरः अपि लभ्येत कोऽपि अहं त्यक्तः अथवा अपमानितः इति एतादृशम् अनुभवम् अपि न कुर्यात् ।

एकस्य पाठ्यपुस्तकस्य माध्यमेन एकस्य नूतनस्य विषयक्षेत्रस्य आविष्करणं सरलं न भवति । सामाजिक-राजनैतिक-जीवन-शृङ्खलायां समकालीनप्रश्नेषु ध्यानं केन्द्रितं कृतम्, अतः अत्र विवादस्य सम्भावना अधिका दृश्यते । वयम् एतस्मात् रक्षिताः न भवितुं शक्नुमः । निश्चयेन भवद्भिः दृष्टेः अभिव्यक्तिः न निरोद्धव्या । परन्तु एतत् भवद्भिः एव निश्चेतव्यं यत् के विचाराः सर्वेषां

कृते न्यायप्रतिष्ठाधारिताः वर्तन्ते । यदि भवन्तः अनुभवन्ति यत् विद्यालयः स्वविद्यार्थिषु एकस्य न्यायपूर्णस्य समाजस्य बोधम् उत्पादयितुं शक्नोति तर्हि सामाजिकम् अपि च राजनैतिकजीवनस्य एतत् पुस्तकम् एतस्यां दिशि भवतां कृते एकम् उपयोगि-साधनरूपेण चरितार्थं भविष्यति । वयं सहृदयम् आशां कुर्मः यत् भवन्तः अस्माकं प्रस्तुतिं स्वीकरिष्यन्ति ।

अष्टमकक्षायाः पाठ्यपुस्तके समायोजिताः विषयाः के सन्ति ?

अष्टमकक्षायाः पुस्तकम् अधिनियमस्य शासने सामाजिक-न्यायस्य शासने च केन्द्रितम् अस्ति । एतस्य एकाङ्काः भारतीयसंविधाने, संसदि, न्यायपालिकायाम्, सामाजिक-उपान्त-करणे (हाशिया-करणम् इति) पुनश्च आर्थिकक्षेत्रे सर्वकारस्य भूमिका इत्यादिषु एतेषु पञ्चसु शीर्षकेषु केन्द्रिताः सन्ति । प्रत्येकम् एकाङ्के अध्यायद्वयम् अस्ति । एतस्मिन् पुस्तके विद्यार्थिनः एतत्पठनस्य अवसरं प्राप्स्यन्ति यत् अधिनियमः किम् अस्ति पुनश्च अधिनियमस्य शासनं किं भवति । ते इदम् अपि पठिष्यन्ति यत् प्रायः केवलम् अधिनियमाः एव पर्याप्ताः न, अपितु स्वस्य मौलिकान् अधिकारान् साकारीकर्तुं जनैः दीर्घकालं यावत् सङ्घर्ष-पथे चलितव्यं भवति । पुस्तकस्य अन्ते "एकस्मिन् जीवितादर्श-रूपे संविधाने टिप्पणी प्रदत्ता वर्तते । इयं टिप्पणी अस्मिन् पुस्तके प्रस्तुतान् विचारान् पुनः परस्परं योजयति ।

अष्टमकक्षायाः पुस्तके चितान् विषयान् स्पष्टीकर्तुम् एतेषां साधनानां प्रयोगः कृतः अस्ति –

चित्रकथा-पट्टः – अस्माभिः याः प्रतिपुष्टयः प्राप्ताः, ताभिः ज्ञायते यत् गतवर्षे अस्माभिः चित्रकथापट्टस्य या शैली प्रारब्धा आसीत् , तां शैलीं छात्राः शिक्षकाः च सहर्षं स्वीकुर्वन्तः सन्ति अस्मिन् वर्षे अपि अस्माभिः वास्तविक-घटनाभिः प्रेरितः पुनरपि काल्पनिक-परिस्थितीः दर्शयितुम् अस्य माध्यमस्य प्रयोगः कृतः । वयम् आशास्महे यत् विद्यार्थिनः एताः परिस्थितीः ज्ञास्यन्ति अपि च चित्रकथापट्टेषु प्रस्तुताः अवधारणाः प्रक्रियाः च इतोऽपि समीचीनतया ज्ञास्यन्ति ।

यदा भवती कक्षातः बहिः गता आसीत् तदा अनिलः कोलाहलं करोति स्म । सः मम कथनम् अपि न श्रुतवान् ।
अनिलः, अद्य त्वं पूर्णावकाशस्य अनन्तरम् अत्र एव स्थास्यसि, त्वम् अद्य शतवारं लेखिष्यसि यत् अहं कक्षानायकं न बाधिष्ये ।
परन्तु... मान्ये.. अहं तु किमपि न कृतवान् ।

शब्दसङ्कलनम् – सर्वेषु अध्यायेषु केचन शब्दाः स्थूलाक्षरेषु प्रदत्ताः सन्ति । एतेषां स्पष्टीकरणं शब्दसङ्कलने कृतम् अस्ति । यथा गतवर्षे उक्तम् आसीत्, शब्दसङ्कलने प्रदत्तेषु शब्देषु सामान्यतया तस्मिन् अध्याये आगताः अवधारणाः न स्थापिताः । परिणामतः परिभाषाम् अवगन्तुं ताः न पठ्यन्ते चेत् वरं स्यात् । एते शब्दाः तु अध्यायम् इतोऽपि सम्यक्तया अवगन्तुं प्रदत्ताः सन्ति ,न तु किमपि विषयं रटनार्थं प्रदत्ताः वर्तन्ते ।

शिक्षकाणां कृते – गतवर्षस्य इव अस्मिन् वर्षे अपि प्रत्येकम् एकाङ्कात् (इकाई) प्राक् एकं नूतनं पृष्ठं शिक्षकाणां कृते प्रदत्तम् अस्ति। अस्मिन् पृष्ठे अग्रिमेषु अध्यायेषु प्रस्तुताभ्यः अवधारणाभ्यः शिक्षकाः बोधिताः, यतोहि तस्मात् शिक्षकाः ताः अवधारणाः सरलतया पठितुं शक्नुयुः।



अध्यायस्य अन्तर्भागे अध्यायस्य अन्ते च प्रश्नाः- गतद्वयोः वर्षयोः पुस्तकानाम् इव अस्य वर्षस्य पुस्तके अपि अध्यायस्य मध्ये अध्यायस्य अन्ते च प्रश्नाः प्रदत्ताः सन्ति। एते प्रश्नाः बहुविधाः सन्ति। एतेषां माध्यमेन छात्राणां तार्किक-क्षमता-विस्तारस्य तुलना-करणस्य भेदज्ञानस्य परिणामप्राप्तेः अनुमानकरणस्य विश्लेषण-करणस्य च एवञ्च पठनस्य दृश्य-सामग्र्याः निर्माणस्य क्षमतानाम् आकलनं कर्तुं प्रयासः कृतः अस्ति। अध्यायस्य अन्ते प्रदत्ताः प्रश्नाः प्रायः अध्याये प्रस्तुतानाम् अवधारणात्मकानां बिन्दूनां पुनरावर्तनेन सह एतत् तथ्यं प्रति अपि प्रेरयन्ति यत् विद्यार्थिनः स्वस्य रचनात्मक-क्षमतानाम् अपि प्रयोगं कुर्युः। अयं ध्यातव्यः अंशः वर्तते यत् विद्यार्थिभिः एतेषां प्रश्नानाम् उत्तराणि स्वशब्दैः एव दातव्यानि सन्ति।



चित्रनिबन्धः– गतवर्षस्य पुस्तके महिला-आन्दोलनम् आधृत्य एकः चित्रनिबन्धः प्रदत्तः आसीत्। अस्मिन् वर्षे वयं भोपाल-विषवायु-त्रासद-आधारितं चित्रनिबन्धं दत्तवन्तः। चित्र-निबन्ध-माध्यमेन विद्यार्थिनः विशिष्टां स्थितिम् अवगन्तुं साहाय्यम् अनुभवन्ति। चित्रनिबन्धे एकैकं चित्रं बहुसावधानतया चित्रितम् अस्ति, येन तद्-विषयकाः इतिहासस्य विशिष्टाः क्षणाः पुरतः उपस्थिताः भवेयुः।

विषय – सूची

अनुवादकः - रूपलालशर्मा

	आमुखम् (पुरोवाक्)	iii
	शिक्षकाणां कृते आरम्भिक-टिप्पणी	vii
प्रथमः घट्टः	**भारतीय संविधानं धर्मनिरपेक्षता च**	2
प्रथमः अध्यायः	भारतीयसंविधानम्	4
द्वितीयः अध्यायः	धर्मनिरपेक्षतायाः अवगमनम्	18
द्वितीयः घट्टः	**संसद् अधिनियमानां रचना च**	28
तृतीयः अध्यायः	अस्माकं कृते संसदः का आवश्यकता ?	30
चतुर्थः अध्यायः	अधिनियमानाम् अवगमनम्	42
तृतीयः घट्टः	**न्यायपालिका**	52
पञ्चमोऽध्यायः	न्यायपालिका	54
षष्ठोऽध्यायः	अस्माकम् आपराधिक-न्यायप्रणाली	66
चतुर्थः घट्टः	**सामाजिकन्यायः उपान्तीकृतानां (शोषितवर्गीयानां) जनानां च अभ्यर्थनाः**	78
सप्तमोऽध्यायः	उपान्तीकरणस्य अवबोधः	80
अष्टमोऽध्यायः	उपान्तीकरणात् मुक्तिः	94
पञ्चमः घट्टः	**आर्थिक-क्षेत्रे सर्वकारस्य भूमिका**	104
नवमोऽध्यायः	जन-सुविधाः	106
दशमोऽध्यायः	अधिनियमः सामाजिकन्यायः च	120
	सन्दर्भः	134

प्रथमः घट्टः

शिक्षकाणां कृते

सामाजिके राजनैतिके च जीवने केन्द्रितयोः द्वयोः विगत-पाठ्यपुस्तकयोः भारतीय-संविधानस्य पौनःपुन्येन चर्चा आगता। द्वयोः एव पुस्तकयोः संविधानस्य उल्लेखः तु आसीत् परन्तु तयोः संविधानस्य पर्याप्तरूपेण चर्चा न कृता आसीत्। अस्मिन् वर्षे प्रथमस्य घट्टस्य अध्यायेषु मुख्यरूपेण संविधानस्य विषये विचारः क्रियते।

प्रथमाध्याये सर्वेभ्यः विषयेभ्यः पूर्वं तेषां सिद्धान्तानां चर्चा कृता अस्ति, येभ्यः सिद्धान्तेभ्यः उदारवादि-संविधानस्य प्रादुर्भावः जायते। येषु विषयेषु चर्चा क्रियते , तैः सह बालानां परिचयं कारयितुं त्रयः लघु-चित्र-कथा-पट्टाः अपि प्रदत्ताः सन्ति। एतेषु चित्र-कथा-पट्टेषु कक्षायाः अन्तः घट्यमानानां घटनानां माध्यमेन त्रयः जटिलाः मूलभूत-सिद्धान्ताः बोधिताः सन्ति। चित्रकथापट्टानां माध्यमेन भवन्तः विद्यार्थिनः इदं बोधयितुं शक्नुवन्ति यत् ये मूलभूताः सिद्धान्ताः अस्मभ्यं केभ्यः विषयेभ्यः सुरक्षां प्रददति।

भारतीय-संविधानस्य चर्चा एकस्मिन् ऐतिहासिक-सन्दर्भे प्रस्तुता वर्तते। एतस्याः चर्चायाः इदम् उद्देश्यं वर्तते यत् विद्यार्थिनः एतत् तथ्यम् अनुभवेयुः यत् अस्माकम् उपनिवेशवादिना विरोधि-सङ्घर्षेण भारतीय-लोकतन्त्रे के के महत्त्वपूर्ण-प्रभावाः आगताः सन्ति। वयं संविधानस्य चर्चां कुर्वन्तः तस्य मुख्यानाम् आयामानां व्याख्यां कर्तुं बहूनां नूतनानां प्रायः कठिनानां शब्दानां च प्रयोगं कर्तुं बाध्याः जाताः। एतेषां शब्दानां पाठनकाले इदम् अपि ध्यातव्यम् अस्ति यत् बालकैः एते अंशाः अग्रिमासु कक्षासु विस्तरेण पठनीयाः सन्ति। अतः, अत्र अयं प्रयासः कृतः अस्ति यत् बालकाः भारतीय-लोकतन्त्र-सम्बन्धितानाम् एतेषाम् आयामानाम् आधारभूतं ज्ञानं प्राप्नुयुः।

द्वितीये अध्याये धर्मनिरपेक्षतायाः विषये चर्चा कृता अस्ति। धर्मनिरपेक्षतायाः सर्वाधिक-प्रचलित-परिभाषा अस्मिन् सिद्धान्ते आश्रिता यत् धर्मं राज्यं च अन्योऽन्यस्मात् पृथक्करणीयौ। अत्र इयं परिभाषा प्रस्थानबिन्दुरूपेण दृष्टा अस्ति अपि च अनेन आधारेण द्वयोः जटिलविचारयोः व्याख्या कृता अस्ति। प्रथमः विचारः इदं तथ्यं प्रति सङ्केतं करोति यत् राज्यं धर्मं च अन्तरा दूरता किमर्थं महत्त्वपूर्णा वर्तते, अपि च अपरः एतस्मिन् तथ्ये बलाघातं करोति यत् भारतीयधर्मनिरपेक्षतायाः के महत्त्वपूर्णाः पक्षाः सन्ति।

राज्यं धर्मं च अन्तरा पृथक्करणस्य द्वे महत्त्व-पूर्ण-कारणे स्तः। प्रथमं कारणम् एतत् अस्ति यत् एकस्य धर्मस्य अपरस्मिन् धर्मे अर्थात् अन्तर्-धार्मिक-वर्चस्वेन(inter-rellgious) न स्थापितव्यम् इति। अपरं तथ्यम् इदम् अस्ति यत् धर्मस्य अन्तः अपि ये विभिन्नप्रकाराः वर्चस्वाः स्थापिताः भवन्ति अर्थात् अन्तःधार्मिकः(इन्टर-रिलिजिअस) (inter-rellgious) वर्चस्वस्य विरोधःस्यात्। उदाहरणार्थम् अस्मिन् अध्याये हिन्दु-धर्मस्य आभ्यन्तरे अस्पृश्यतायाः प्रचलन-विषये चर्चा कृता। अस्याः प्रथायाः कारणात् उच्चजातिवर्गस्य जनाः निम्नजातिवर्गस्य दमनस्य अवसरं प्राप्तवन्तः। धर्म-निरपेक्षतायाः संस्थागत-धर्मात् विरोधः अस्ति। अपि च तस्य अयम् अभिप्रायः यत् इदं चिन्तनं धर्माणां मध्ये अपि च धर्माणाम् आभ्यन्तरे समानतां स्वतन्त्रतां च प्रोत्साहयन्ति।

अस्मिन् अध्याये अपरः महत्त्वपूर्णः अवधारणात्मकः प्रश्नः अस्मिन् तथ्ये केन्द्रितम् अस्ति यत् भारतीय-धर्म-निरपेक्षतायाः अद्वितीया विशेषता का ? भारतीया धर्म-निरपेक्षता राज्यं धर्मात् पृथक् स्थापयित्वा व्यक्तीनां धार्मिक-स्वतन्त्रतायाः रक्षां करोति। परन्तु इयम् अवधारणा धर्माणाम् आभ्यन्तरे परिष्कारस्य अपि सम्भावनाम् उत्पादयति। उदाहरणार्थम् एतस्य आधारेण अस्पृश्यता अपि च बाल-विवाह-सदृश-कुरीतीनां च उन्मूलनस्य दिशि गन्तुं शक्नुमः।

फलतः धार्मिक-समानतायाः स्थापनया भारतीय-धर्मनिरपेक्ष-राज्यं धर्मेभ्यः दूरम् अपि तिष्ठति। अपि च तेषु हस्तक्षेपम् अपि करोति। अयं प्रतिरोधः निषेधरूपेण अपि भवितुं शक्नोति। अपि च यथा – अस्पृश्यतायाः विषये। अपि च धार्मिक-अल्पसङ्ख्यकान् सहायताप्रदायक- रूपेण अपि भवितुं शक्नोति। अस्मिन् अध्याये एतस्य तथ्यस्य अपि व्याख्या कृता अस्ति अपि च सैद्धान्तिकम् असामीप्यम् अपि उक्तं वर्तते। एतस्य अर्थः अयम् अस्ति यत् राज्यपक्षतः धर्मे कस्य अपि प्रकारस्य प्रतिरोधः संविधाने सूत्रबद्धकृतेषु आदर्शेषु आधारितः स्यात्।

उपरि येषां तथ्यानां चर्चा कृता अस्ति तेषु केचन बिन्दवः बहुजटिलाः सन्ति। परिणामतः इदम् अति आवश्यकम् वर्तते यत् इमम् अध्यायं पाठनात् पूर्वं भवद्भिः एते अंशाः सम्यक्तया अवगन्तव्याः। विद्यार्थिनां पक्षतः बहवः परामर्शाः अस्मिन् विषये आगन्तुं शक्यन्ते। यत् सर्वकारेण धार्मिकविषयेषु प्रतिरोधः किमर्थं कर्तव्यः। अथवा किमर्थं न कर्तव्यः इति। अत्र कोऽपि सन्देहः न वर्तते यत् काचिद् अपि चर्चा अधिकाधिकरूपेण प्रोत्साहितव्या। परन्तु एषा चर्चा मर्यादायां भवेत् यतो धार्मिकाल्प-सङ्ख्यकानां विषये बालानां मनसि विद्यमान-रूढिवादि-भावाः इतोऽपि सुदृढाः न भवेयुः इति।

अध्यायः - 1

भारतीयसंविधानम्

अस्मिन् अध्याये वयं पादकन्दुक-क्रीडया स्वचर्चायाः प्रारम्भं करिष्यामः । भवत्सु बहवः बालकाः अस्याः क्रीडायाः विषये अवश्यम् एव श्रुतवन्तः स्युः । बहवः च क्रीडितवन्तः अपि स्युः। यथा एतस्याः नाम्ना एव ज्ञानं भवति, इयं क्रीडा पाद-सम्बद्धा वर्तते । पादकन्दुक-क्रीडायाः एकः नियमः अस्ति यत् गोलरक्षकं विहाय कोऽपि क्रीडकः कन्दुकं हस्ताभ्यां न स्प्रष्टुं शक्नोति । यदि कस्यश्चित् क्रीडकस्य हस्तः कन्दुकं स्पृशति, तदा एतत् निरस्तम् (फाउल इति) अथवा अनुचितं मन्यते । कथनस्य अयम् अभिप्रायः अस्ति यत् यदि क्रीडकः पादकन्दुकं हस्तेषु गृहीत्वा परस्परं दद्यात् तदा तां क्रीडां पाद-कन्दुक-क्रीडा-रूपेण न स्वीकर्तुं शक्यते । तथैव यष्टि-क्रीडायाः (हॉकी-इति) क्रिकेट्-क्रीडादीनाम् अन्यक्रीडानाम् च अपि केचन निर्धारिताः नियमाः भवन्ति । एतैः नियमैः क्रीडां परिभाषयितुं अपि च विभिन्नासु क्रीडासु भेदं कर्तुं सहायता लभ्यते । एतासां क्रीडानाम् इव समाजस्य अपि केचन मूलभूताः नियमाः (constitutive rules) भवन्ति । एतैः एव समाजस्य स्वरूपं निश्चितं भवति अपि च विभिन्नेषु समाजेषु भेदज्ञानं भवति । बृहत्-समाजेषु केचन विभिन्नसमुदायाः परस्परं निवसन्ति। तत्र नियमस्थापनं सर्व-सहमति-माध्यमेन भवति । आधुनिकदेशेषु इयं सहमतिः सामान्यतया लिखितरूपेण उपलभ्यते । यस्मिन् अभिलेखे वयम् एतादृशान् नियमान् प्राप्नुमः तत् संविधानम् इति कथ्यते ।

षष्ठकक्षायां सप्तमकक्षायां च अपि सामाजिक-राजनैतिक-जीवनस्य पाठ्यपुस्तकेषु वयं भारतीयसंविधाने चर्चां कृतवन्तः । एतानि पुस्तकानि पठित्वा किं भवतां मनसि कदाचित् एषः प्रश्नः उद्भूतः यत् अस्माकं कृते संविधानस्य आवश्यकता किमर्थं भवति ? किं भवद्भिः एतत् ज्ञातुं प्रयासः कृतः यत् संविधानं कः रचितवान् इति ? अथवा तत् कः लिखितवान् इति ? अस्मिन् अध्याये वयम् एतेषु विषयेषु चर्चां करिष्यामः अपि च भारतीय-संविधानस्य मुख्यतथ्येषु अवधानं दास्यामः । एतानि तथ्यानि भारतीय-लोकतन्त्रस्य कृते बहु-महत्त्व-पूर्णानि सन्ति । एतस्य पुस्तकस्य विभिन्नेषु अध्यायेषु एतेषु केषुचित् तथ्येषु विशेषरूपेण बलं प्रदास्यते ।

कस्यापि देशस्य कृते संविधानस्य आवश्यकता किमर्थं भवति ?

अद्य विश्वस्य अधिकांश-देशानां पार्श्वे स्वकीयं संविधानं वर्तते। सामान्यतया सर्वेषां लोक-तान्त्रिक-देशानां विषये सम्भावना कर्तुं शक्यते यत् तेषां पार्श्वे संविधानम् अवश्यम् एव भविष्यति। परन्तु एतस्य अयम् अभिप्रायः नास्ति यत् येषां देशानां पार्श्वे स्वकीयं संविधानं भवति ते सर्वे लोकतान्त्रिक-देशाः एव सन्ति। संविधानं बहूनाम् उद्देश्यानां पूर्तिं करोति। प्रथमतः अयम् अभिलेखः तान् आदर्शान् सूत्रबद्धान् करोति येषाम् आधारेण नागरिकाः स्वदेशं स्वेच्छानुसारम् अपि च स्व-स्वप्नानुगुणं रचयितुं शक्नुवन्ति। अर्थात् संविधानम् एव बोधयति यत् अस्माकं समाजस्य मूलभूतं स्वरूपं किं स्यात्। देशे प्रायशः अनेके समुदायाः वसन्ति। तेषां मध्ये विचाराः समानाः भवन्ति परन्तु इदम् आवश्यकं नास्ति यत् तेषु सर्वेषु विषयेषु सर्वे परस्परं सहमताः भविष्यन्ति। संविधानं नियमानां तादृशः समूहः भवति यम् एकस्य देशस्य सर्वे जनाः स्वदेशस्य चालन-पद्धति-रूपेण स्वीकर्तुं शक्नुवन्ति। एतेन माध्यमेन ते न केवलम् इदं निश्चितं कुर्वन्ति यत् सर्वकारः कीदृशः भविष्यति अपितु तेषु आदर्शेषु अपि एकं सामूहिक-मतं विकासयन्ति , येषाम् आदर्शानां सर्वदा समग्रे देशे रक्षा भवेत्।

१९३४ इत्यस्मिन् भारतीय-राष्ट्रियकाङ्ग्रेस-दलं संविधानसभायाः निर्माणस्य अभ्यर्थनां प्रथमवारं स्व-अधिकृतनीतौ सम्मिलितां कृतवान्। केवलं भारतीयान् अधिकृत्य निर्मायमाणायाः एकस्याः स्वतन्त्र-संविधान-सभायाः इयम् अभ्यर्थना द्वितीयविश्वयुद्धस्य काले इतोऽपि तीव्रा जाता अपि च अन्ततः डिसम्बर्-१९४८ तमे वर्षे संविधान-सभायाः निर्माणं कृतम्। द्वितीये पृष्ठे प्रदत्तचित्रे संविधानसभायाः केचन सदस्याः दर्शिताः सन्ति।

डिसम्बर् १९४६ इत्यस्माद् वर्षात् नवम्बर् १९४९ इति यावत् संविधानसभा स्वतन्त्रभारतस्य कृते नूतनस्य संविधानस्य एकं प्रारूपं सज्जीकृतवती। 150 वर्षकालावधिपर्यन्तस्य आङ्ग्लीयशासकानन्तरं भारतीयाः अन्ततः स्वीयां नियतिं भविष्यं च निश्चेतुम् अवसरं प्राप्तवन्तः। संविधानसभायाः सदस्यैः स्वतन्त्रतासङ्घर्षात् जातान् महादर्शान् मनसि निधाय कार्यमेतत् गंभीरतया सम्पादितम्। संविधानसभायाः कार्याणां विषये भवन्तः अस्मिन् अध्याये अग्रे पठिष्यामः।

पार्श्वस्थे चित्रे प्रधानमन्त्रि-जवाहरलाल-नेहरुः संविधानसभां सम्बोधयति ।

नेपाले लोकतन्त्रार्थम् अनेके जनसङ्घर्षाः जाताः । १९९० तमे वर्षे जायमानस्य सङ्घर्षस्य अनन्तरं लोकतन्त्रस्य स्थापना अभूत् । इयं लोकतन्त्र-व्यवस्था २००२ तमं वर्षं यावत् अर्थात् १२ वर्षाणि यावत् प्राचलत् । अक्टूबर् २००२ तमे वर्षे राजज्ञानेन्द्रः ग्रामेषु माओवादि-सङ्घटनां वर्धमानस्य प्रभावस्य व्याजेन सेनासहयोगेन सर्वकारस्य विभिन्नानि कार्याणि स्वायत्तीकर्तुम् आरब्धवान् । फरवरी २००५ तमे वर्षे राजा शासनस्य भारं सम्पूर्णरूपेण स्वहस्तयोः गृहीतवान् । नवम्बर २००५ तमे वर्षे माओवादिभिः अन्यराजनैतिकदलैः सह एकं द्वादशसूत्रीयसन्धौ हस्ताक्षरं कृतम् । अस्मिन् सन्धौ सामान्यजनाः लोकतन्त्रस्य सुखशान्त्योः च आशां कुर्वन्ति स्म। लोकतन्त्रस्य कृते चलत् एतत् आन्दोलनं २००६ तमे वर्षे चरमोत्कर्षं प्राप्तवान् । आन्दोलनकारिभिः राजपक्षतः प्रदीयमानानि लघुराज्यानि न स्वीकृतानि । अन्ततः अप्रैल् २००६ तमे वर्षे राजा असक्तः भूत्वा तृतीयसंसदं स्वतन्त्रीकृत्य राजनैतिक-दलानां कृते सर्वकार-निर्माणस्य अवसरं दत्तवान् । २००७ तमे वर्षे नेपालदेशेन मध्यगतं संविधानं विरचितम् तदनुसारं च शासनं चालितम् । २००६ तमे वर्षे लोकतन्त्रस्य अभियाचनां कुर्वतः जन-तान्त्रिकान्दोलनस्य दृश्यानि उपरितनेषु चित्रेषु वर्तन्ते ।

स्वशिक्षकैः सह चर्चां कुर्वन्तु यत् मूलभूत- (constitutive) शब्देन भवन्तः किम् अवगच्छन्ति ? स्वदैनन्दिनजीवनस्य आधारेण भवन्तः किम् अवगच्छन्ति ? स्वस्य दैनन्दिनस्य जीवनस्य आधारेण मूलभूतनियमस्य एकम् उदाहरणं यच्छन्तु ।

नेपालस्य जनता एकं नूतनं संविधानं किमर्थम् इच्छति स्म ?

एतेषां तथ्यानां कः अभिप्रायः ? एतत् अवगन्तुम् आगच्छन्तु द्वयोः विभिन्न-परिस्थित्योः अवधानं दद्मः । द्वे घटने भारतस्य उत्तरसीम्नि स्थितस्य नेपालस्य इतिहासस्य सद्यः जाते घटने स्तः । समाचार-पत्र-माध्यमेन उपरि-प्रदत्त-वार्तासु उक्तम् अस्ति यत् नेपालस्य जनाः सद्यः एव एकम् मध्यगतं संविधानं स्वीकृतवन्तः सन्ति । प्रश्नः अयम् उदेति यत् यदा नेपाले पूर्वतः एव संविधानम् आसीत् तदा सः नूतनस्य संविधानस्य आवश्यकतां किमर्थम् अनुभूतवान् ? एतस्य कारणम् अस्ति यत् किञ्चित्कालपूर्वं नेपाले राजतन्त्रम् आसीत् । तत्र राजशासनम् आसीत् । १९९० तमे वर्षे स्थापित-नेपाल-देशस्य गतसंविधानम् अस्मिन् सिद्धान्ते आधारितम् आसीत् यत् शासनस्य सर्वोच्च-सत्ता राज्ञः पार्श्वे स्थास्यति । नेपालदेशीयाः जनाः बहुभ्यः दशकेभ्यः लोकतन्त्रस्य स्थापनार्थं सङ्घर्षरताः आसन् । एतस्य सङ्घर्षस्य फलस्वरूपं २००६ तमे वर्षे अन्ततो गत्वा ते राजतन्त्रीय-सत्तां समापयितुं सफलाः जाताः । अधुना नेपाल-देशीयाः जनाः लोकतन्त्रपथे चलितुम् इच्छन्ति तन्निमित्तं च तेषां कृते नूतनस्य संविधानस्य आवश्यकता वर्तते । ते पुरातनं संविधानम् एतस्मात् कारणात् अङ्गीकर्तुं न इच्छन्ति यतो हि तस्मिन् ते आदर्शाः न सन्ति यान् आदर्शान् ते नेपालस्य कृते इच्छन्ति येषां कृते च ते युध्यमानाः आसन् ।

यथा पाद-कन्दुक-क्रीडायां नियमेषु परिवर्तितेषु सत्सु क्रीडा एव परिवर्तिता भवति तथैव नेपालदेशेन अपि राजतन्त्रस्य स्थाने आगतायां लोकतन्त्र-शासन-व्यवस्थायाम् स्वकीयाः सर्वे पुरातनाः नियमाः परिवर्तनीयाः भविष्यन्ति यतो हि तस्मात् एकस्य नूतनस्य समाजस्य रचना भवेत् एतत् एव कारणम् अस्ति यत् नेपालदेशस्य जनाः स्वदेशस्य कृते एकं नूतनं संविधानं रचयन्तः सन्ति । उपरितनेन चित्रेण सह प्रदत्तेषु अंशेषु लोकतन्त्रस्य कृते नेपालद्वारा कृतस्य सङ्घर्षस्य विषये कथितम् अस्ति ।

संविधानस्य द्वितीयः मुख्योद्देश्यः भवति – देशस्य राजनैतिक-व्यवस्थायाः निर्धारीकरणम् । नेपालस्य पुरातने संविधाने उक्तम् आसीत् यत् देशस्य

शासनस्य दायित्वं राज्ञः मन्त्रिपरिषदः च हस्तेषु भविष्यति । ये देशाः लोकतान्त्रिक-शासन-पद्धतिम् अथवा राज्यव्यवस्थां चितवन्तः तत्र निर्णय-प्रक्रियायाः नियमस्थापने संविधानं बहु-महत्त्व-पूर्णां भूमिकां निर्वहति ।

लोकतन्त्रे वयं स्वनेतारं स्वयं चिनुमः, येन अस्माकं पक्षतः ते सत्तायाः दायित्व-पूर्ण-भावनया प्रयोगं कुर्युः । पुनरपि एतस्याः वार्तायाः सम्भावना सर्वदा भवति यत् ये नेतारः सत्तायाः दुरुपयोगं कर्तुं शक्नुवन्ति । एतादृश-विकृतिभ्यः रक्षणोपायः संविधाने लभ्यते । राजनेतृभिः सत्तायाः दुरुपयोगेण जनैः सह आधिक्येन अन्यायः भवितुं शक्नोति । एतस्य एकम् उदाहरणम् अधः प्रदत्ते चित्र-कथापट्टे द्रष्टुं शक्यते ।

सुरेशः निजकक्षायाः कक्षानायकः अस्ति । सः उद्धतस्वभावस्य बालकः अस्ति । तस्य सहपाठिनः तस्मिन् न स्निह्यन्ति । कक्षाध्यापिका श्रीमतीरावः सहसा कस्मैचित् कार्याय बहिः गन्तुम् इच्छति । सुरेशः सर्वेषां बालकानां निरीक्षणं करिष्यति इति उक्त्वा सा कक्षातः बहिः गतवती । सुरेशः अवसरस्य लाभं स्वीकुर्वन् अनिलं तुदति ।

अनिलः – अद्य अहं रावशिक्षिकायाः समक्षं तव दूषणं प्रस्तुतं करिष्यामि ।
परन्तु मया किं कृतम् ?
यदा भवति कक्षातः बहिः गता आसीत् तदा अनिलः कोलाहलं करोति स्म । सः मम कथनम् अपि न श्रुतवान् ।
अनिल, अद्य त्वं पूर्णावकाशस्य अनन्तरम् अत्र एव स्थास्यसि, त्वम् अद्य शतवारं लेखिष्यसि यत् अहं कक्षानायकं न बाधिष्ये ।
परन्तु... मान्ये.. अहं तु किमपि न कृतवान् ।

लोकतान्त्रिक-समाजेषु प्रायः संविधानम् एव एतादृशान् नियमान् निर्धारयति यैः राजनेतृणां हस्तेषु गतायाः सत्तायाः दुरुपयोगः रोद्धुं शक्यते । भारतीय-संविधाने एतादृशाः बहवः अधिनियमाः मौलिक-अधिकार-खण्डे प्रदत्ताः सन्ति । किं भवन्तः सप्तमकक्षायाः पाठ्यपुस्तके प्रदत्तानां दलित-लेखक-ओमप्रकाश-वाल्मीकेः अनुभवानां किञ्चित् स्मरणं कुर्वन्ति ? तस्मिन् अध्याये बोधितम् आसीत् यत् ओमप्रकाशः दलितजातेः कारणात् कीदृशं भेदभावं सोढवान् आसीत् । तत्र भवद्भिः पठितम् आसीत् भारतीय-संविधानं देशस्य सर्वेषां मनुष्याणां कृते समानतायाः अधिकारं प्रददाति । अस्माकं संविधानं कथयति यत् धर्म-जन्म-जाति-लिङ्ग-जन्मस्थानाधारेण देशस्य केनापि नागरिकेण सह भेदभावं न कर्तुं शक्यते । अनेन प्रकारेण समानतायाः अधिकारः भारतीयसंविधाने प्रदत्तः एकः मौलिकाvधिकारः अस्ति ।

१.कक्षानायकः कथं स्वशक्तेः दुरुपयोगं कुर्वन् अस्ति ?

२. अधः प्रदत्तायां कस्यां परिस्थितौ मन्त्री स्वसत्तायाः दुरुपयोगस्य दोषी इति कथयिष्यते ।

(क) यदा सः विशिष्टैः आभियान्त्रिक-कारणैः स्व-मन्त्रालयस्य काम् अपि परियोजनाम् अस्वीकरोति ।

(ख) यदा सः स्वप्रतिवेशिनं निजसुरक्षाकर्मिभिः ताडनस्य सबल-पूर्वसूचनां (धमकी-इति) ददाति ।

(ग) यदा सः आरक्षकगृहं प्रति दूरवाणीं कृत्वा आरक्षकाधिकारिणः बलेन कथयति यत् तस्य कस्यचित् दोषिसम्बन्धिनः प्राथमिकीं (एफ.आई.आर.) न स्वीकुर्युः।

लोकतन्त्रे संविधानस्य एकं महत्त्वपूर्णं कार्यम् इदं भवति यत् कोऽपि बलवान् समूहः कस्मिंश्चित् अपरस्मिन् निर्बलसमूहे अथवा जनेषु स्वबलस्य प्रयोगं न कुर्यात्। अधोलिखित- चित्रकथापट्टे कक्षायाः अन्तः एकस्याः घटनायाः आधारेण एतत् तथ्यं बोधितम् अस्ति।


क्रीडाकालांशः आरभते।
आगच्छन्तु अद्य किमपि नूतनं क्रीडामः - कण्डोलकन्दुकक्रीडाम्
नैव ! वयं तु क्रिकेट्क्रीडाम् एव क्रीडिष्यामः।
शिक्षकाः एतं विवादं समाधातुं द्वौ एव पक्षौ स्वहस्तौ उत्थाप्य स्वाभिमतिं प्रकटयितुं कथयन्ति।
इदं तु भवितव्यम् एव आसीत् ! बालकानां सङ्ख्या कक्षायाम् अधिका अस्ति।
हा हा हा !..वयं जितवन्तः। वयं जितवन्तः
अस्माभिः सदैव तद् एव कर्तव्यं भवति यत् बालकाः इच्छन्ति यतो हि तेषां सङ्ख्या कक्षायाम् अधिका वर्तते।
अध्यापिका निर्णयं कर्तुं कमपि अन्यम् उपायं चिन्तयेत् यस्मात् अस्माकम् इच्छायाः अपि अवलोकनं भवेत्।

उपरि लिखिते चित्रकथापट्टे के जनाः अल्पसङ्ख्यकाः सन्ति ? बहुसङ्ख्यक-दलेन स्वीकृतनिर्णयैः एतत् अल्पसङ्ख्यकदलं केन प्रकारेण अभिभूयते ?

एवंविधाः अस्वस्थाः परिस्थितयः लोक-तान्त्रिक-समाजेषु अपि भवितुं शक्नुवन्ति यत्र बहुमतयुक्तः समूहः नैरन्तर्येण एतादृशान् नियमान् नियोजयति। येषु अल्पसङ्ख्यकानां सहमतिः न भवति अपि च तेषां हानिः भवति। यथा यस्मिन् चित्रकथापट्टेन ज्ञानं भवति, बहुमतस्य निरङ्कुशतायाः भयं प्रत्येकस्मिन् समाजे भवति। संविधाने प्रदत्तैः नियमैः एतस्मिन् विषये अवधानं दीयते यत् अल्पसङ्ख्यकाः केनचित् एतादृशेन वस्तुना वञ्चिताः न भवेयुः यत् वस्तु बहुसङ्ख्यकानां कृते सामान्यरूपेण प्राप्तम् अस्ति। अल्पसङ्ख्यकेषु बहुसङ्ख्यकानाम् अस्याः निरङ्कुशतायाः अथवा वर्चस्वस्य प्रतिबन्धनम् अपि संविधानस्य महत्वपूर्णं कार्यम् अस्ति। इदं वर्चस्वम् एकस्य समुदायस्य अपरस्मिन् समुदाये अपि भवितुं शक्नोति। तत् अन्तस्-समुदाय-वर्चस्वम् इति कथ्यते। अथवा एकस्य एव समुदायस्य अन्तः केचन जनाः अन्यान् अभिभवितुं शक्नुवन्ति, तत् अन्तस्सामुदायिक-वर्चस्वम् इति कथ्यते।

संविधानेन किमर्थं भवितव्यम् ? अस्य तृतीयं महत्त्वपूर्णं कारणम् इदम् अस्ति यत् वयम् आत्मानं स्वस्मात् रक्षितुं समर्थाः भवेयम्। इयं वार्ता श्रोतुं किञ्चित् विपरीता प्रतीयते। वास्तविकतायाम् अस्य अभिप्रायः अयम् अस्ति यत्

बहुधा वयं कस्मिंश्चित् विषये त्वरया चिन्तनस्य प्रारम्भं कुर्मः । एतादृशाः विचाराः अस्माकं व्यापकहितानां कृते हानिप्रदाः भवन्ति । संविधानम् अस्मभ्यम् एतादृशीभ्यः भावनाभ्यः रक्षितुं साहाय्यं करोति । इदं ज्ञातुम् अधस्तनं चित्रकथापट्टं पश्यन्तु ।

शबनमा-महोदया दुविधायाम् अस्ति । तया किञ्चित् निर्धारणीयम् ।

श्वस्तनपरीक्षार्थम् अहम् अध्यायद्वयं पठिष्यामि । परन्तु अस्मिन् काले मम प्रियः दूरदर्शन-कार्यक्रमः आगच्छति । अहं तं दर्शनेन विना न स्थातुं शक्नोमि परन्तु यदि अहं तत् पश्यामि चेत् अहम् एतौ द्वौ अध्यायौ न पठितुं शक्ष्यामि ।
शबनमे, त्वम् उद्विग्ना प्रतीयसे- का वार्ता अस्ति ?
मया एषः दूरदर्शनकार्यक्रमः द्रष्टव्यः, परन्तु श्वः मम परीक्षा अपि वर्तते । यदि भवन्तः दूरदर्शनं द्रक्ष्यन्ति तदा मम मनः अपि द्रष्टुम् अवश्यम् उत्कण्ठितं भविष्यति । अहम् एकम् उपायं विचारयामि, यदि अद्यतनरात्रौ कोऽपि दूरदर्शनं न द्रक्ष्यति तदा मम मनः अपि द्रष्टुं लालायितं न भविष्यति ।

संविधानम् अस्मभ्यम् एतादृशान् निर्णयान् कर्तुम् अपि निवारयति ,येषु निर्णयेषु तेषां बृहत्-सिद्धान्तानाम् अपि हानिः भवति येषु देशः आस्थां धारयति । उदाहरणरूपेण भवितुं शक्नोति यत् लोकतन्त्रस्य स्वीकरणशीलाः अधिकतराः जनाः गम्भीरतया इदम् अनुभवेयुः यत् दल-गत-राजनीतिः अर्थात् (पार्टि-पालिटिक्स) विकृता जाता अस्ति, अतः इदानीं विचारान् शोधयितुं कञ्चित् राजाधीनम् एव शासन-भारं करणीयम् अथवा सेना-शासनेन भवितव्यम् । यस्मिन् भावनावेशे जनाः बहुधा एतत् तथ्यं प्रायशः न अनुभवेयुः यत् दीर्घकालं यावत् अधिनायकीय-तन्त्रं (तानाशाही-शासन इति) तु तेषां सर्वेषां हितानाम् एव नाशं करिष्यति । एकं सुसंविधानं देशस्य आधारभूत-संरचनां एतादृशात् उन्मादात् रक्षति । इदम् एतादृशान् नियमान् अथवा प्रावधानानि सारल्येन परिवर्तितुम् अवसरं न प्रददाति येषां माध्यमेन नागरिकाः अधिकाराणाम् आश्वासनानि लभन्ते अपि च तेषां स्वतन्त्रतायाः रक्षणं भवति ।



अनया चर्चया भवन्तः ज्ञास्यन्ति यत् सविधानं कस्मिन् अपि लोकतान्त्रिक-समाजे महत्त्वपूर्णां भूमिकां निर्वहति ।

शबनमः एतस्मिन् विषये किमर्थं प्रसन्नाः अस्ति यत् सा दूरदर्शनं न दृष्टवती ? एतादृश्यां परिस्थितौ भवन्तः किम् अकरिष्यन् ।

आगच्छन्तु अधुना निम्नलिखितैः उदाहरणैः सम्बद्ध-मूलभूत-नियमैः तालिकां पूरयन्तु। एतया तालिकया एतं विषयं पुनरावर्ततां यत् लोकतान्त्रिक-समाजेषु संविधानम् एतावतीं महत्त्वपूर्णां भूमिकां किमर्थं निर्वहति --

उदाहरणम्	मूलभूतनियमाः
नेपाले लोकतन्त्रस्य कृते विहितस्य आन्दोलनस्य साफल्य-अनन्तरं तत्रत्याः जनाः एकं नूतनं संविधानं सज्जीकुर्वन्तः सन्ति।	एते तादृशाः आदर्शाः सन्ति यैः ज्ञायते यत् वयं कीदृश्यां शासनव्यवस्थायां वासं कर्तुम् इच्छामः।
सुरेशः स्व-सहपाठिनम् अनिलं निष्कारणं तुदति।	
बालिकाः कण्डोल-कन्दुक-क्रीडां क्रीडितुम् अवसरं न प्राप्नुवन्ति यतो हि तासां कक्षायां बालकानां सङ्ख्या अधिका वर्तते।	
शबनम-महोदया दूरदर्शनं परित्यज्य स्वकीयानाम् अध्यायानां पुनरावर्तनस्य निर्णयं कृतवती।	

आगच्छन्तु अधुना भारतीयसंविधानस्य केषाञ्चित् मुख्य-आयामानाम् अध्ययनं कुर्मः एतत् तथ्यं च अवगच्छामः यत् उपर्युक्तबिन्दवः केषाञ्चित् विशिष्ट-आदर्शानां नियमानां च रूपं केन प्रकारेण गृह्णन्ति।

भारतीयसंविधानम् ; मुख्यलक्षणम्

संविधान-सभायाः सदस्यानां मध्ये एकतायाः काचित् दृढा भावना आसीत्। भावि-संविधानस्य प्रत्येकस्मिन् प्रावधाने बहुचर्चा जाता अपि च सर्वे जनाः सहमत्या विकासे गभीराः आसन्। उपर्युक्तस्य चित्रस्य मध्ये सरदार-पटेलः दृश्यते यः संविधानसभायाः एकः महत्त्वपूर्णः सदस्यः आसीत्।

विंशत्यां शताब्द्याम् आगतायां सत्यां भारतीय-राष्ट्रिय-आन्दोलनम् अनेक-दशक-पुरातनं जातम् आसीत्। स्वतन्त्रा-सङ्घर्ष-काले राष्ट्रवादिनः एतस्मिन् विषये बहुविचारं कृतवन्तः आसन् यत् स्वतन्त्रभारतेन कीदृशं भवितव्यम्। ब्रिटिश-शासनान्तर्गतं ते यान् नियमान् पालयितुं बाध्याः आसन् तान् नियमान् ते स्वयं न रचितवन्तः आसन्। औपनिवेशिक-राज्यस्य दीर्घतरेण अत्याचारि-शासनेन भारतीयानां पुरतः एतावत् तु स्पष्टीकृतम् आसीत् यत् स्वतन्त्रभारतम् एकः लोकतान्त्रिक-देशः स्यात् इति ।तस्मिन् प्रत्येकं नागरिकः समान-भावनया द्रक्ष्यते अपि च सर्वकारे सर्वेषां सहभागिता भविष्यति। तदनन्तरम् इदं निश्चेतव्यम् आसीत् यत् भारते लोकतान्त्रिकसर्वकारस्य स्थापनं कथं स्यात् तस्य कार्यकरणस्य नियमः कः भवेत्। इदं कार्यं कस्यचित् एकस्य मनुष्यस्य अधीनं न आसीत्। एतस्मिन् प्रायशः ३०० जनैः योगदानं कृतम् यत् १९४६ तमे वर्षे स्थापित-संविधान-सभायाः सदस्याः आसन्। भाविसंविधानस्य निर्माणार्थम् अग्रिमं वर्षत्रयं यावत् संविधानसभायाः उपवेशनानि जातानि।

संविधानसभायाः एतेषां सदस्यानां पुरतः एकं बृहद् दायित्वम् आसीत्। अस्माकं देशस्य अनेके समुदायाः आसन्। तेषां न तु भाषा समाना आसीत्, न धर्मः एकः आसीत् संस्कृतिः अपि समाना न आसीत्। अपि च यदा संविधानं लिख्यते स्म, तदा अस्माकं देशः महता आन्दोलनेन आन्दोलितम् आसीत्। भारतस्य पाकिस्तानस्य च विभाजनं प्रायः निश्चितम् आसीत्। कानिचन लघुराज्यानि एतत् निर्णयं न स्वीकुर्वन्ति स्म यत् तेषां भविष्यं किं भविष्यति, तानि कुत्र गमिष्यन्ति। जनतायाः सामाजिकी आर्थिकी च स्थितिः भयानकी आसीत्। संविधान-सभायाः सदस्यानां पुरतः एते सर्वे विषयाः आसन्। परन्तु ते एतत् ऐतिहासिक-दायित्वस्य वीरतया निर्वहणं कृतवन्तः अपि च ते देशस्य कृते एकम् एतादृशं कल्पनाशीलम् अभिलेखं दत्तवन्तः यस्मिन् राष्ट्रिय-एकतायाः संरक्षणेन सह विविधतां प्रति दृढ-सम्मानम् अपि दृश्यते। ते यम् अभिलेखं सज्जीकृतवन्तः तस्मिन् सामाजिकानाम् आर्थिकानां परिष्कार-माध्यमेन निर्धनतायाः उन्मूलनम् अपि च जन-प्रतिनिधीनां चयने जनतायाः महत्त्वपूर्ण-भूमिकायाम् आधिक्येन बलाघातं कृतवन्तः।

अग्रिमेषु भागेषु भारतीयसंविधानस्य केषाञ्चित् मुख्य-आयामानाम् उल्लेखः कृतः। एतान् विषयान् पठन्तः भवन्तः विविधता-एकता-सामाजिक-आर्थिक-सुधार-विषयान् जन-प्रतिनिधित्व-सम्बन्धिताः उपर्युक्तचिन्ताः च नैरन्तर्येण ध्यायन्तु याभिः चिन्ताभिः एतेषाम् अभिलेखानां (दस्तावेज) लेखकाः सङ्घर्षरताः आसन्। एतं विषयम् अवगन्तुं प्रयासं कुर्वन्तु यत् ते स्वतन्त्रभारतस्य शक्तिशालि-लोकतान्त्रिक-समाज-निर्माणस्य यत् एकम् उद्देश्यम् आसीत् तस्य उद्देश्यस्य पूर्त्या सह एतासां चिन्तानां कथं समाधानं कृतम्।

१.संघवाद (federalism) – एतस्य अभिप्रायः वर्तते यत् देशे एकाधिक-सर्वकाराणां सत्ता। अस्माकं देशे राज्यस्तरे अपि सर्वकाराः सन्ति केन्द्रस्तरे च अपि। पञ्चायतीय-राज-व्यवस्था शासनस्य तृतीयः स्तरः अस्ति यस्मिन् विषये भवन्तः षष्ठ-कक्षायां पठितवन्तः। सप्तमकक्षायाः पुस्तके भवन्तः राज्यसर्वकारस्य गतिविधीन् दृष्टवन्तः। अस्मिन् वर्षे वयं केन्द्रसर्वकारस्य विषये आधिक्येन पठिष्यामः।

भारते एतावतां समुदायानाम् उपस्थितेः साक्षात् अभिप्रायः अयम् अस्ति यत् अत्र शासनस्य एका एतादृशी व्यवस्था विकसिता करणीया भविष्यति यस्यां राजधानी-देहल्याम् उपविष्टाः केचन जनाः एव सम्पूर्णस्य देशस्य निर्णयान् न स्वीकुर्युः। अतः प्रान्तीयस्तरे अपि सर्वकारस्य व्यवस्था कृता यस्मात् क्षेत्रदृष्ट्या पृथक्-निर्णयान् अपि स्वीकर्तुं सारल्यं भवेत्। भारतस्य सर्वेषां राज्यानां पार्श्वे केषुचित् विषयेषु निर्णयकरणस्य स्वायत्ताधिकारः अस्ति। राष्ट्रिय-महत्त्वस्य प्रश्नेषु सर्वैः राज्यैः केन्द्रसर्वकारेण निर्मितानां नियमानां पालनम् अवश्यम् एव करणीयम्। कार्यक्षेत्रस्य स्पष्टतार्थं संविधाने काश्चन सूचयः प्रदत्ताः सन्ति यासु उक्तम् अस्ति यत् कीदृशस्य स्तरस्य सर्वकारः केषु विषयेषु नियमानां निर्माणं कर्तुं शक्नोति। अनेन सह एव संविधानम् इदम् अपि निश्चयीकरोति यत् प्रत्येकं स्तरस्य सर्वकारः

बाबा-साहेब- डॉक्टर- अम्बेडकरः भारतीय-संविधानस्य जनकः इति उच्यते। डॉक्टर-अम्बेडकरस्य विश्वासः आसीत् यत् संविधान-सभायां तेषां सहभागितया अनुसूचित-जातीनां कृते संविधानस्य प्रारूपे काचित् सुरक्षात्मिका व्यवस्था मिलिता अस्ति परन्तु तैः इदम् अपि उक्तम् आसीत् यत् यद्यपि अधिनियमाः जाताः सन्ति, परन्तु इदानीम् अपि अनुसूचित-जनजातयः चिन्तामुक्ताः न भवितुं शक्नुवन्ति। यतो हि एतेषाम् अधिनियमानां सञ्चालनं सवर्णहिन्दूनाम् अधिकारिणाम् एव हस्ते विद्यते अतः तैः अनुसूचितजातिभ्यः आवाहनं कृतं यत् ते सर्वकारम् अतिरिच्य लोकसेवासु अपि अधिकाधिकं भागं गृह्णीयुः।

स्वकार्याणां कृते धनस्य व्यवस्थां कुतः कर्तुं शक्नोति । सङ्घवादस्य अन्तर्गतं राज्यानि केवलं केन्द्रीय-सर्वकारस्य प्रतिनिधयः न भवन्ति । ते अपि संविधानतः एव स्वशक्तिम् अधिकारान् च प्राप्नुवन्ति। भारतस्य जनाः एतेषां सर्वेषां स्तराणां सर्वकारैः निर्मित-अधिनियमानां नीतीनां च अन्तर्गताः भवन्ति ।

२ संसदीय-शासनपद्धतिः – सर्वकारस्य सर्वेषु स्तरेषु प्रतिनिधीनां चयनं जनाः स्वयं कुर्वन्ति । सप्तमकक्षायाः पुस्तकस्य आदौ कान्तायाः कथा प्रदत्ता आसीत् या मतदानस्य प्रयोगं कर्तुं पङ्क्तौ स्थिता वर्तते । भारतस्य संविधानं स्वस्य सर्वेषां वयस्कानां नागराणां कृते मतदानस्य अधिकारं ददाति । संविधान-सभायाः सदस्याः यदा संविधानस्य रचनां कुर्वन्तः आसन् । तदा ते अनुभूतवन्तः यत् स्वतन्त्रता-सङ्घर्षेण भारतीय-जनता वयस्क-मताधिकारस्य प्रयोगं कर्तुं योग्या कृता । तेषां विश्वासः आसीत् यत् एतेन न केवलं लोकतान्त्रिक-चिन्तनस्य विधौ प्रोत्साहनं प्राप्स्यति अपितु जाति-वर्गयोः अपि च महिलापुरुषयोः आधारेण यः भेदः क्रियते तदाधारितं निम्न-उच्च-भेद-भावानां शृङ्खलाः अपि त्रोटयितुं शक्यन्ते । सार्वभौमिकस्य मताधिकारस्य अर्थः अस्ति यत् स्व-प्रतिनिधीनां चयने देशस्य सर्वेषां जनानां प्रत्यक्षतः भूमिका वर्तते । एतदतिरिच्य प्रत्येकं व्यक्तिः निर्वाचनप्रक्रियायां स्वयं भागम् अपि ग्रहीतुं शक्नोति कामं तस्य सामाजिकी पृष्ठभूमिः कीदृशी अपि स्यात् । एते प्रतिनिधयः जनतां प्रति उत्तरदायित्वयुक्ताः भवन्ति । लोकतान्त्रिक-कार्य-पद्धतौ प्रतिनिधित्वं किमर्थं महत्त्वपूर्णं भवति, एतस्मिन् विषये भवन्तः अस्य पुस्तकस्य द्वितीये एकाङ्के विस्तरेण पठिष्यन्ति ।

यदा संविधानसभा सार्वभौमिकस्य वयस्क-मताधिकारस्य सिद्धान्तं स्वीकृतिं दत्तवती तदा सभायाः सदस्य ए.के, अय्यकरः उक्तवान् आसीत् यत् अयं निर्णयः "सामान्यजनस्य लोकतन्त्रिक-शासनस्य सफलतायां दृढास्थायाः द्योतकम् अस्मिन् विश्वासे च आधारितं यत् वयस्क-मताधिकारस्य माध्यमेन लोकतान्त्रिक-सर्वकारस्य स्थापना ज्ञानोदयं करिष्यति । इयं सामान्य-जनस्य कुशलक्षेमं जीवनस्तरं सुविधाम् उत्तमां जीवनस्थितिं च प्रोत्साहयिष्यति ।'

आस्टिन्,जी.१९६६, दि इंडियन कान्स्टीट्यूशन : कार्नरस्टोन आफ ए नेशल, क्लेरेंडन प्रेस, आक्सफोर्ड ।

अधः प्रदत्ते चित्रे दर्शितम् अस्ति यत् जनाः स्व-मताधिकारस्य प्रयोगं कर्तुं पङ्क्तिबद्धाः सन्ति ।

३. शक्तीनां विभाजनम् - संविधानस्य अनुसारं सर्वकारस्य त्रीणि अङ्गानि सन्ति – विधायिका, कार्यपालिका न्यायपालिका च । विधायिकायाम् अस्माकं निर्वाचितप्रतिनिधयः भवन्ति । कार्यपालिका एतादृशानां जनानां समूहः अस्ति यः अधिनियमानां पालनं कारयति अपि च प्रशासनस्य कार्याणि पश्यति । न्यायालयानां व्यवस्था न्यायपालिका इति उच्यते । यस्याः विषये भवन्तः अस्य पुस्तकस्य तृतीये एकाङ्के (इकाई इति) पठिष्यन्ति । सर्वकारस्य कयाचिद् अपि शाखया सत्तायाः दुरुपयोगं वारयितुं प्रावधानं कृतम् अस्ति यत् एतेषां सर्वेषाम् अङ्गानां शक्तयः परस्परं भिन्नाः भविष्यन्ति । शक्तीनाम् एतस्य विभाजनस्य आधारेण प्रत्येकम् अङ्गम् अपरस्मिन् अङ्गे अङ्कुशं स्थापयति अपि च अनेन प्रकारेण त्रीणि अङ्गानि अन्तरा सत्तायाः सन्तोलनं निरन्तरं तिष्ठति ।

अस्मिन् अध्याये "राज्यम्" इति शब्दस्य प्रायः प्रयोगः कृतः ।
एतत् अवधातव्यम्, एतस्य अभिप्रायः राज्य-सर्वकारेभ्यः नास्ति ।
यदा वयं राज्यम् इति शब्दस्य प्रयोगं कुर्मः तदा वयं तत् "सर्वकारः" इत्यस्मात् भिन्ने अर्थे स्वीकुर्मः । "सर्वकारस्य दायित्वानि भवन्ति अधिनियमानां निर्माणम् अपि च तेषां पालनम् । परन्तु निर्वाचन-प्रक्रियया सर्वकारस्य परिवर्तनं भवितुं शक्नोति । परन्तु राज्यम् एका एतादृशी राजनैतिकसंस्था भवति या निश्चित-भूभाग-वासि-संप्रभू-जनानां प्रतिनिधित्वं करोति ।
अस्य आधारेण वयं भारतीय-राज्यस्य नेपालि-राज्यादीनां वार्तां कर्तुं शक्नुमः । भारतीय-राज्यस्य एकः लोकतान्त्रिक-सर्वकारः अस्ति । सर्वकारः अथवा कार्यपालिका राज्यस्य एकम् अङ्गं भवति । राज्येन अभिप्रायः वर्तते यत् एतत् सर्वकारतः अधिकं व्यापकं भवति । तत् सर्वकारस्य स्थाने न प्रयोक्तुं शक्नुमः ।

संविधानसभायाः सदस्याः भयभीताः आसन् यत् कुत्रचित् कार्यपालिका एतावती शक्तिमती न भवेत् यत् विधायिकां प्रति स्वस्य दायित्वानाम् एव उपेक्षां कुर्यात् । एताम् आशङ्कां दृष्टौ निधाय संविधानसभा एतादृशानि बहूनि प्रावधाननि संविधाने समायोजितवती येषां माध्यमेन शासनस्य कार्यकारिशाखया क्रियमाणानि कार्याणि सीमितानि नियन्त्रितानि च कर्तुं ते समर्थाः भवेयुः ।

4. मौलिकाधिकारः – मौलिक-अधिकारवान् खण्डः भारतीयसंविधानस्य "अन्तरात्मा" अपि उच्यते । औपनिवेशिक-शासनेन राष्ट्रवादिनां मस्तिष्केषु राज्यं प्रति सन्देहस्य भावः उत्पादितः आसीत् अतः राष्ट्रावादिनः इच्छन्ति स्म यत् स्वतन्त्रभारते राज्यस्य सत्तायाः दुरुपयोगात् रक्षार्थं केचन लिखिताधिकाराः स्युः । परिणामतः मौलिकाधिकाराः देशस्य सर्वान् नागरिकान् राज्यसत्तायाः स्वेच्छानुसारं अपि च निरङ्कुशतया क्रियमाणेभ्यः प्रयोगेभ्यः रक्षन्ति । इत्थं संविधानं राज्यस्य अपि च अन्येषां जनानां समक्षं व्यक्तीनाम् अधिकाराणां रक्षणं करोति ।
विभिन्नाः अल्प-सङ्ख्यक-समुदायाः अपि इच्छन्ति स्म यत् संविधाने तादृशानाम् अधिकाराणां समावेशः भवेत् ये तेषां समूहस्य रक्षणं कुर्युः । परिणामतः

स्वशिक्षकेण सार्धं चर्चां कुर्वन्तु यत् राज्यं सर्वकारं चान्तरा कः भेदः भवति ।

भारतीयसंविधाने उल्लिखितेषु मौलिकाधिकारेषु केचन अधिकाराः --

1. समानतायाः अधिकारः

अधिनियमस्य दृष्ट्या सर्वे जनाः समानाः सन्ति । एतस्य अभिप्रायः अस्ति यत् सर्वेषां जनानां कृते देशस्य अधिनियमः समानरूपेण सुरक्षां प्रदास्यति। अस्मिन् अधिकारे इदम् अपि उक्तम् अस्ति यत् –धर्मस्य जातेः लिङ्गस्य वा आधारेण, केनापि नागरिकेण सह भेदभावः न कर्तुं शक्यते। क्रीडाक्षेत्रे उपाहारगृहे आपणादिषु सार्वजनिकस्थानेषु सर्वेषां कृते समानरूपेण प्राप्तेः सुविधाग्रहणस्य वा अधिकारः भविष्यति। वृत्तिप्राप्तेः विषये राज्यं केनापि सह भेदभावं न कर्तुं शक्नोति। परन्तु एतस्य केचन अपवादाः सन्ति येषां विषये वयम् अस्मिन् एव पुस्तके अग्रे पठिष्यामः। स्पृश्यताप्रथायाः अपि उन्मूलनं कृतम् अस्ति।

2.स्वतन्त्रतायाः अधिकारः

अस्य अधिकारस्य अन्तर्गतम् अभिव्यक्तेः भाषणस्य च स्वतन्त्रता, सभा अथवा सङ्घटनकरणस्य स्वतन्त्रता , देशस्य कस्मिंश्चित् अपि भूभागे गमनागमनस्य अपि च वासस्य तथा च जीवननिर्वाहार्थं कस्यचिद् अपि करणीयकार्यस्य अधिकारः सम्मलितः अस्ति।

3.शोषणस्य विरुद्धः अधिकारः

संविधाने उक्तम् अस्ति यत् मानवव्यापारः, बलात् श्रमः, चतुर्दश-वर्षोन-वयसः बालकस्य च पारिश्रमिके नियोजनं अपराधः अस्ति।

४. धार्मिकस्वतन्त्रतायाः अधिकारः

सर्वेषां नागरिकाणां कृते पूर्णरूपेण धार्मिक-स्वतन्त्रता प्रदत्ता अस्ति । प्रत्येकं मानवं स्वेच्छानुसारं धर्मपालनस्य तस्य प्रचारस्य प्रसारस्य च अधिकारः अस्ति।

५.सांस्कृतिकः शैक्षणिकः च अधिकारः

संविधाने उक्तम् अस्ति यत् धार्मिकाधारेण अथवा भाषाधारेण सर्वे अल्पसङ्ख्यकसमुदायाः स्वसंस्कृतेः रक्षार्थं विकासार्थं च स्व-स्व-शैक्षणिकसंस्थानानि उद्घाटयितुं शक्नुवन्ति।

६. संवैधानिकस्य उपचारस्य अधिकारः

यदि कोऽपि नागरिकः अनुभवति यत् राज्येन तस्य कस्यचित् मौलिकस्य अधिकारस्य उल्लङ्घनं कृतम् तदा एतस्य अधिकारस्य साहाय्येन सः न्यायालयं गन्तुं शक्नोति।

बहुसङ्ख्यकेभ्यः अल्पसङ्ख्यकानाम् अधिकाराणां रक्षायाः आश्वासनम् अपि संविधाने प्रदत्तम् अस्ति । एतेषां मौलिकाधिकाराणां विषये डॉ. अम्बेडकरः उक्तवान् आसीत् यत् एतेषाम् अधिकाराणां द्विविधम् उद्देश्यम् अस्ति – प्रथमः , प्रत्येकं नागरिकः एतादृश्यां स्थितौ भवेत् यत् सः तेषाम् अधिकाराणां प्रयोगाय अधिकारी स्यात् । अपरः, एते अधिकाराः प्रत्येकं तस्याः सत्तायाः संस्थायाः च कृते बाध्यकारिणः भवेयुः यस्यै अधिनियमानां निर्माणस्य अधिकारः प्रदत्तः अस्ति।

मौलिक-अधिकारान् अतिरिच्य अस्माकं संविधाने एकः खण्डः नीतिनिर्देशक-तत्त्वानाम् अपि अस्ति। संविधानसभायाः सदस्यैः अयं खण्डः एतदर्थं योजितः आसीत् यस्मात् इतोऽपि सामाजिकान् आर्थिकान् च परिष्कारान् आनेतुं समर्थाः भवेयुः। ते इच्छन्ति स्म यत् स्वतन्त्रं भारतीय-राज्यं जनतायाः निर्धनता-उन्मूलकान् अधिनियमान् नीतीः च रचयेत्। अपि च एतान् सिद्धान्तान् मार्गदर्शकरूपेण सदा आत्मनः पुरतः स्थापयेत्।

निम्नलिखितासु परिस्थितिषु केषां मौलिक-अधिकाराणां उल्लङ्घनं भवति --

- यदि त्रयोदश-वर्ष-देशीयः एकः बालकः वस्त्रकटस्य उद्योगशालायां श्रमं करोति।
- यदि कस्यचित् राज्यस्य कोऽपि नेता अन्येषां राज्यानां जनान् स्वराज्ये कार्यकरणात् वारयति।
- यदि कस्मैचित् जनसमूहाय राजस्थाने तेलगु-माध्यमस्य विद्यालयस्य उद्घाटनस्य अनुमतिः न दीयते।
- यदि सर्वकारः सशस्त्र-बलेषु कार्यरताय कस्मैचिद् अपि अधिकारिणे एतस्मात् कारणात् अनुमतिं न ददाति यतोहि सा अधिकारिणी महिला वर्तते।

5 . धर्मनिरपेक्षता – धर्मनिरपेक्ष-राज्यं तद् भवति यस्मिन् राज्यम् अधिकृतरूपेण कस्मैचिद् अपि धर्माय राजकीयधर्म-रूपेण प्रोत्साहनं न ददाति । अस्मिन् विषये वयम् अग्रिमे अध्याये विस्तरेण पठिष्यामः ।

अधुना भवन्तः एतं विषयम् अवगन्तुम् आरब्धवन्तः स्युः यत् कदाचित् देशस्य इतिहासः इदं निश्चिनोति यत् देशस्य संविधानं कीदृशं भविष्यति । संविधानं तान् आदर्शान् निर्धारयितुं महत्त्वपूर्णां भूमिकां निर्वहति, यान् वयं स्वदेश-माध्यमेन स्व-प्रतिनिधि-माध्यमेन च साकारीकर्तुम् इच्छामः । यथा पाद-कन्दुक-क्रीडायां नियमे परिवर्तिते सति क्रीडा परिवर्तिता भवति तथैव येषां देशानां संविधाने महान्ति परिवर्तनानि जायन्ते तत्र देशस्य आधारभूतं स्वरूपम् अपि परिवर्तितं भवति । वयं नेपालदेशे इदं दृष्टवन्तः आस्म । तत्र लोक-तान्त्रिक-समाज-निर्माणस्य आवश्यकतया सह एव एकस्य नूतनस्य संविधानस्य अपि आवश्यकता जायते ।

उपरि अस्माभिः भारतीय-संविधानस्य येषाम् आयामानां विचारः कृतः ते बहुधा अतिजटिलाः दृश्यन्ते, तान् अवगन्तुं च काठिन्यम् अनुभूयते । परन्तु भवन्तः अधुना अस्मिन् विषये अधिकां चिन्तां न कुर्वन्तु । एतस्य पुस्तकस्य अवशिष्टेषु अध्यायेषु अग्रिमासु कक्षासु च भारतीय-संविधानस्य एतेषां सर्वेषां पक्षाणां विषये भवन्तः नैरन्तर्येण ज्ञास्यन्ति । मूलरूपेण तेषाम् अर्थं ज्ञास्यन्ति ।

संविधाने मूलकर्तव्यानाम् अपि उल्लेखः कृतः अस्ति । स्वशिक्षकस्य सहायतया जानन्तु यत् एतानि कर्त्तव्यानि कानि कानि सन्ति अपि च लोकतन्त्रे नागरिकैः एतेषां कर्त्तव्यानां पालनं किमर्थम् आवश्यकम् अस्ति ?

एकादशेषु मौलिक-कर्तव्येषु प्रत्येकेन सम्बन्धितानि रेखाचित्राणि चित्राणि च निर्मान्तु अथवा तेषु कविताः गीतानि च लिखन्तु कक्षायां च तेषु चर्चयन्तु ।





उपर्युक्तचित्रेषु जनवरीमासस्य २४ तिथौ १९५० तमे वर्षे संविधानसभायाः विभिन्नसदस्याः स्वस्य अन्तिमे उपवेशने संविधानस्य एकस्यां प्रतौ हस्ताक्षराणि कुर्वन्तः सन्ति । आद्ये चित्रे प्रधानमन्त्रि-जवाहर-लाल-नेहरू हस्ताक्षरं करोति ।

द्वितीये चित्रे संविधानसभायाः अध्यक्षः डॉ.राजेन्द्रप्रसादः अस्ति । सर्वतः अधस्तने चित्रे दक्षिणतः वामक्रमे ये जनाः दृश्यन्ते – ते श्रीजयरामदास-दौलतरामः, खाद्य-कृषिमन्त्री, राजकुमारी अमृतकौरः, स्वास्थ्यमन्त्रिणी, डॉ.जॉन-मथाई, वित्तमन्त्री, सरदार-वल्लभ-भाई-पटेलः, उपप्रधानमन्त्री तेषां च पृष्ठभागे श्रीजगजीवनरामः, श्रममन्त्री इत्येते स्थिताः सन्ति ।

अभ्यासः

१. कस्य लोकतान्त्रिक-देशस्य कृते संविधानस्य आवश्यकता भवति ?

२. अधः प्रदत्तयोः द्वयोः अभिलेखयोः खण्डान् पश्यन्तु । प्रथमः भागः १९९०तमस्य वर्षस्य नेपालस्य संविधानस्य अस्ति । अपरः भागः नेपालस्य सद्योजातात् अन्तरिम-संविधानात् सङ्कलितः अस्ति ।

१९९० तमस्य वर्षस्य नेपालस्य संविधानम् **सप्तमः भागः - कार्यपालिका**	**२००७ तमस्य वर्षस्य अन्तरिमं संविधानम्** **पञ्चमः भागः – कार्यपालिका**
अनुच्छेद ३५: कार्यकारिण्यः शक्तयः नेपालाधिराज्यस्य कार्यकारिण्यः शक्तयः महामहिम-नरेशस्य अधीनाः, मन्त्रिपरिषदि निहिताः च भविष्यन्ति ।	अनुच्छेद ३७: कार्यकारिण्यः शक्तयः नेपालस्य कार्यकारिण्यः शक्तयः मन्त्रिपरिषदि निहिताः भविष्यन्ति ।

नेपालस्य एतयोः द्वयोः संविधानयोः "कार्यकारीशक्तीनां" उपयोगे किम् अन्तरं दृश्यते ? एतत् तथ्यं मनसि निधाय भवन्तः किम् अनुभवन्ति यत् नेपालस्य कृते एकस्य नूतनस्य संविधानस्य आवश्यकता वर्तते ? कथम् ?

३. यदि निर्वाचितानां प्रतिनिधीनां शक्तिषु कोऽपि अङ्कुशः न स्यात् तदा किं स्यात् ?

४. निम्नलिखितासु स्थितिषु अल्पसङ्ख्यकाः के सन्ति ? एतासु स्थितिषु अल्पसङ्ख्यकानां विचाराणां सम्मानं किमर्थं महत्त्वपूर्णम् अस्ति । एतस्य एकम् एकं कारणं ज्ञापयतु ?

(क) एकस्मिन् विद्यालये ३० शिक्षकाः सन्ति तेषु विंशतिः पुरुषाः सन्ति ।

(ख) एकस्मिन् नगरे ५ प्रतिशतं जनाः बौद्धधर्मावलम्बिनः सन्ति ।

(ग) एकस्य यन्त्रागारस्य भोजनालये ८० प्रतिशतं कर्मचारिणः शाकाहारिणः सन्ति ।

(घ) ५० विद्यार्थिनां कक्षायां ४० विद्यार्थिनः सम्पन्नपरिवाराणां सन्ति ।

५. अधः प्रदत्ते वामभागे भारतीयसंविधानस्य मुख्यानाम् आयामानां सूची प्रदत्ता अस्ति । अपरस्मिन् भागे प्रत्येकम् आयामस्य पुरतः द्वाभ्यां वाक्याभ्यां लिखन्तु यत् भवतां दृष्ट्या अयम् आयामः किमर्थं महत्त्वपूर्णः अस्ति ।

मुख्यः आयामः	**महत्त्वम्**
सङ्घवादः शक्तीनाम् आवण्टनम् मौलिकाधिकारः संसदीय-शासनपद्धतिः	

६. अस्मिन् मानचित्रे निम्नलिखितेषु देशेषु वर्णाः पूर्यन्ताम् –

(क) भारतं रक्तवर्णेन पूरयन्तु।

(ख) नेपालं हरितवर्णेन पूरयन्तु।

(ग) बाङ्ग्लादेशं पीतवर्णेन पूरयन्तु।

आन्ध्रप्रदेश-राज्यस्य पुनर्घटनानन्तरं .जूनमासस्य २तिथौ २०१४ तमे वर्षे तेलङ्गाणा भारतस्य २९ तमं राज्यं जातम्।

शब्द-सङ्कलनम्

स्वेच्छाचारिता – यदा सर्वं कस्यचित् व्यक्तिगतस्य निर्णयस्य माध्यमेन अथवा अभिरुच्याः अनुसारम् अनभिरुच्या वा प्रवर्तमानं भवति तदा तां स्थितिं स्वेच्छाचारिता इति कथयामः। यत्र नियमाः निश्चिताः न भवेयुः यत्र च निर्णयानां कोऽपि आधारः न स्यात् सा एव स्वेच्छाचारिता इति उच्यते।

आदर्शः – यदा किमपि लक्ष्यं कश्चित् सिद्धान्तः वा स्वस्य सर्वोच्चशुद्धे अथवा सर्वश्रेष्ठरूपे भवति तदा तम् आदर्शरूपम् इति कथयामः।

भारतीय-राष्ट्रीयान्दोलनम् – भारतीय-राष्ट्रियस्य आन्दोलनस्य उदयः एकोनविंशत्यां शताब्द्याम् अभूत्। अस्मिन् आन्दोलने सहस्राधिकस्त्रीपुरुषाः आङ्ग्लशासनेन सह युद्धं कर्तुम् एकत्रीभूताः आसन्। इदम् आन्दोलनं १९४७ तमे वर्षे भारतस्य स्वतन्त्रतायां परिवर्तितम्। अस्य वर्षस्य एव इतिहासस्य पुस्तके एतत् आन्दोलनं भवन्तः समीचीनतया ज्ञास्यन्ति।

राज्यव्यवस्था (Polity) – एतस्य आशयः केनचित् तादृशेन समाजेन वर्तते यत् यस्य राजनीतिक-संरचना व्यवस्थिता अस्ति। भारतं लोकतान्त्रिक-व्यवस्था-सम्पन्नम् अस्ति।

संप्रभुः – अस्य अध्यायस्य सन्दर्भे स्वतन्त्रा जनता संप्रभुः इति उक्ता अस्ति।

मानव-वाणिज्यम् - राष्ट्रियसीम्नां पारे अपरे भागे वा विभिन्नवस्तूनां नियमविरुद्धं क्रयणं विक्रयणं वा अवैध-वाणिज्यम् इति कथ्यते। अस्मिन् अध्याये येषां मौलिक-अधिकाराणां चर्चा वर्तते, तस्मिन् सन्दर्भे अवैधवाणिज्यस्य अभिप्रायः स्त्रीणां शिशूनां च अवैधरूपेण क्रयणं विक्रयणं च वर्तते। सः एव अवैध-मानव-व्यापारः इति उच्यते।

निरङ्कुशता – एतस्य अभिप्रायः अस्ति - सत्तायाः अथवा अधिकाराणां क्रूरतया अन्यायपूर्णः च प्रयोगः।

॥इति प्रथमोऽध्यायः॥

अध्यायः - 2

धर्मनिरपेक्षतायाः अवगमनम्

कल्पनां कुर्वन्तु यत् भवन्तः हिन्दवः अथवा मुस्लिमाः सन्ति अपि च अमेरिकायाः कस्मिंश्चित् भागे निवसन्ति यत्र ईसाई-धर्मान्धाः स्वधर्मे दृढ-विश्वासवन्तः सन्ति । चिन्तयतु अमेरिकायाः स्थायि-निवासिनि सति अपि कश्चित् भवते भाटकेन प्रकोष्ठं गृहं वा न दातुम् इच्छति । तदा भवान् कथम् अनुभविष्यति ? किं भवान् क्रोधं न करिष्यति ? यदि भवान् एतस्य भेदभावस्य विरुद्धम् आपत्तिं कुर्यात् अपि च एतस्याः प्रत्युत्तरे भवन्तं कश्चित् ब्रूयात् यत् एषः देशः भवतः नास्ति, भवान् भारतं प्रति गच्छतु, तदा भवान् कथम् अनुभविष्यति? किं भवान् कष्टं न अनुभविष्यति ? भवतः एषः कोपः रूपद्वयं ग्रहीतुं शक्नोति – एकस्तु भवितुं शक्नोति भवान् प्रतिक्रियायाम् इदं कथयेत् यत् यत्र हिन्दूनां मुस्लिमानां च सङ्ख्या अधिका वर्तते तत्र ईसाई-जनैः सह अपि एवं व्यवहारः स्यात् । इयं प्रतिकार-भावना वर्तते । अथवा भवान् एतद् मतं धर्तुं शक्नोति यत् सर्वे न्यायं प्राप्नुयुः । अस्य विचारस्य आधारेण सङ्घर्षस्य मार्गं चित्वा एतस्य विचारस्य कृते स्वमतं प्रकटीकर्तुम् इच्छति, यत् धर्मे आस्थायाः आधारेण केनापि सह भेदभावः न कर्तव्यः । एषः विचारः एतस्यां मान्यातायाम् आश्रितः वर्तते यत् धर्म-सम्बन्धितं कस्य अपि प्रकारकस्य वर्चस्वं नष्टं स्यात् । अयम् एव धर्मनिरपेक्षतायाः मूलः मन्त्रः अस्ति । अस्मिन् अध्याये वयं इमाम् एव चर्चां करिष्यामः यत् भारतीये सन्दर्भे एतस्याः चर्चायाः कः अभिप्रायः वर्तते ।

इतिहासे धर्मस्य आधारेण भेदभावस्य, निष्कासनस्य अत्याचारस्य च अनेकानि उदाहरणानि उपलभ्यन्ते। प्रायशः भवद्भिः पठितं स्यात् यत् हिटलरेण जर्मन्यां यहूदीनाम् उपरि कीदृशानि अत्याचाराणि कृतानि। तत्र लक्षशः जनाः केवलं धर्मस्य आधारेण हताः। परन्तु इदानीं यहूदीधर्मस्य अनुयायिनाम् इजराइल-देशे अपि यहूदयः मुस्लिमैः ईसायीजनैः च अल्पसङ्ख्यकैः सह अमानवीयं व्यवहारं कुर्वन्तः सन्ति। सउदी-अरब-देशे मुस्लिमेभ्यः अतिरिक्तान् जनान् मन्दिरनिर्माणस्य गिरजागृहनिर्माणस्य वा अनुमतिः नास्ति अपि च मुस्लिमेभ्यः इतरजनाः पूजार्चनाभ्यां कृते कस्मिंश्चित् सार्वजनिके स्थाने एकत्रिताः अपि न भवितुं शक्नुवन्ति।

एतेषु सर्वेषु उदाहरणेषु एकस्य धर्मस्य जनाः अन्य-धार्मिक-समुदायानां जनैः सह भेदभावं कुर्वन्ति अथवा तेषाम् उत्पीडनं कुर्वन्ति। भेदभावस्य एतादृश्यः घटनाः तदा इतोऽपि वर्धन्ते यदा अन्येषां धर्माणां स्थाने राज्यं कस्मैचित् एकस्मै धर्माय अधिकृतां मान्यतां प्रददाति। स्पष्टम् अस्ति यत् कोऽपि मनुष्यः स्वधर्मस्य कारणात् न तु भेदभावेन ग्रस्तः भवितुं शक्नोति न तु स्वस्मिन् कस्यचित् अपरस्य धर्मस्य प्रभावं सोढुं शक्नोति। किं भारते राज्यं, धर्मम् आधारीकृत्य केनचित् नागरिकेण सह भेदभावं कर्तुं शक्नोति।

धर्मनिरपेक्षता का अस्ति ?

गतेषु अध्यायेषु भवद्भिः पठितं यत् भारतीये संविधाने मौलिकानाम् अधिकाराणां व्यवस्था कृता अस्ति। एते अधिकाराः न केवलं राज्यस्य सत्तायाः अस्मान् रक्षन्ति अपि तु बहुमतस्य निरङ्कुशतायाः अपि अस्माकं रक्षां कुर्वन्ति। भारतीयसंविधानं सर्वेषां कृते स्वधार्मिक-मान्यतानाम् अपि च पद्धतीनां पालनस्य समानरूपेण अवसरं ददाति। सर्वेषां कृते समान-धार्मिक-स्वतन्त्रतायाः एनं विचारं मनसि धारयन् भारतीयेन राज्येन धर्मस्य राज्य-शक्तेः अन्योऽन्यस्मात् पृथक् स्थापनस्य रणनीतिः अङ्गीकृता अस्ति। धर्मं राज्यात् पृथक् स्थापनस्य एषा अवधारणा एव धर्मनिरपेक्षता कथ्यते।

एतस्य अध्यास्य भूमिकाम् पुनः पठन्तु। भवन्तः एतत् कथम् अनुभवन्ति यत् प्रतिकारस्य भावना एतस्याः समस्यायाः निवृत्तेः समीचीनः मार्गः न भवितुं शक्नोति ? यदि सर्वे समूहाः अर्थात् विभिन्न-धर्मावलम्विनः प्रतिकार-भावनया वर्तिष्यन्ते तदा किं भविष्यति ?

तन्वी, अभिलाषा, स्नेहलः-५- बी., सृजन-विद्यालयः, देहली।

अस्मिन् अध्याये त्रीणि चित्राणि भवताम् एव समवयस्कैः विद्यार्थिभिः रचितानि सन्ति। ते धार्मिकसहिष्णुतायाः विषये चित्रनिर्माणार्थं कथिताः आसन्।

अनिताजैनः, ५, सृजन-विद्यालयः ,देहली।

धर्मस्य राज्यतः पृथक्करणं किमर्थं महत्त्वपूर्णम् अस्ति ?

यथा गत-भागे चर्चा कृता अस्ति, धर्मनिरपेक्षतायाः सर्वाधिकः महत्त्वपूर्णः पक्षः अस्ति यत् धर्मस्य राजसत्तातः पृथक्करणम् इति । एकस्मिन् लोकतान्त्रिके देशे इदम् अत्यावश्यकम् अस्ति । संसारस्य प्रायः सर्वेषु देशेषु बहुविधाः धर्मावलम्बिनः परस्परं निवसन्ति । स्पष्टम् अस्ति यत् प्रत्येकस्मिन् देशे कस्यचित् एकस्य धर्मस्य जनानां सङ्ख्या अधिका भवति । अधुना यदि येषां बहुमतम् अस्ति ते धर्मावलम्बिनः जनाः राज्यसत्तां प्राप्नुवन्ति तर्हि तेषां समूहः अन्यधर्मावलम्बिनां जनानां विरुद्धं भेदभावं कर्तुं शक्नोति अपि च तान् पीडयितुम् अस्याः सत्तायाः राज्यस्य च आर्थिक-संसाधनानाम् उपयोगं कर्तुं शक्नोति । बहुमतस्य अस्याः निरङ्कुशतायाः कारणात् धार्मिकाल्प-सङ्ख्यकैः सह भेदभावः भवितुं शक्नोति । तेषु बलप्रयोगः भवितुं शक्नोति । अथ एतद् एव न, बहुधा केचन जनाः तेषां हत्याम् अपि कुर्वन्ति । प्राप्त-बहुमत-जनाः यदि इच्छन्ति तर्हि ते अल्पसङ्ख्यकान् जनान् तदीय-धर्मानुसारं जीवनात् निरोद्धुं शक्नुवन्ति । धर्मस्य आधारेण कथञ्चित् अपि भेदभावकरणं तेषाम् अधिकाराणाम् उल्लङ्घनम् अस्ति यान् अधिकारान् कोऽपि लोकतान्त्रिकः समाजः स्वस्मै यथेष्ट-धर्मावलम्बिने प्रत्येकं नागरिकाय ददाति । परिणामतः बहुमतस्य निरङ्कुशता-कारणात् मौलिकाधिकाराणां हननं तत् मुख्यभूतं कारणम् अस्ति यस्मात् लोकतान्त्रिक-समाजेषु राज्यस्य धर्मस्य च पृथक्तया स्थापनं महत्वपूर्णम् इति उच्यते।

लोकतान्त्रिक-समाजेषु धर्मं राज्यात् पृथक्करणस्य एकं महत्त्वपूर्णं कारणम् इदम् अपि अस्ति यत् अस्माभिः जनानां धार्मिक-निर्वाचनस्य अधिकारस्य रक्षा करणीया । एतस्य अर्थः अस्ति यत् देशस्य प्रत्येकं मनुष्यः कम् अपि एकं धर्मं परित्यज्य द्वितीयं धर्मं पालयितुं शक्नोति अथवा सः धार्मिकाणाम् उपदेशानां भिन्नप्रकारेण व्याख्यां कर्तुं स्वतन्त्रः अस्ति । इदानीम् एतं विषयम् इतोऽपि सम्यक्-प्रकारेण ज्ञातुं अस्पृश्यता-प्रथायाः विषये विचारं कुर्मः । सम्भवतः भवद्भ्यः हिन्दूनां मध्ये प्रचलिता एषा प्रथा न रोचते। एतस्य अभिप्रायः अस्ति यत् भवन्तः एनां प्रथां परिवर्तितुं प्रयासम् अपि करिष्यन्ति । परन्तु राज्यस्य सत्ता तादृशानां हिन्दूनां हस्ते वर्तते ये अस्पृश्यतां समीचीनाम् इति कथयन्ति तदा किं भवन्तः सारल्येन एतां प्रथां परिवर्तितुं शक्ष्यन्ति ? यदि भवन्तः प्रभुत्वशालिनः धार्मिक-समुदायस्य सदस्याः सन्ति तदा अपि भवन्तः स्व-समुदायस्य अन्येषां जनानां विरोधभाजः भविष्यन्ति। राज्यसत्तायाः नियन्त्रकाः एतादृशाः सदस्याः कथयिष्यन्ति यत् हिन्दुत्वस्य तु केवलम् एका एव व्याख्या भवति तां व्याख्यां च कर्तुं भवतां कोऽपि अधिकारः नास्ति।

कक्षायां चर्चां कुर्वन्तु- किम् एकस्य एव धर्मस्य आभ्यन्तरे विभिन्नाः दृष्टयः भवितुं शक्नुवन्ति।

भारतीय-धर्म-निरपेक्षता का वर्तते ?

भारतीये संविधाने उक्तम् अस्ति यत् भारतीयं राज्यं धर्मनिरपेक्षं स्थास्यति । अस्माकं संविधानस्य अनुसारं केवलं धर्मनिरपेक्षं राज्यम् एव स्वस्य उद्देश्यान् साकारीकुर्वन् निम्नलिखितानि तथ्यानि ध्यातुं शक्नोति – तानि इत्थं सन्ति –

१.) कोऽपि एकः धार्मिक-समुदायः अन्यं धार्मिक-समुदायं न अभिभूयात् ;

२.) केचन जनाः स्वस्य एव धर्मस्य अन्यान् सदस्यान् न परिभवेयुः ;

३.) राज्यं कम् अपि विशिष्टं धर्मं कस्मिंश्चिद् अपि जने बलात् न आरोपिष्यति अपि च जनानां धार्मिक-स्वतन्त्रताम् अपि न हरिष्यति ।

एवम्प्रकारकं प्रभावं वारयितुं भारतीय-राज्यं बहुविधं कार्यं करोति । प्रथमः प्रकारः अस्ति यत् सः आत्मानं धर्मात् दूरीकरोति । भारतीयस्य राज्यस्य दायित्वं न तु केवलम् एकस्य धार्मिकस्य समूहस्य हस्तयोः वर्तते न तु राज्यं कम् अपि एकं धर्मं समर्थयति । राज्येन भारते न्यायालये आरक्षकस्थाने सर्वकारीयेषु विद्यालयेषु कार्यालयेषु सर्वकारीय-संस्थानेषु च कस्यापि एकस्य विशिष्टस्य धर्मस्य प्रोत्साहनम् अथवा तस्य प्रदर्शनस्य अपेक्षा न क्रियते ।

सीमापुरस्य सर्वकारि-विद्यालयस्य विद्यार्थिनः एकं धार्मिकम् उत्सवम् आयोजयितुम् इच्छन्ति ।

राजकीय-माध्यमिक-विद्यालयः


नैव रेखा, एतत् न भवितुं शक्नोति । अस्माकं सर्वकारि-विद्यालयः अस्ति । वयं कस्यचित् एकस्य धर्मस्य कृते महत्त्वं न दातुं शक्नुमः । निजिविद्यालयाः यत्किमपि इच्छेयुः तत् कुर्युः । सर्वकारिविद्यालयाः स्वकीयेषु विद्यालयेषु कमपि धार्मिकम् आयोजनं न कुर्वन्ति । तथापि प्रायः सर्वेषु धार्मिकेषु उत्सवेषु सर्वकारीय अवकाशः भवति, अतः वयम् एतान् उत्सवान् गृहे एव आयोजयितुं शक्नुमः ।



उपर्युक्तेषु चित्र-कथा-पट्टेषु विद्यालयस्य अन्तः कस्यचित् धार्मिकस्य उत्सवस्य आयोजनं सर्वैः धर्मैः सह समान-व्यवहारस्य सर्वकारस्य नीत्याः विरुद्धम् अभविष्यत् । सर्वकारीय-विद्यालयाः स्वस्य प्रातःकालीनाभिः प्रार्थनाभिः अथवा धार्मिकाणाम् आयोजनानां माध्यमेन कम् अपि एकं धर्मं न वर्धयितुं शक्नुवन्ति । अयं नियमः निज-विद्यालयेषु न प्रवर्तते ।

उपर्युक्तेषु चित्र-कथा-पट्टेषु शिक्षकेण यत् उत्तरं प्रदत्तम् अस्ति तस्य विषये चर्चयन्तु ।

धार्मिक-वर्चस्वं निरोद्धुं भारतीय-धर्मनिरपेक्षतायाः द्वितीयः उपायः अहस्ताक्षेपस्य नीतिः अस्ति । अस्याः अभिप्रायः वर्तते यत् सर्वेषां धर्माणां भावनानां च सम्मानस्य धार्मिक-क्रियाकलापेषु च हस्ताक्षेपस्य निवारणार्थं, राज्यं केभ्यश्चित् धार्मिक-समुदायेभ्यः काञ्चित् विशिष्टां स्वतन्त्रतां ददाति ।

सर्वकारीविद्यालयेषु प्रायः नैकधर्मसम्बद्धाः बालाः आयान्ति । एतत् तथ्यं मनसि निधाय धर्मनिरपेक्षराज्यस्य त्रीणि उद्देश्यानि पुनः पठन्तु । भवन्तः एतस्मिन् सन्दर्भे वाक्यद्वयं लिखन्तु यत् सर्वकारीयविद्यालयैः कस्यचित् एकधर्मस्य विस्तारः किमर्थं न करणीयः स्यात् ।


अरे, भवतः पार्श्वे शिरस्त्राणं वर्तते वा ? देहल्यां सर्वैः शिरस्त्राणम् अवश्यमेव धरणीयं भवति । एषः एव नियमः अस्ति । पुनरपि भवता किमर्थं शिरस्त्राणं न धृतम् ? दण्डभाग् भवितुम् इच्छति वा ।
चिन्तां न करोतु ! अहं दोषशुल्कं न दास्यामि ।
अरे परमजीत ! भवान् कथं दोषदण्डं न दास्यति ?
पश्यतु उष्णीषधारणं सिखधर्मस्य एकः मूलभूतनियमः अस्ति । अतः सर्वकारः मां शिरस्त्राणं धारयितुं बाध्यं न कर्तुं शक्नोति ।

अस्मिन् चित्रकथा-पट्टे सिखयुवकं परमजीतं शिरस्त्राणधारणस्य आवश्यकता नास्ति । कारणम् इदम् अस्ति यत् भारतीयराज्यम् एतत् तथ्यम् अनुमिनोति यत् उष्णीषधारणं सिखधर्मस्य प्रचलनानुसारं महत्त्वपूर्णम् अस्ति । परिणामतः एताभ्यः धार्मिकीभ्यः भावनाभ्यः राज्यम् अधिनियमेषु काञ्चित् मुक्ततां दत्तवत् अस्ति ।

धार्मिकं वर्चस्वं निरोद्धुं भारतीय-धर्मनिरपेक्षतायाः तृतीयः उपायः हस्तक्षेपस्य उपायः अस्ति । एतस्मिन् अध्याये गतपृष्ठेषु भवन्तः अस्पृश्यतायाः विषये पठितवन्तः । इदम् अस्य तथ्यस्य उपयुक्तम् उदाहरणम् अस्ति यत् एवं

प्रकारेण एकस्य एव धर्मस्य जनाः यथा- उच्चजातेः हिन्दवः स्वस्य एव धर्मस्य अन्येषां निम्न-जातेः जनानां पराभवं कुर्वन्ति । धर्मस्य आधारेण पृथक्करणं भेदभावं च वारयितुं भारतीय-संविधानेन अस्पृश्यता निराकृता अस्ति । अस्मिन् उदाहरणे राज्यं, धर्मम् आश्रित्य पृथक्कारिणीं, भेदभाव-वर्धन-शीलां च तां प्रथां नष्टुं ,धर्मे हस्तक्षेपं करोति, या निम्नजातीनां जनानां मौलिक-अधिकाराणां हननं करोति, यतोहि ते अपि अस्य एव देशस्य नागरिकाः सन्ति । एवम् एव मातापित्रोः सम्पत्तौ समानभाग-प्रापणस्य यः अधिकारः अस्ति, तस्य सम्मानं कर्तुं राज्यं, समुदायानां धर्म-आधारितेषु तेषां निज-अधिनियमेषु अपि हस्तक्षेपं कर्तुं शक्नोति ।

संयुक्त-राज्य-अमेरिकायां सर्वकारीय-विद्यालयानाम् अधिकतराः बालकाः प्रातः सर्वप्रथमं " निष्ठायाः शपथं" (Pledge of allegiance)गृह्णन्ति । शपथे "ईश्वरस्य अनुकम्पा" एतादृशाः शब्दाः आयान्ति । षष्टि-वर्षेभ्यः अपि प्राक् एव तत्र इदं निश्चितं कृतम् आसीत् यत् एषः शपथः कस्यचित् बालकस्य धार्मिकीम् आस्थां खण्डयति तदा तस्य कृते एतस्याः प्रार्थनायाः पुनरावृत्तेः अथवा उच्चारणस्य आवश्यकता नास्ति । एतत् अतिरिच्य तत्र "ईश्वरस्य अनुकम्पा" एतं वाक्यांशम् आश्रित्य बहुधा अधिनियमस्य आह्वानम् अपि कृतम् । आह्वानकर्तृणां कथनम् अस्ति यत् एषः वाक्यांशः अमेरिकीयसंविधानस्य प्रथमे संशोधने चर्चराज्ययोः मध्ये कृतस्य पृथक्करणस्य उल्लङ्घनं करोति । उपर्युक्तचित्रे अमेरिकीय-सर्वकारीय-विद्यालस्य बालकाः "कर्तव्यनिष्ठायाः शपथं स्वीकुर्वन्तः" प्रदर्शिताः सन्ति ।

राज्यस्य प्रतिरोधः सहायता-रूपेण अपि भवितुं शक्नोति । भारतीयं संविधानं धार्मिकाणां समुदायानां कृते स्व-विद्यालयानां महाविद्यालयानाम् उद्घाटनस्य अधिकारं ददाति । प्राथमिकतां विना एव ते आधारेण राज्यात् परिमितम् आर्थिकं साहाय्यम् अपि प्राप्नुवन्ति ।

भारतीय-धर्मनिरपेक्षता अन्येषां लोकतान्त्रिक-देशानां धर्मनिरपेक्षतायाः कथं भिन्ना वर्तते ?

उपर्युक्ताः त्रयः उद्देश्याः संसारस्य अन्य-धर्मनिरपेक्ष-लोकतान्त्रिक-देशानां संविधाने प्रदत्त-उद्देश्येभ्यः भिन्नाः न सन्ति । अमेरिकीये संविधाने जातेन प्रथमस्य संशोधनस्य माध्यमेन विधायिका एतादृशान् अधिनियमान् कर्तुं स्वतन्त्रा नास्ति ये धार्मिक-संस्थानां पक्षधराः भवेयुः अथवा धार्मिक-स्वतन्त्रतायाः निरोधकाः स्युः । एतस्य अभिप्रायः वर्तते यत् विधायिका कस्मैचित् एकस्मै धर्माय आधिक्येन प्राथमिकतां दातुं शक्नोति । संयुक्तराज्ये अमेरिकादेशे राज्यस्य धर्मस्य च पृथक्करणस्य अभिप्रायः वर्तते यत् राज्यं धर्मः च द्वौ अपि अन्योऽन्येषां विषयेषु कस्यापि प्रकारकस्य हस्तक्षेपं न कर्तुं शक्नुतः ।

प्रायशः भवन्तः अवगतवन्तः स्युः यत् भारतीय-धर्म-निरपेक्षता अपि च अमेरिकीय-धर्मनिरपेक्षतायाः मध्ये किं महत्त्वपूर्णम् अन्तरं विद्यते । तथा एतस्मात् कारणात् अस्ति यत् अमेरिकीय-धर्म-निरपेक्षतायां धर्म-राज्ययोः मध्ये स्पष्टभेदस्य विपरीतं भारतीय-धर्म-निरपेक्षतायां राज्यं धार्मिकेषु विषयेषु हस्ताक्षेपस्य मुक्तता वर्तते । भवद्भिः पठितम् अस्ति यत् (२५-पृ०)कथं भारतीय-

संविधानेन अस्पृश्यता-प्रथां समापयितुं हिन्दु-धार्मिक-क्रियाकलापेषु प्रतिरोधः कृतः । भारतीय-धर्मनिरपेक्षतायां राज्यं धर्मात् पृथक् तु वर्तते परन्तु पुनरपि धर्मात् तस्य दूरी सैद्धान्तिकी वर्तते । एतस्य अयम् अभिप्रायः अस्ति यत् संविधाने प्रदत्तानाम् आदर्शानाम् आधारेण राज्यं कस्यापि धर्मस्य विषयेषु प्रतिरोधं कर्तुं शक्नोति । एते आदर्शाः तं निकषम् उपलब्धं कारयन्ति यस्य आधारेण एतस्मिन् विषये निर्णयः कर्तुं शक्यते यत् अस्माकं राज्यं धर्मनिरपेक्ष-सिद्धान्तानाम् अनुरूपं कार्यं करोति अथवा न करोति ।

भारतीयं राज्यं धर्मनिरपेक्षम् अस्ति अपि च तत् धार्मिक-वर्चस्वानि वारयितुं बहुविधानि कार्याणि करोति । भारतीय-संविधानं स्व-नागरेभ्यः मौलिक-अधिकाराणाम् आश्वासनं ददाति । एते मूलभूताः अधिकाराः एतेषु धर्मनिरपेक्ष-सिद्धान्तेषु आधारिताः सन्ति । परन्तु एतस्य अयम् अभिप्रायः नास्ति यत् भारतीये समाजे एतेषाम् अधिकाराणाम् उल्लङ्घनं पूर्णतः निरुद्धम् अस्ति । अपि तु वास्तविकतायाम् एवंविधानाम् उल्लङ्घनानां कारणतः एव अस्माकं पुरतः संवैधानिक-व्यवस्थायाः आवश्यकता जायते । एतादृशानाम् अधिकाराणाम् उपस्थितेः ज्ञानम् एव अस्मान् उल्लङ्घनं प्रति संवेदन-शीलं करोति । यदा कदा एवं भवति तदा एतस्य विरुद्धं सम्यक् मार्गं चेतुं वयं सामर्थ्यवन्तः भवामः।

किं भवन्तः भारतस्य कस्माच्चिद् अपि भागात् सद्यस्कां काञ्चिद् घटनां वक्तुं शक्नुवन्ति, यत्र संविधानस्य धर्मनिरपेक्ष-आदर्शानाम् उल्लङ्घनं जातम् अपि च यत्र जनाः तेषां धर्मकारणात् प्रताडिताः अथवा मारिताः ?

फरवरीमासस्य २००४ तमे वर्षे फ्रांसदेशे एकः अधिनियमः रचितः । एतस्मिन् अधिनियमे प्रावधानं कृतम् अस्ति यत् कोऽपि विद्यार्थी इस्लामीवेशं (बुरका इति) यहूदीशिरस्त्राणम् अथवा दीर्घाकारान् ईसाई-क्रासादि-धार्मिक-चिह्नानि राजनैतिक-चिह्नानि वा धृत्वा विद्यालयं न आगमिष्यति । फ्रांसदेशस्थैः अप्रवासिभिः एतस्य अधिनियमस्य बहुविरोधः कृतः । ते मुख्यतया अल्जीरिया- ट्यूनीशिया अपि च मोरेस्को इत्यादिभ्यः देशेभ्यः आगतवन्तः आसन् ये पूर्वं फ्रांसदेशस्य उपनिवेशाः आसन् । १९६० इति दशके फ्रांसे कर्मकराणां न्यूनता जाता । तस्मिन् काले एतेभ्यः अप्रवासिभ्यः फ्रांसम् आगत्य कार्यं कर्तुं प्रमाणपत्राणि (वीजा इति) दत्तानि आसन् । एतेषाम् अप्रवासिनां कन्याः प्रायः शिरसि करवस्त्रं धृत्वा गच्छन्ति । परन्तु अस्मिन् नूतने अधिनियमे जाते सति "ताः शिरसि करवस्त्रं धरन्ति" एतस्मात् कारणात् ताः विद्यालयात् निष्कासिताः ।

अभ्यासः

१. स्वस्मिन् परिवेशे प्रतिवेशे वा प्रचलित-धार्मिक-क्रियाकलापानां सूचीं कुर्वन्तु । भवन्तः विभिन्नप्रार्थनानां विभिन्न-देव-पूजानां विभिन्न-पवित्र-स्थालानां विभिन्न-सङ्गीत-गायनादीनां च दर्शनं कर्तुं शक्नुवन्ति । किम् एतेभ्यः धार्मिक-क्रियाकलापानां स्वतन्त्रतायाः ज्ञानं भवति ?

२. यदि कस्यचित् धर्मस्य जनाः इदं वदन्ति यत् तेषां धर्मः तेभ्यः नवजात-शिशूनां हत्यायाः अनुमतिं ददाति तदा किं सर्वकारः एतस्मिन् कार्ये हस्तक्षेपं करिष्यति अथवा नैव करिष्यति ? स्वस्य उत्तरस्य समर्थने कारणं वदन्तु ।

३. एतां तालिकां पूरयन्तु –

उद्देश्याः	इदं किमर्थं महत्त्वपूर्णम् अस्ति ?	एतस्य उद्देश्यस्य उल्लङ्घस्य एकम् उदाहरणम्
एकः धार्मिकः समुदायः अपरस्मिन् धार्मिके समुदाये वर्चस्वं न स्थापयति ।		
राज्यं न तु कम् अपि धर्मं बलात् आरोपयति न च जनानां धार्मिकीं स्वतन्त्रतां परिहरति ।		
एकस्य एव धर्मस्य केचन जनाः स्वस्य एव धर्मस्य अन्यान् जनान् न अभिभवेयुः ।		

४. स्व-विद्यालस्य अवकाशानां वार्षिक-काल-पञ्जिकां पश्यन्तु । तेषु कति अवकाशाः विभिन्न-धर्म-सम्बन्धिताः सन्ति ? एतस्मात् किं ज्ञायते ?

५. एकस्मिन् एव धर्मे विभिन्न-दृष्टिकोणानां कानिचन उदाहरणानि प्रदर्शयन्तु ?

६. भारतीय-राज्यं धर्मात् पृथक् अपि अस्ति अपि च तस्मिन् प्रतिरोधम् अपि करोति । अयं विवादित-विचारः भवितुं शक्नोति । एतस्मिन् विषये कक्षायाम् एकदा पुनः चर्चां कुर्वन्तु । चर्चायाः कृते अस्मिन् अध्याये प्रदत्तानि उदाहरणानि विहाय भवन्तः स्व-ज्ञानानुसारम् अन्येषाम् उदाहरणानाम् आश्रयं स्वीकर्तुं शक्नुवन्ति ।

७. सह एव प्रदत्तचित्रं "शान्तेः" महत्त्वं रेखाङ्कितं करोति । अस्मिन् चित्रे उक्तम् अस्ति यत् "शान्तिः कदापि नाशशीला प्रक्रिया नास्ति—इयम् अस्माकं पारस्परिक-विभिन्नताः सामूहिक-हितान् च अदृष्ट्वा न भवितुं शक्नोति । एतानि वाक्यानि किं ज्ञापयन्ति ? स्वशब्देषु लिखन्तु । धार्मिक-सहिष्णुतया कः सम्बन्धः वर्तते ?

अस्मिन् अध्याये भवताम् एव समवयाः विद्यार्थिनः धार्मिक-सहिष्णुता-सम्बन्धितानि त्रीणि चित्राणि रचितवन्तः । धार्मिक-सहिष्णुतां दृष्टिपथे निधाय स्वकीयानि मित्राणि दर्शयितुं स्वयम् एकं चित्रं निर्मान्तु ।

शब्द-सङ्कलनम्

बलात्कारः – अस्य अभिप्रायः अस्ति केनापि किञ्चित् कार्यं बलपूर्वकं कारणीयम् । अस्य अध्यायस्य सन्दर्भे अयं शब्दः राज्य-प्रभृति-सत्ताद्वारा बलप्रयोगे प्रयुक्तः अस्ति ।

व्याख्यानस्य स्वतन्त्रता – सर्वे जनाः स्वबुद्धेः अनुसारं विषयान् अवगन्तुं स्वतन्त्राः भवन्ति । अस्मिन् अध्याये व्याख्यानस्य स्वतन्त्रतायाः अभिप्रायः अस्ति यत् प्रत्येकं मनुष्यः स्व-धर्मस्य अवबोधम् अपि च तस्य अर्थं स्वयं निश्चितं कर्तुं शक्नोति ।

प्रतिरोधः – प्रस्तुताध्याये अस्य अभिप्रायः संविधानस्य सिद्धान्तानाम् अनुरूपं कमपि विषयं प्रभावयितुं राज्य-पक्षतः जायमानः प्रयासः अस्ति ।

॥ इति द्वितीयोऽध्यायः ॥

द्वितीयः घट्टः

शिक्षकाणां कृते

षष्ठकक्षायाः सप्तमकक्षायाः च पाठ्यपुस्तकेषु शासन-व्यवस्थायाः विषये चर्चा कृता आसीत्। एषा तस्मिन् एव क्रमे अग्रिमा शृङ्खला वर्तते। परिणामतः अधुना यावत् येषु विषयेषु चर्चा कृता तेषां सङ्क्षेपेण आवर्तनम् आवश्यकम्, मुख्यतया निर्वाचन-प्रतिनिधित्व-सहभागिता-सम्बद्धानां विषयाणाम् आवर्तनम् अत्यावश्यकम् अस्ति। यदि कक्षायां यथार्थ-जीवनस्य उदाहरणानां प्रयोगः क्रियते तर्हि बालकाः एतान् विचारान् इतोऽपि सम्यक्प्रकारेण अवगन्तुं शक्नुवन्ति। अस्मिन् प्रसङ्गे समाचारपत्राणां दूरदर्शन-कार्यक्रमाणाम् अपि प्रयोगं कर्तुं शक्नुमः।

तृतीये अध्याये संसदः केषुचित् कार्येषु चर्चा कृता। एतानि कार्याणि संसदीय-लोकतन्त्रस्य विचार-दृष्ट्या कथं सम्बद्धानि सन्ति, अस्मिन् तथ्ये विशेषेण अवधानं केन्द्रितं स्यात्। अतः नागराणां महत्त्वपूर्णायाः भूमिकायाः विषये विद्यार्थिनां बोधनम् अपि च विद्यार्थिनाम् अस्मिन् सन्दर्भे स्व-मताभिव्यक्तेः अवसर-प्रदानम् अति महत्त्वपूर्णम् अस्ति। केचन विद्यार्थिनः राजनैतिक-प्रक्रियायाः विषये नैराश्यम् उपेक्षाभावं च धरन्ति। एतस्यां स्थितौ शिक्षकरूपेण भवतां भूमिका एतत् नैराश्यम् अपाकर्तुम् अथवा बालकानां विचारैः सह एकमत्याः न भविष्यति। भवता ते बोधनीयाः यत् संविधानस्य वास्तविकम् उद्देश्यं किम् अस्ति।

चतुर्थः अध्यायः अधिनियम-विषये केन्द्रितः अस्ति। बालकाः अधिनियमानां विषये अधिकं न जानन्ति। अधिनियमानां विषये तान् बालकान् बोधनार्थम् अधिकतराणि उदाहरणानि तेषां परिवेशतः एव दातव्यानि भवन्ति। तदा ते इदं ज्ञातुं शक्नुवन्ति यत् अधिनियमाः सर्वेषां कृते समानाः भवन्ति। अध्यायस्य प्रारम्भे चर्चा कृता यत् अधिनियमानाम् इदं शासनं कथं विकसितम् अपि च राष्ट्रवादिभिः ब्रिटिश-अधि-नियमानां स्वच्छन्द-भावस्य च कथं विरोधः कृतः।

चतुर्थे अध्याये प्रदत्त-चित्र-कथा-पट्टेषु प्रदर्शितम् आसीत् यत् नूतनः अधिनियमः कथं जायते ? एतस्य चित्र-कथा-पट्टस्य बलाघातः संसदि जायमानासु प्रक्रियासु न वर्तते। अस्मात् ज्ञायते यत् कस्यापि महत्त्वपूर्णस्य सामाजिक-विषयस्य अधिनियम-रूपं कर्तुं सामान्यजनाः कीदृशीं महत्वपूर्णां भूमिकां निर्वहन्ति। अस्मिन् अध्याये उल्लिखितान् अधिनियमान् अतिरिच्य भवन्तः कस्यचित् नूतनस्य विचाराधीनस्य अधिनियमस्य च अपि उदाहरणं दातुं शक्नुवन्ति येन विद्यार्थिनः तस्य सन्दर्भे जनानां भूमिकाम् अवगच्छेयुः।

अध्यायस्य अन्ते अलोकप्रियाणाम् अधिनियमानां चर्चा कृता अस्ति। एतस्य अभिप्रायः एतादृशैः अधिनियमैः अस्ति ये जनसङ्ख्यायाः केषाञ्चित् वर्गाणां मौलिकान् अधिकारान् बाधन्ते। इतिहासे अस्माभिः एतादृशाः समूहाः अवलोक्यन्ते ये अन्याय-पूर्णानाम् अधिनियमानां विरोधं कृतवन्तः। कश्चित् अधिनियमः कथम् अलोकप्रियः भवितुं शक्नोति, एतस्य विषयस्य चर्चार्थम् इतिहासस्य एतानि उदाहरणानि आश्रीयन्ताम्। भारतीय-सन्दर्भे एतादृशानि अन्यानि उदाहरणानि अन्वेष्टुम् अपि च प्रथमे अध्याये प्रदत्तानां मौलिक-अधिकाराणां निकष-रूपेण प्रयोगं कर्तुम् अस्माभिः विद्यार्थिभ्यः तादृशः अवसरः चर्चां कर्तुं कक्षायां प्रदातव्यः।

तृतीयः अध्यायः

अस्माकं कृते संसदः का आवश्यता ?

वयं भारतीयाः अस्मिन् विषये गर्वम् अनुभवामः यत् वयम् एकस्याः लोकतान्त्रिक-व्यवस्थायाः भागाः स्म । अस्मिन् अध्याये वयं 'निर्णय-प्रक्रियायां सहभागिता' अपि च 'लोकतान्त्रिक-सर्वकारस्य कृते नागराणां सहमतेः महत्त्वम्' इत्यादि-विषयाणां पारस्परिक-सम्बन्धान् ज्ञातुं प्रयासं करिष्यामः ।

एतानि एव तानि तत्त्वानि सन्ति यानि सम्मिलित-रूपेण भारते एकस्याः लोकतान्त्रिक-व्यवस्थायाः निर्माणं कुर्वन्ति । एतस्य विषयस्य सर्वोत्तमा अभिव्यक्तिः संसद्-रूपेण उपलभ्यते। अस्मिन् अध्याये वयम् एतत् द्रक्ष्यामः यत् कथम् अस्माकं संसद् देशस्य नागराणां कृते निर्णय-प्रक्रियायां भाग-ग्रहणस्य अपि च सर्वकारस्य उपरि नियन्त्रणस्य अवसरं ददाति । एतस्मात् कारणात् एव संसद् भारतीय-लोकतन्त्रस्य सर्वाधिक-महत्त्व-युक्त-प्रतीकः अपि च संविधानस्य केन्द्रीयं तत्त्वम् अस्ति ।



जनैः किमर्थं निर्णयः स्वीकर्तव्यः ?

यथा वयं जानीमः, भारतम् अगस्तमासस्य १५ दिनाङ्के १९४७ तमे वर्षे स्वतन्त्रम् अभवत् । एतस्यै स्वतन्त्रतायै समग्र-देशस्य जनता एकं दीर्घतरं कठिनं सङ्घर्षं च कृतवती । एतस्मिन् सङ्घर्षे समाजस्य बहूनां समुदायानां सहभागिता आसीत् । विभिन्न-पृष्ठभूमिकैः जनैः एतस्मिन् भागः गृहीतः । ते स्वतन्त्रता, समानता, अपि च निर्णय-प्रक्रियायां सहायक-विचारैः प्रेरिताः आसन् । औपनिवेशिक-शासनस्य अन्तर्गतं जनाः ब्रिटिश-सर्वकारात् भीताः भवन्ति स्म । ते सर्वकारस्य अधिकतरैः निर्णयैः असहमताः आसन् । परन्तु यदि ते एतेषां निर्णयानाम् आलोचनाम् अकरिष्यन् तदा तैः बहुकष्टानि सोढव्यानि भवन्ति स्म । स्वतन्त्रता-आन्दोलनेन एषा स्थितिः परिवर्तिता । राष्ट्रवादिनः प्रत्यक्षतः ब्रिटिश-सर्वकारस्य आलोचनाम् आरब्धवन्तः अपि च स्वस्य अभ्यर्थनाः उक्तवन्तः । १८५ तमे वर्षे एव भारतीय-राष्ट्रिय-काङ्ग्रेस इत्यनेन अभ्यर्थना कृता यत् विधायिकायां निर्वाचित-सदस्याः भवेयुः अपि च तेषां वार्षिक-विवरणस्य उपरि चर्चायाः प्रश्नकरणस्य च अधिकारः भवेत् । १९०९ तमे वर्षे निर्मिते भारतीय-प्रशासनाधिनियमः (गवर्नमेंट ऑफ इंडिया एक्ट) स्वल्पस्य निर्वाचित-प्रतिनिधित्वस्य व्यवस्थायैः अनुमतिं दत्तवान् । यद्यपि ब्रिटिश-सर्वकारस्य अन्तर्गताः रचिताः आरम्भिक्यः विधायिकाः राष्ट्रवादिनां वर्धमानस्य प्रभावेण एव रचिताः आसन् । परन्तु एतासु विधायिकासु अपि सर्वेषां वयस्कानां कृते न तु मतदानस्य अधिकारः प्रदत्तः आसीत् न च सामान्यजनाः निर्णय-प्रक्रियायां भागं ग्रहीतुं शक्नुवन्ति स्म ।

यथा भवद्भिः प्रथमे अध्याये पठितम् आसीत्, औपनिवेशिकस्य शासनस्य अनुभवेन अथ च स्वतन्त्रता-सङ्घर्षे अनेकेषां जनानां भागग्रहणात् राष्ट्रवादिनः एतं विषयं ज्ञातवन्तः यत् स्वतन्त्रे भारते सर्वे जनाः तेषां जीवनैः सह सम्बद्ध-निर्णयेषु भागं ग्रहितुम् इच्छन्ति अपि च एतस्मिन् विषये ते सामर्थ्यवन्तः सन्ति । स्वतन्त्रतायाः प्राप्तौ वयं स्वतन्त्रस्य देशस्य नागराः भविष्यामः । परन्तु एतस्य अयम् अभिप्रायः नास्ति यत् सर्वकारः यत् इच्छति तत् सर्वं कर्तुं शक्नोति । एतस्य अभिप्रायः आसीत् यत् सर्वकारः सर्वदा जनानाम् आवश्यकताः प्रति संवेदनशीला स्यात् । स्वतन्त्रतायाः स्वप्नैः आकाङ्क्षाभिः च स्वतन्त्रस्य भारतस्य संविधाने दृढरूपं ग्रहीतम् । अनेन संविधानेन सार्वभौमिकस्य वयस्क-मताधिकारस्य सिद्धान्तः अङ्गीकृतः । सार्वभौमिकस्य वयस्क-मताधिकारस्य अर्थः अस्ति यत् देशस्य सर्वे वयस्काः नागराः मतदानस्य प्रयोगं कर्तुं शक्नुवन्ति ।

गत-पृष्ठे प्रदत्तस्य संसदः चित्रस्य माध्यमेन चित्रकारः किं वक्तुं प्रयासं करोति ?

अस्मिन् चित्रे एकः मतदाता विद्युत्-मतदान-यन्त्रस्य प्रयोगस्य विधिं पठति। २००४ तमस्य वर्षस्य निर्वाचनेषु प्रथमतया एतस्य ई.वी.एम. इति यन्त्रस्य प्रयोगः कृतः । एतस्मिन् निर्वाचने ई.वी.एम. इत्यस्य यन्त्रस्य प्रयोगेण प्रायः १५०००० इति सङ्ख्याकानां वृक्षाणां रक्षा जाता यतोहि मतपत्राणां टङ्कणार्थम् एतेषां वृक्षाणां कर्तनं कृत्वा ८००० टनपरिमितस्य कर्गदस्य निर्माणम् अभविष्यत् ।

सार्वभौमिक-वयस्क-मताधिकारः किमर्थम् आवश्यकः, एतस्मिन् सन्दर्भे एकं कारणं ज्ञापयन्तु।

कक्षा-नेतुः चयनं शिक्षकेण क्रियते अथवा विद्यार्थिभिः क्रियते ? भवतां मतेन एतद्-द्वयोः प्रकारयोः कश्चिद् भेदः भवति अथवा न भवति ? चर्चयन्तु।

जनाः तेषां प्रतिनिधयः च

सहमतेः विचारः लोकतन्त्रस्य प्रस्थान-बिन्दुः भवति । सहमतेः अर्थः भवति – इच्छा, स्वीकृतिः जनानां सहभागिता च । जनानां निर्णयः एव लोकतान्त्रिकस्य सर्वकारस्य चयनं करोति अपि तस्य कार्यस्य विषये निर्णयं करोति । एतादृशस्य लोकतन्त्रस्य मूले मुख्यविचारः एषः भवति यत् व्यक्तिः अथवा नागराः एव सर्वाधिक-महत्त्वपूर्णाः सन्ति । एतेषां नागराणां च सैद्धान्तिकेषु स्तरेषु सर्वकारे अन्येषु सार्वजनिक-संस्थानेषु च आस्था भवेत्।

व्यक्तिः कथं सर्वकाराय स्वस्य सहमतिं ददाति ? यथा पूर्वं भवन्तः पठितवन्तः यत् सहमति-प्रदानस्य एकः उपायः निर्वाचन-प्रक्रिया अस्ति। जनाः संसदः कृते स्वस्य प्रतिनिधीनां चयनं कुर्वन्ति। एतेषां निर्वाचितानां प्रतिनिधीनां समूहः एव संसद् इति कथ्यते। इयं संसद् सर्वकारस्य नियन्त्रणं करोति अथ च सर्वकारस्य मार्गदर्शनम् अपि करोति। एतया प्रक्रियया स्व-निर्वाचितानां प्रतिनिधीनां माध्यमेन जनाः एव सर्वकारस्य चयनं कुर्वन्ति । अथ च तस्य नियन्त्रणम् अपि कुर्वन्ति।

अस्मिन् चित्रे निर्वाचन-कर्मचारिणः एकस्मिन् दुर्गमे क्षेत्रे स्थितं मतदान-केन्द्रं यावत् मतदानसामग्रीं विद्युत-मत-दानयन्त्रं च प्रापयितुं गजस्य प्रयोगं कुर्वन्ति।

प्रतिनिधित्वस्य अयं विचारः षष्ठकक्षायाः सप्तमकक्षायाः च सामाजिकम् एवं च राजनैतिकजीवनस्य पाठ्यपुस्तकानाम् एकः महत्त्वपूर्णः विषयः आसीत् । भवन्तः एतेन विषयेण पूर्वम् एव परिचिताः सन्ति यत् सर्वकारस्य विभिन्नेषु स्तरेषु प्रतिनिधीनां चयनं कथं क्रियते । अधुना एकदा पुनः निम्नलिखितस्य अभ्यासस्य माध्यमेन एतेषां विषयाणां पुनरावृत्तिं कुर्मः –

१. विधायकः (एमएलए) कः भवति, तस्य च चयनं कथं क्रियते – एतं विषयं बोधयितुं "निर्वाचन-क्षेत्रं" अथ च "प्रतिनिधित्वम्" इति एतयोः द्वयोः शब्दयोः प्रयोगं कुर्वन्तु ।

२. राज्यं विधानसभां संसदं (लोक-सभां) च अन्तरा कः भेदः अस्ति– एतस्मिन् विषये स्व-शिक्षकेण सह चर्चां कुर्वन्तु ।

३. अधः प्रदत्त-विकल्पेषु कानि कार्याणि राज्यसर्वकारस्य सन्ति कानि च केन्द्रसर्वकारस्य सन्ति ?

(क) चीन-देशेन सह शान्तिपूर्णः सम्बन्धः स्थापयिष्यते ।

(ख) मध्यप्रदेशे परिषदः (बोर्ड) अन्तर्गतेषु सर्वेषु विद्यालयेषु अष्टम-कक्षा परिषदः परीक्षाभ्यः बहिः करिष्यते।

(ग) अजमेर-मैसूरयोः मध्ये एकं नूतनं रेलयानं चालयिष्यते ।

(घ) सहस्रं रूप्यकाणाम् एकं नूतनं पणं प्रारप्स्यते ।

४. निम्नलिखितान् शब्दान् रिक्तस्थानेषु पूरयन्तु -

सार्वभौमिक-वयस्क-मताधिकारः, विधायकान्, प्रतिनिधीन्, प्रत्यक्षरूपेण अस्माकं

काले लोकतान्त्रिक-सर्वकारेभ्यः सामान्यतः प्रतिनिधिमूलकस्य लोकतन्त्रस्य संज्ञा दीयते । प्रतिनिधिमूलके लोकतन्त्रे जनाः ---------- सहभागितां न कुर्वन्ति अपि तु निर्वाचन-प्रक्रियया स्व ---------- चिन्वन्ति । एते --------- समग्र-जनतां मनसि निधाय मिलित्वा निर्णयान् कुर्वन्ति । आधुनिके समये एतादृशं सर्वकारं लोकतन्त्रम् इति न वक्तुं शक्यते यः स्वजनेभ्यः ------- न ददाति । एतस्य अयम् अभिप्रायः यत् देशस्य सर्वेषां वयस्कानां नागराणां कृते मतदानस्य अधिकारः भवति ।

५. भवन्तः पठितवन्तः यत् पञ्चायतस्य राज्यविधायिकायाः संसदः कृते च चिताः अधिकतराः सदस्याः पञ्चवर्षाणां कृते एव चीयन्ते । तथा किमर्थम् अस्ति यत् एते जनप्रतिनिधयः केवलं केषाञ्चित् वर्षाणां कृते एव चीयन्ते, एते आजीवनं कथं न चीयन्ते ?

६. भवन्तः पठितवन्तः यत् सर्वकारस्य क्रियान्वयनेषु जनाः स्वस्य सहमतिम् अथवा असहमतिं व्यक्तीकर्तुं केवलं निर्वाचन-प्रक्रियायाः एव प्रयोगं न कुर्वन्ति, अपितु ते अन्यान् मार्गान् अपि आविष्कुर्वन्ति । किं भवन्तः लघुनाटिका-माध्यमेन एतादृशान् त्रीन् उपायान् वक्तुं शक्नुवन्ति ?



१.भारतीय-संसद् देशस्य सर्वोच्च-अधिनियम-निर्मात्री-संस्था वर्तते। एतस्याः सदनद्वयम् अस्ति – राज्यसभा लोकसभा च।

२.राज्यसभायां केवलं २४५ सदस्याः भवन्ति। देशस्य उपराष्ट्रपतिः राज्यसभायाः सभापतिः भवति।

३. लोकसभायां केवलं ५४५ सदस्याः भवन्ति। एतस्याः अध्यक्षतां लोकसभायाः अध्यक्षः करोति।

संसदः भूमिका

स्वतन्त्रतायाः अनन्तरं सङ्घटिता भारतीयसंसद् लोकतन्त्रस्य सिद्धान्तेषु भारतीयजनतायाः आस्थायाः प्रतीका अस्ति । एते सिद्धान्ताः सन्ति निर्णयप्रक्रियायां जनतायाः सहभागिता अपि च सहमतेः आधारितं शासनम् । अस्माकं व्यवस्थायां संसदः पार्श्वे महत्त्वपूर्णाः शक्तयः सन्ति यतोहि एताः जनतायाः प्रतिनिधित्वं कुर्वन्ति । लोकसभायाः कृते अपि तथैव निर्वाचनानि भवन्ति यथा राज्यसभायाः कृते निर्वाचनानि भवन्ति । सामान्यतया लोकसभायाः कृते प्रत्येकं पञ्चवर्षानन्तरं निर्वाचनानि भवन्ति। यथा ४१ तमे पृष्ठे प्रदत्तचित्रेषु दर्शितम् , देशः बहुषु निर्वाचन-क्षेत्रेषु विभक्तः अस्ति प्रत्येकं निर्वाचन-क्षेत्रात् एका व्यक्तिः संसद् प्रेष्यते। निर्वाचन-प्रत्याशिनः प्रायः विभिन्नदलानां सदस्याः भवन्ति।

आगच्छन्तु अधोलिखित-तालिका-माध्यमेन एतं विषयम् इतोऽपि समीचीनतया अवगच्छामः ।

षोडश्याः लोकसभायाः निर्वाचन-परिणामः (२००४)

राजनैतिक-दलम्	निर्वाचित-सांसदानां सङ्ख्या
राष्ट्रिय-दलम्	
भारतीय-जनता-दलम् (भाजपा)	२८२
भारतीय-कम्युनिस्ट-दलम्	१
भारतीय-कम्युनिस्ट-दलम् (मार्क्सिसिस्ट)	९
भारतीय-राष्ट्रिय-काँग्रेसः	४४
नेशनलिस्ट- काँग्रेस- दलम्	६
राज्यीय-दलानि (क्षेत्रीय-दलानि)	
आम-आदमी-दलम् (आप)	४
अखिल-भारतीय-अन्ना-द्रविड-मुन्नेत्र-कडगम-दलम्	३७
अखिल-भारतीय-तृण-मूल-काँग्रेस-दलम्	३४
अखिल-भारतीय-यूनाइटेड-डेमोक्रेटिक-फ्रंट-	३
बीजू-जनता-दलम् (वीजेडी)	२०
भारतीय-राष्ट्रीय-लोकदलम्	२
भारतीय-संयुक्त-मुस्लिम-लीग-दलम्	२
जम्मूकश्मीर-लोक-जनतान्त्रिक-दलम्	३
जनता-दलम् (सेक्यूलरः)	२
जनता-दलम् (यूनाइटेड)	२
झारखण्ड-मुक्ति-दलम्	२
लोक-जनशक्ति-दलम्	६
राष्ट्रिय-जनता-दलम् (राजद)	४
समाजवादि-दलम् (सपा)	५
शिरोमणि-अकाली-दलम्	४
शिवसेना	१८
तेलंगाना-राष्ट्र–समितिः(टीआरएस)	११
तेलगु-देशम-दलम् (टीडीपी)	१६
अन्य-क्षेत्रीय-दलानि	७
पञ्जीकृत-अमान्यप्राप्त-दलानि	१६
स्वावलंबी	३
सम्पूर्ण-योगः	५४३

पार्श्वस्थ-तालिकाधारेण अधः प्रदत्तानां प्रश्नानाम् उत्तराणि यच्छन्तु ?

कः सर्वकारस्य निर्माणं करिष्यति ? किमर्थम् ?

विपक्षः इति कः उच्यते ? तस्य का भूमिका अस्ति ?

लोकसभायां चर्चायाः कृते के उपस्थिताः भविष्यन्ति ?

किम् इयं प्रक्रिया सप्तमकक्षायां पाठितप्रक्रियासदृशा एव अस्ति ।

२८ तमे पृष्ठे प्रदत्तचित्रे १९६२ तमे वर्षे जातानां लोकसभा-निर्वाचनानां परिणामाः प्रदर्शिताः सन्ति । एतत्-चित्राधारेण निम्नलिखित-प्रश्नानाम् उत्तराणि यच्छन्तु –

(क) लोकसभायां कस्य राज्यस्य सांसदाः सर्वाधिकाः सन्ति ? भवतां विचारस्य अनुसारम् एवं किमर्थम् अस्ति ?

(ख) लोकसभायां कस्य राज्यस्य सांसदानां सङ्ख्या न्यूनतरा वर्तते ?

(ग) केन राजनैतिक-दलेन सर्वेषु राज्येषु अधिकानि लोकसभा-क्षेत्राणि जितानि सन्ति ?

(घ) भवतां राज्ये केन दलेन सर्वकार-निर्माणं करिष्यते ? कारणानि वदन्तु

पञ्चदश-लोकसभायाः निर्वाचन-परिणामः (२००९)	
राजनैतिक-दलानि	**प्राप्तस्थानानि**
राष्ट्रिय-दलानि	
बहुजन-समाज-दलम् (बसपा)	२१
भारतीय-जनता-दलम् (भाजपा)	११६
भारतीय-कम्युनिस्ट-दलम्	४
भारतीय-कम्युनिस्ट-दलम् (मार्क्सिस्ट)	१६
भारतीय-राष्ट्रिय-काँग्रेसः	२०६
नेशनलिस्ट- काँग्रेस- दलम्	९
राष्ट्रियजनता-दलम् (राजद)	४
राज्यीय-दलानि (क्षेत्रीय-दलानि)	
अखिल-भारतीय-अन्ना-द्रविड-मुन्नेत्र-कडगम-दलम्	९
अखिल-भारतीय-फॉरवर्ड ब्लाक	२
अखिल-भारतीय-तृण-मूल-काँग्रेस-दलम्	१९
बीजू-जनता-दलम् (वीजेडी)	१४
द्रविड-मुन्नेत्र-कडगम(डीएमके)	१८
जम्मूकश्मीर-लोक-जनतान्त्रिक-दलम्	३
जनता-दलम् (सेक्यूलरः)	३
जनता-दलम् (यूनाइटेड)	२०
झारखण्ड-मुक्ति-दलम्	२
मुस्लिम-लीग-केरला-राज्य-समितिः	२
क्रान्तिकारि-सामाजिक-दलम्	२
समाजवादि-दलम् (सपा)	२३
शिरोमणि-अकाली-दलम्	४
शिवसेना	११
तेलंगाना-राष्ट्र–समितिः(टीआरएस)	२
तेलगु-देशम-दलम् (टीडीपी)	६
अन्य-क्षेत्रीय-दलानि	७
पञ्जीकृत-अमान्यप्राप्त-दलानि	१६
स्वावलंबी	३
सम्पूर्ण-योगः	५४३

एतस्यां तालिकायां २००९ तमे वर्षे सम्पन्न-पञ्चदश-लोकसभायाः निर्वाचनस्य परिणामाः प्रदर्शिताः। एतस्मिन् निर्वाचने भारतीय-राष्ट्रिय-काँग्रेस-दलेन सर्वाधिक-स्थानानि प्राप्तानि तथापि तेन लोकसभायां बहुमतं न प्राप्तम्। परिणामतः तेन भारतीय-राष्ट्रिय-काँग्रेस-दलेन अन्यराजनैतिक-दलैः सह मिलित्वा संयुक्त-प्रगतिशील-गठबन्धनम् इति कृत्वा सर्वकारः निर्मितः।

चयनाद् अनन्तरम् एते प्रत्याशिनः संसद्-सदस्याः अथवा सांसदाः इति उच्यन्ते। एतैः सांसदैः संसद् भवति। संसदः चयनानन्तरं संसदः अधोलिखितानि कार्याणि सन्ति –

(क) राष्ट्रिय-सर्वकारस्य चयनम्

भारतीयसंसदि राष्ट्रपतिः द्वे सदने च भवतः – राज्यसभा लोकसभा च। लोकसभायाः चयनानन्तरं सांसदानाम् एका सूची क्रियते। एतस्मात् ज्ञायते यत् कस्य राजनैतिकदलस्य कति सांसदाः सन्ति। यदि कश्चित राजनैतिकदलं सर्वकारस्य निर्माणं कर्तुम् इच्छति तदा तस्य पार्श्वे निर्वाचित-सांसदानां बहुमतं स्यात्। यतोहि लोकसभायां केवलं ५४३ निर्वाचित-सांसदाः भवन्ति। अतः बहुमत-प्राप्त्यर्थं लोकसभायां कस्यापि दलस्य न्यूनातिन्यूनं २७२ सदस्याः आवश्यकाः भवेयुः। संसदि प्राप्त-बहुमत-दलस्य अथवा गठबन्धनस्य विरोध-कर्तृणि सर्वाणि राजनैतिक-दलानि विपक्षिदलानि इति उच्यन्ते।

कार्यपालिकायाः चयनं लोकसभायाः महत्त्वपूर्णं कार्यं भवति। यथा भवद्भिः प्रथमे अध्याये पठितम् आसीत् – कार्यपालिका एतादृशानां जनानां समूहः भवति ये जनाः संसद्-द्वारा निर्मितानाम् अधिनियमानां व्यवहारार्थं मिलित्वा कार्यं कुर्वन्ति। यदा वयं सर्वकार-शब्दस्य प्रयोगं कुर्मः तदा अस्माकं मनसि प्रायः एषा एव कार्यपालिका भवति।

भारतस्य प्रधानमन्त्री लोकसभायां सत्ताधारिणः दलस्य प्रमुखः भवति। प्रधानमन्त्री स्वदलस्य सांसदेषु मन्त्रिणां चयनं करोति। ये प्रधानमन्त्रिणा सह मिलित्वा निर्णयान् कुर्वन्ति। एते मन्त्रिणः स्वास्थ्यविभागस्य शिक्षाविभागस्य वित्तादिविभागानाम् अपि च सर्वकारि-कार्याणां दायित्वं निर्वहन्ति।

साम्प्रतिक-वर्षेषु अनेकधा केनापि राजनैतिक-दलेन बहुमतं न प्राप्तम् यत् सर्वकार-निर्माणार्थं नितान्तम् आवश्यकम् अस्ति। एतस्यां स्थितौ बहूनि राजनैतिकदलानि सम्भूय एकं गठबन्धन-सर्वकारं कुर्वन्ति अपि च सामूहिकेषु विषयेषु कार्यं कुर्वन्ति।

केन्द्रीय-सचिवालयस्य एते द्वे मुख्ये भवने स्तः । एतयोः एकस्य नाम दक्षिण-नगरम् (साउथ ब्लाक) अपरस्य नाम उत्तर-नगरम् (नार्थ ब्लाक) च अस्ति । एतयोः द्वयोः निर्माणं १९३०तमे दशके कृतम् आसीत् । दक्षिणतः साउथ ब्लॉक इत्यस्य चित्रम् अस्ति यस्मिन् प्रधानमन्त्रि-कार्यालयः, रक्षामन्त्रालयस्य कार्यालयः अपि च विदेशमन्त्रालयस्य कार्यालयाः सन्ति । वामतः नार्थ ब्लॉक इति अस्ति यत्र वित्तमन्त्रालयः गृहमन्त्रालयः च स्थितौ वर्तेते । केन्द्रसर्वकारस्य अन्यमन्त्रालयाः नवदेहल्यां विभिन्नेषु भवनेषु स्थिताः सन्ति ।

राज्यसभा मुख्यरूपेण देशस्य राज्यानां प्रतिनिधिरूपेण कार्यं करोति । राज्यसभा अपि अधिनियम-निर्माणस्य प्रस्तावं प्रस्तौतुं शक्नोति । कश्चित अपि विधेयकः तदा अधिनियमः भवितुं शक्नोति यदा तं राज्यसभाद्वारा अपि स्वीकृतिः प्राप्ता भवेत् । इत्थं राज्यसभायाः अपि अतिमहत्त्वपूर्णा भूमिका भवति । संसदः एतत् सदनं लोकसभा-द्वारा निर्णीताधिनियमानां समीक्षां करोति यदि तत्र काचित् संशोधनस्य आवश्यकता स्यात् तदा सः संशोधयति । राज्यसभायाः सदस्यानां चयनं विभिन्नराज्याणां विधानसभानां निर्वाचित-सदस्याः कुर्वन्ति । राज्यसभायां २३३ निर्वाचितसदस्याः भवन्ति । अपि च १२ सदस्याः राष्ट्रपतिपक्षतः नियुक्ताः भवन्ति ।

(ख) सर्वकारस्य नियन्त्रणं, मार्गदर्शनं, सूचनानां प्रदानं च

यदा संसद्-सत्रं चलति तदा तस्मिन् आदौ प्रश्नकालः भवति । प्रश्नकालः इति एका महत्त्वपूर्णा व्यवस्था अस्ति । एतस्याः माध्यमेन सांसदाः सर्वकारस्य कार्यस्य विषये सूचनां प्राप्नुवन्ति । एतस्याः प्रश्नकाल-व्यवस्थाया संसद् कार्यपालिकां नियन्त्रयति । प्रश्नमाध्यमेन सर्वकारस्य न्यूनताः सूच्यन्ते । एवम्प्रकारेण सर्वकारः जनप्रतिनिधि-माध्यमेन अर्थात् सांसद-माध्यमेन जनतायाः अभिमतं जानाति । सर्वकारस्य विषये प्रश्नकरणं कस्यापि सांसदस्य महत्त्वपूर्णं दायित्वम् अस्ति । लोकतन्त्रस्य स्वस्थसञ्चालने विपक्षिदलानि प्रामुख्येण भूमिकां निर्वहन्ति । तानि विपक्षि-दलानि सर्वकारस्य नीतीनां कार्यक्रमाणां च न्यूनताः सर्वेषां पुरतः आनयन्ति अपि च स्वस्य नीतीनां कृते जनसमर्थनम् एकत्रीकुर्वन्ति ।

संसदि पृष्टस्य एकस्य प्रश्नस्य उदाहरणम्

लोकसभा

अताराङ्कित-प्रश्न-सङ्ख्या २००७

नवम्बरमासस्य ३०दिनाङ्कः, २००७ तमस्य वर्षस्य उत्तरार्थम्

विद्यालयेषु सद्यपक्वाहारः ("जंक-फूड")

२००७. श्रीसालपट्टी-कुप्पुसामी-खारवेन्तनः –

किं महिला एवं बालविकास-मन्त्रिणा एतत् उक्त्वा वयम् अनुकम्पिष्यन्ते यत् –

(क) किं राष्ट्रिय-बाल-संरक्षणार्थं बालाधिकार-निमित्तं च (नेशनल कमीशन फॉर प्रोटेक्शन ऑफ चाइल्ड राइट्स) (एन.सी.पी.आर.) यः अधिनियमः अस्ति तेन अधिनियमेन सर्वे राज्यसर्वकाराः विद्यालयेषु "जंक-फूड" इति एतम् प्रतिबद्धुं पोषकमानकानां विकासार्थं च उक्तम् अस्ति न वा इति एषः प्रथमः प्रश्नः वर्तते ?

(ख) यदि उपर्युक्तं कार्यं कृतम् अस्ति तदा तत् सम्बद्ध-सूचना का वर्तते ?

(ग) किं केन्द्रसर्वकारेण राज्य-द्वारा उपर्युक्त-मानकानाम् अनुपालनं सुनिश्चिम् अस्ति ;

(घ) यदि सुनिश्चितम् अस्ति , तदा सम्बद्ध-सूचना का अस्ति ?

उत्तराणि

महिला – बालविकास-मन्त्रालयस्य राज्य-मन्त्री पूर्वोक्तानां प्रश्नानाम् उत्तरं ददाति -

(क) (ख) इति एतयोः द्वयोः प्रश्नयोः उत्तरं पूर्वं ददाति – नैव । राष्ट्रिय-बालाधिकार-संरक्षणायोगेन राज्यानि पत्राणि प्रेष्य सूचितानि यत् ते विद्यालयीयं पोषणनीतिं सज्जीकर्तुं दिशानिर्देश-विषये विचारं कुर्युः ।

(ग) (घ) इति एतौ प्रश्नौ निरर्थकौ स्तः ।

उपर्युक्तस्य प्रश्नस्य माध्यमेन महिला एवं बाल-विकास-मन्त्रीतः का सूचना अभ्यर्थ्यते ?

यदि भवन्तः सांसदाः भवेयुः तदा भवन्तः कौ द्वौ प्रश्नौ अप्रक्ष्यन् ?

सांसदानां प्रश्नैः सर्वकारः अपि महत्त्वपूर्णां प्रतिपुष्टिं (फीडबैक इति) प्राप्नोति । एतस्मात् कारणात् सर्वकारः सदैव जागरूकः तिष्ठति । एतद्-अतिरिक्तं वित्तसम्बन्धितेषु सर्वेषु विषयेषु संसदः स्वीकृतिः सर्वकारस्य कृते आवश्यकी भवति । एषा स्वीकृतिः तेषु अनेकेषु उपायेषु एका वर्तते यस्याः माध्यमेन संसद् सर्वकारं नियन्त्रयति, तस्य मार्गदर्शनं च करोति अपि च तं सूचयति । जनप्रतिनिधि-रूपेण संसदः नियन्त्रणं निर्देशनं सूचनादिषु च सांसदानां मुख्या भूमिका भवति अयं च भारतीय-लोकतन्त्रस्य एकः मुख्यः आयामः अस्ति ।

(ग) अधिनियम-निर्माणम्

अधिनियमनिर्माणं संसदः एकम् महत्त्वपूर्णं कार्यम् अस्ति । एतस्मिन् विषये वयम् अग्रिमे अध्याये पठिष्यामः ।

संसदि के जनाः भवन्ति ?

संसदि विभिन्न-पृष्ठभूमि-सम्पन्न-जनानां सङ्ख्या निरन्तरं वर्तते । उदाहरणार्थम्, अधुना ग्रामीण-पृष्ठभूमियुक्त-सदस्यानां सङ्ख्या पूर्वापेक्षया अधिका अस्ति । बहूनां क्षेत्रीय-दलानां सदस्याः अपि वर्धिताः । येषां जनसमूहानाम् अधुना यावत् संसदि किमपि प्रतिनिधित्वं नासीत्, ते अधुना निर्वाचनप्रक्रियायां जित्वा आगच्छन्तः सन्ति ।

दलितानाम् अर्थात् उपेक्षितानाम् अन्यदीनवर्गाणां राजनैतिक-सहभागिता वर्धमाना अस्ति । निम्नलिखितया तालिकया ज्ञायते यत् पृथक्-पृथक्-वर्षेषु लोकसभायाः कृते मतदानकर्तृणां जनसङ्ख्या-प्रतिशतं कियत् आसीत् ।

लोकसभा	निर्वाचनवर्षम्	मतदानप्रतिशतम्
प्रथमा	१९५१ – ५२	६१.१६
चतुर्थी	१९६७	६१.३३
पञ्चमी	१९७१	५५.२९
षष्ठी	१९७७	६०.४९
अष्टमी	१९८४ – ८५	६४.०१
दशमी	१९९१-९२	५५.९८
चतुर्दशी	२००४	५७.९८
पञ्चदशी	२००९	५८.१९
षोडशी	२०१४	६६.४

अस्याः तालिकायाः निरीक्षणानन्तरं किं भवन्तः इदं वक्तुं शक्नुवन्ति यत् गतेषु ५० वर्षेषु निर्वाचनेषु जनतायाः सहभागिता न्यूना जाता अथवा वर्धिता अस्ति अथवा प्रारम्भे वृद्धेः अनन्तरं प्रायः स्थिरा जाता ।

एतत् अनुभूतम् अस्ति यत् प्रतिनिधिमूलकं लोकतन्त्रं स्वसमाजं पूर्णरूपेण सम्यक्प्रकारेण च प्रतिबिम्बितं न कर्तुं शक्नोति । एतत् तथ्यं स्पष्टरूपेण दृश्यते यत् यदा अस्माकं हितानि अनुभवाः च पृथक्-पृथक् भवन्ति तदा एकस्य समूहस्य व्यक्तयः सर्वेषां हितानां कृते कार्यं न कर्तुं शक्नुवन्ति । एतत् तथ्यम् एव मनसि स्थापयित्वा संसदि कानिचन स्थानानि अनुसूचित-जातीनाम् (एस.सी) अनुसूचितजनजातीनां (एस.टी.)च कृते आरक्षितानि सन्ति । इत्थम् एतदर्थं कृतम् अस्ति यत् एतेभ्यः निर्वाचनक्षेत्रेभ्यः केवलं दलित-समुदायस्य आदिवासिसमुदायस्य च एव प्रत्याशिनः भागग्रहणं कुर्युः अपि च ते जयेयुः तस्मात् च तेषाम् अपि संसदि सम्यक्-

उपर्युक्ते चित्रे काश्चन संसदः महिलाः सदस्याः दृश्यन्ते।

भवन्तः संसदि महिलानां न्यूनायाः सङ्ख्यायाः किं कारणम् अनुभवन्ति ? चर्चां कुर्वन्तु।

सहभागिता भवेत्। तेभ्यः इयम् आशा क्रियते यत् ते दलितानाम् आदिवासिनां जीवनेन सह सम्बद्धविषयान् संसदि सम्यक्तया प्रकाशितान् करिष्यन्ति।

तथैव वर्तमाने समये महिलानां कृते अपि स्थानानि आरक्षितानि भवेयुः इति एषः प्रस्तावः अपि प्रस्तूयते। एतस्मिन् आरक्षणसम्बन्धित-प्रश्ने अधुना अपि चर्चा प्रचलति। षष्टेः वर्षेभ्यः प्राक् संसदि चतुःप्रतिशत-महिलाः आसन्। अद्यापि तासां सङ्ख्या नवप्रतिशतं यावत् एव वर्धिता। यदा भवन्तः एतस्मिन् विषये अवधानं कुर्वन्ति यत् अर्धा जनसङ्ख्या महिलानाम् अस्ति तदा एतत् स्पष्टं भवति यत् संसदि महिलाः अत्यल्पं स्थानम् एव प्राप्नुवन्ति।

एतादृशानां विषयाणां कारणात् एव अद्य अस्माकं देशः एतादृशैः कैश्चित् कठिनैः अनुत्तरितैः प्रश्नैः सङ्घर्षरतः अस्ति यत् किम् अस्माकं लोकतान्त्रिकी व्यवस्था वास्तविकतायां प्रतिनिधिका अस्ति अथवा न। वयम् एतादृशान् प्रश्नान् प्रष्टुं शक्नुमः अपि च तेषां प्रश्नानाम् उत्तराणि अन्वेष्टुं प्रयत्नं कुर्मः, एतत् तथ्यं लोकतान्त्रिक-व्यवस्थायाः प्रभावशालिताम् अपि च तस्यां भारतीयानाम् आस्थां प्रदर्शयति।

शब्द-सङ्कलनम्

स्वीकृतिः – कस्मिंश्चित् विषये स्वस्य सहमतेः प्रकटनं तस्मिन् पक्षे च कार्यकरणम्। अस्मिन् अध्याये अयं शब्दः संसदः पार्श्वे उपलब्धाः औपचारिक-सहमतयः अर्थात् निर्वाचित-प्रतिनिधि-माध्यमेन सहमतिप्रदानम् अपि च संसदि जनानाम् आस्था अखण्डा स्यात्। एतयोः द्वयोः सन्दर्भयोः एषः स्वीकृतिशब्दः प्रयुक्तः अस्ति।

गठबन्धनम् - एतस्य अभिप्रायः समूहानां अथवा दलानां तात्कालिक-सङ्घटनेन अस्ति। अस्मिन् अध्याये गठबन्धनम् इति शब्दस्य प्रयोगः निर्वाचनानन्तरं कस्यापि दलस्य पार्श्वे यदा स्पष्टबहुमतं न भवति तदा सर्वकारघटनस्य कृते यत् गठबन्धनं क्रियते तत् एव गठबन्धनशब्देन उच्यते।

असाधिताः - एतस्य शब्दस्य अयम् अभिप्रायः अस्ति यत् यत्र समस्यानां किमपि सरलं समाधानम् उपस्थितं न भवति तदा सः विषयः असाधितः इति उच्यते।

अभ्यासः

1. राष्ट्रवादिना आन्दोलनेन एतस्य विचारस्य समर्थनं कृतं यत् सर्वेषां वयस्कानां कृते मतदानस्य अधिकारः भवेत्।

२. अत्र पार्श्वभागे २००४ तम-वर्षस्य संसदीयनिर्वाचनक्षेत्राणां मानचित्रं प्रदत्तम् अस्ति। अस्मिन् मानचित्रे स्वस्य राज्यस्य निर्वाचनक्षेत्राणि परिचिन्वन्तु। भवतां निर्वाचन-क्षेत्रस्य सांसदस्य नाम किम् ? भवतां राज्यात् संसदं प्रति कति सांसदाः गच्छन्ति ? कानिचन निर्वाचनक्षेत्राणि हरितवर्णेन कानिचन च नीलवर्णेन किमर्थं प्रदर्शितानि सन्ति ?



३. प्रथमे अध्याये भवन्तः पठितवन्तः यत् भारते प्रचलितायां "संसदीय-शासन-व्यवस्थायां" त्रयः स्तराः भवन्ति। तेषु एकः स्तरः संसद् अर्थात् केन्द्रसर्वकारः अपरः स्तरः विभिन्नराज्य-विधायिकानाम् अर्थात् राज्यसर्वकाराणां भवति। स्वक्षेत्रस्य विभिन्नप्रतिनिधिभ्यः सम्बन्धितानां सूचनानाम् आधारेण निम्नलिखितां तालिकां पूरयन्तु --

	राज्यसर्वकारः	**केन्द्रसर्वकारः**
कः अथवा के राजनैतिकदलानि अथवा राजनैतिकदलः सत्तायाम् अस्ति ?		
भवतां क्षेत्रात् निर्वाचितप्रतिनिधिः कः अस्ति ?		
अधुना किं राजनैतिकदलं सत्तायाम् अस्ति ?		
गतनिर्वाचनानि कदा अभवन् ?		
अग्रिमनिर्वाचनानि कदा भविष्यन्ति ?		
भवतां राज्यतः कति महिलाः सांसदाः भवन्ति ?		

॥ इति तृतीयाध्यायः ॥

अध्यायः - 4

अधिनियमानाम् अवगमनम्

भवन्तः कैश्चित् अधिनियमैः परिचिताः भवेयुः । प्रायशः भवतां विवाहस्य कृते आवश्यक-वयसः विषये अपि च मताधिकाराय आवश्यक-वयसः विषये ज्ञानं स्यात् । सम्भवतः भवतां सम्पत्तेः क्रयण-विक्रयणयोः कृते आवश्यक-अधिनियमानाम् अपि ज्ञानं भवेत् । अधुना यावत् भवन्तः ज्ञातवन्तः यत् अधिनियम-निर्माणस्य दायित्वं संसदः भवति । किम् एते अधिनियमाः सर्वैः पालनीयाः भवन्ति ? नूतनाः अधिनियमाः कथम् अस्तित्वं गृह्णन्ति ? किं कोऽपि अधिनियमः विवादास्पदः अलोकप्रियः च भवति ? नागररूपेण वयम् एतासु परिस्थितिषु किं कर्तुं शक्नुयाम ?

किम् अधिनियमाः सर्वैः पालनीयाः भवन्ति ?

एतां स्थितिं पठन्तु अधोलिखितानां च प्रश्नानाम् उत्तराणि यच्छन्तु –

एकस्मै अधिकारिणः पुत्राय जिल्लान्यायालयेन १० वर्षाणां दण्डः उद्घोषितः । एतस्मात् कारणात् सः अधिकारी स्वपुत्रं पलायितुं तस्य साहाय्यं करोति ।

किं भवन्तः अनुभवन्ति यत् सः अधिकारी सम्यक्-कार्यं कृतवान् ? किं तस्य अधिकारिणः पुत्रं न्यायालयः अथवा अधिनियमव्यवस्था एतदर्थं क्षाम्येत् यत् तस्य पिता आर्थिकेन राजनैतिकरूपेण च शक्तिशाली वर्तते ?

अयं साक्षात् अधिनियम-व्यवस्थायाः विषयः अस्ति । यथा भवन्तः प्रथमे एकाङ्के पठितवन्तः, राष्ट्रवादिनः एतस्मिन् विषये परस्परं पूर्णतः सहमताः आसन् यत् स्वतन्त्रे भारते सत्तायाः स्वैच्छिकप्रयोगस्य काऽपि सम्भावना न स्यात् । अतः तैः संविधाने तथाविधाः अनेकाः व्यवस्थाः कृताः याः अधिनियम-आधारितायाः शासनव्यवस्थायाः कृते आवश्यकाः आसन् ।

एतेषु प्रावधानेषु एतत् महत्त्वपूर्णं प्रावधानम् आसीत् यत् स्वतन्त्रे भारते सर्वे अधिनियमव्यवस्थया समानाः भविष्यन्ति । अस्माकम् अधिनियम-व्यवस्था धर्म-जाति-लिङ्गाधारेण जनैः सह कम् अपि भेदभावं न करोति । अधिनियमशासनस्य अभिप्रायः अस्ति यत् सर्वे अधिनियमाः देशस्य सर्वेषु नागरेषु समानरूपेण कार्यं करिष्यन्ति । अधिनियमतः महान् कोऽपि जनः नास्ति । कामं सः कश्चित् सर्वकारीय-अधिकारी स्यात् उत सः श्रेष्ठी स्यात् अपि वा सः कामं राष्ट्रपतिः वा स्यात् । कस्य अपि अपराधस्य अथवा शासनव्यवस्थायाः उल्लङ्घनस्य एकः निश्चितः दण्डः भवति । दण्डप्राप्तेः अपि एका निश्चिता प्रक्रिया वर्तते यस्यां व्यक्तेः अपराधः प्रमाणीक्रियते । परन्तु किं सर्वदा एवम् एव आसीत् ।

प्राचीने भारते असङ्ख्याः स्थानीयाः अधिनियमाः आसन् । प्रायः सदृशे विषये अनेके स्थानीयाः अधिनियमाः प्रवृत्ताः भवन्ति स्म । विभिन्नसमुदायाः पुरा अधिनियमान् निजाधिकारक्षेत्रे स्वदृष्ट्या प्रयोक्तुं स्वतन्त्राः आसन् । कासुचित् स्थितिषु जातेः आधारेण एकस्य एव अपराधस्य विभिन्नजनानां कृते पृथक् पृथक् दण्डव्यवस्था भवति स्म । यथा निम्नजातीनाम् अपराधिनां कृते अपराधस्य दण्डः आधिक्येन भवति स्म । औपनिवेशिक-

रॉलेट् इति अधिनियमः आङ्ग्लीयानां स्वेच्छाचारितायाः इतोऽपि एकम् उदाहरणम् आसीत्। एतस्य अधिनियमस्य सहायतया आङ्गलीयाः अभियोगं विना जनान् कारावासं प्रति प्रेषयितुं शक्नुवन्ति स्म। महात्मगान्धिसहितम् सर्वे राष्ट्रवादिनः नेतारः एतस्य अधिनियमस्य मुखरविरोधं कुर्वन्ति स्म । भारतीयानां विरोधस्य अनन्तरं मार्चमासस्य १० दिनाङ्के १९१९ तमवर्षात् आरभ्यः रॉलेट्-अधिनियमः तैः प्रवर्तितः। पञ्जाबराज्ये एतस्य अधिनियमस्य आधिक्येन विरोधः जातः । एतस्मिन् क्रमे अप्रैलमासस्य १० दिनाङ्के डॉ-सत्यपालः डॉ-सैफुद्दीनकिचलू-महोदयः च कारागारे निपातितौ। एतेषां नेतॄणां कारागारप्रेषण-विरोधे अप्रैलमासस्य १३दिनाङ्के अमृतसरस्य जालियाँवालाबाग इत्यत्र एकस्याः सभायाः आयोजनं जनैः कृतम् । यदा एषा सभा प्रचलति स्म तदा जनरल-डायर-इति नामधेयः आङ्गलीयः सैनिकः अन्यसैनिकैः सह तत्र प्रविष्टः। तेन निर्गमनमार्गः पिहितः अपि च जनान् असूचयित्वा प्राचुर्येण गुलिकाः चालयितुं सैनिकाः आदिष्टाः। एतस्मिन् हत्याकाण्डे शतशः जनाः मृतवन्तः अपि च असङ्ख्यजनाः व्रणिताः जाताः । म्रियमाणेषु अधिकांशतः बालाः महिलाः च आसन्। एतस्मिन् हस्तचित्रे जलियाँवालाबाग-हत्याकाण्डस्य समये जातस्य नरसंहारस्य दृश्यं दर्शितम् अस्ति।

शासन-काले अधिनियम-आधारिता शासनव्यवस्था यदा परिपक्वा जाता तदा जातिम् अधिकृत्य दीयमाने दण्डे भेदभावचलनं समाप्तिपथम् आगतम्। अस्माकं देशे बहूनां जनानां मतम् अस्ति यत् अधिनियमशासनस्य प्रारम्भः आङ्ग्लीयैः कृतम्। इतिहासकारेषु एतस्मिन् विषये पर्याप्तः विवादः अस्ति। एतस्य बहूनि कारणानि सन्ति। एकं कारणं तु एतत् अस्ति यत् औपनिवेशिकं शासनं स्वेच्छाचारितया प्रचलति स्म । द्वितीयं कारणम् इदम् उच्यते यत् आङ्गलशासनकाले भारते अधिनियमानां विकाससन्दर्भे भारतीय-राष्ट्रवादिभिः एका मुख्या भूमिका निर्वोढा। १८७० तमवर्षस्य राजद्रोहः अधिनियमः (एक्ट) आङ्गलशासनस्य उच्छृङ्खलतायाः उदाहरणम् आसीत्। एतस्मिन् अधिनियमे राजद्रोहस्य परिभाषा बहुव्यापका आसीत्। एतस्य अधिनियमस्य अनुसारं यदि कश्चित् जनः आङ्गलशासनस्य विरोधम् अथवा आलोचनां करोति स्म तदा सः अभियोगं विना एव निगृह्यते स्म।

भारतीय-राष्ट्रवादिनः आङ्ग्लीयैः सत्तायाः स्वेच्छिकस्य उपयोगस्य विरोधम् अपि च तस्य आलोचनां कुर्वन्ति स्म। स्वकीयान् आग्रहान् स्वीकारयितुं ते सङ्घर्षं प्रारब्धवन्तः। अयं सङ्घर्षः समानतायाः कृते आसीत्। तेषां कृते अधिनियमस्य अर्थः एतादृशाः अधिनियमाः न आसन् येषां पालनं तेषां बाध्यता स्यात् ते अधिनियमान् तेभ्यः पृथक्-व्यवस्थारूपेण द्रष्टुम् इच्छन्ति स्म ये केवलं न्यायाधारिताः स्युः। एकोनविंशत्याः शताब्द्याः अन्तपर्यन्तं भारते अधिनियम-व्यवसायः अपि प्रारभ्यमाणः आसीत्। अधिनियमीय-व्यवसाये प्रवृत्तानां भारतीयानाम् आग्रहः आसीत् यत् औपनिवेशिक-न्यायालयेषु तैः सह समानव्यवहारः स्यात्। एतादृशाः भारतीय-अधिनियम-विशेषज्ञाः स्वदेशस्य जनानाम् अधिकाराणां कृते एतेषाम् अधिनियमानाम्

उपयोगम् आरब्धवन्तः। भारतीय-न्यायाधीशाः अपि निर्णयेषु स्वभूमिकायाः निर्वहणम् आरब्धवन्तः। इत्थम् औपनिवेशिक-शासन-समये अधिनियम-शासनस्य विकासक्रमे अत्रत्याः जनाः अपि बहुविध-प्रकारेण स्वयोगदानं कुर्वन्ति स्म।

संविधानस्य स्वीकृतेः अनन्तरम् अयम् अभिलेखः तेन आधारशिलारूपेण जातः एतम् आधारीकृत्य अस्माकं प्रतिनिधयः अधिनियम-रचनाम् आरब्धवन्तः । प्रतिवर्षम् अस्माकं प्रतिनिधयः बहून् नूतनान् अधिनियमान् रचयन्ति बहुषु पुरातनेषु अधिनियमेषु च संशोधनम् अपि कुर्वन्ति । षष्ठकक्षायाः पाठ्यपुस्तके भवन्तः २००५ तमवर्ष-सम्बन्धितानां हिन्दूनाम् उत्तराधिकार-संशोधन-अधिनियमानां विषये पठितवन्तः । एतस्य नूतनस्य अधिनियमस्य अनुसारं पुत्राणां पुत्रीणां तेषां मातुः अपि च परिवारस्य सम्पत्तौ समानः अधिकारः वर्तते । तथैव प्रदूषणं नियन्त्रयितुम् अपि च वृत्तेः अवसरान् कल्पयितुम् अपि अधिनियमाः रचिताः । जनाः कथम् अनुभवन्ति यत् अधुना नूतनाः अधिनियमाः आवश्यकाः ? ते अधिनियमानां प्रस्तावं कथं प्रस्तुवन्ति ? एतस्मिन् विषये भवन्तः अग्रिमे भागे पठिष्यन्ति।

अस्मिन्पुस्तकेस्वैच्छिक-शब्दस्य(मनमाना) प्रयोगः पृष्ठतनचर्चायाम् अभवत् । प्रथमस्य अध्यायस्य शब्दसङ्कलने भवन्तः एतस्य अर्थं पठितवन्तः । अधुना एकं कारणं वदन्तु यत् भवन्तः १८७० तमस्य वर्षस्य राजद्रोह-अधिनियमं स्वैच्छिकं किमर्थं मन्यन्ते । १८८० तमवर्षस्य राजद्रोह-अधिनियमः कथं अधिनियम-शासनस्य उल्लङ्घनं करोति ?

नूतनानाम् अधिनियमानां निर्माणं कथं भवति ?

अधिनियमानां निर्माणे संसदः महत्त्वपूर्णा भूमिका भवति । एषा प्रक्रिया बहुविधप्रकारेण अग्रेसरा भवति। सामान्यतः सर्वप्रथमं समाजस्य विभिन्नसमूहाः एव विशेष-अधिनियमानां निर्माणार्थं सर्वकारं प्रति स्वमतं प्रकटयन्ति। इदं संसदः दायित्वम् अस्ति यत् सः जनानां पुरतः आगम्यमानाः समस्याः प्रति जागरूकः भवेत्। आगच्छन्तु, पश्यामः यत् गृहस्थ-हिंसायाः प्रश्नः कथं संसदः समक्षे आगतः अपि च तस्याः गृहस्थहिंसायाः वारणार्थम् अधिनियम-प्रक्रिया कीदृशी आसीत्। यदा परिवारस्य कश्चित् पुरुष-सदस्यः यथा- पतिः गृहस्य कस्याश्चित् महिलायाः यथा पत्न्याः हिंसां करोति अथवा तां व्रणितां करोति अथवा व्रणितां करिष्यामि इति भाययति तदा एषा एव हिंसा गृहहिंसा इति उच्यते। अनेन शारीरिक-मानसिक–शोषणेन महिलायाः महती हानिः भवितुं शक्नोति । इदं शोषणं मौखिकं यौनम् अपि च आर्थिकम् अपि भवितुं शक्नोति पारिवारिक-हिंसाधिनियमः २००५ तमे वर्षे निर्मिते अधिनियमे महिलानां सुरक्षायाः या परिभाषा कृता अस्ति तया परिभाषया एतस्य गृहस्थशब्दस्य अर्थः इतोऽपि व्यापकः कृतः। अधुना एतादृश्यः महिलाः अपि पारिवारिक-हिंसायाः क्षेत्रम् आगतवत्यः याः हिंसाकर्त्रा पुरुषेण सह एकस्मिन् एव गृहे निवसन्ति अथवा पूर्वं वासं कृतवत्यः।

यदा परिवारस्य कश्चित् पुरुष-सदस्यः यथा-पतिः गृहस्य कस्याश्चित् महिलायाः यथा पत्न्याः हिंसां करोति अथवा तां व्रणितां करोति अथवा व्रणितां करिष्यामि इति भाययति तदा एषा एव हिंसा गृहहिंसा इति उच्यते। अनेन शारीरिक-मानसिक–शोषणेन महिलायाः महती हानिः भवितुं शक्नोति । इदं शोषणं मौखिकं यौनम् अपि च आर्थिकम् अपि भवितुं शक्नोति पारिवारिक-हिंसाधिनियमः २००५ तमे वर्षे निर्मिते अधिनियमे महिलानां सुरक्षायाः या परिभाषा कृता अस्ति तया परिभाषया एतस्य गृहस्थशब्दस्य अर्थः इतोऽपि व्यापकः कृतः। अधुना एतादृश्यः महिलाः अपि पारिवारिक-हिंसायाः क्षेत्रम् आगतवत्यः याः हिंसाकर्त्रा पुरुषेण सह एकस्मिन् एव गृहे निवसन्ति अथवा पूर्वं वासं कृतवत्यः।

अयि शाजिये, किं भवत्या अद्यतनं समाचारपत्रं पठितं ? एषा महिलानां पक्षे महती वार्ता अस्ति खलु ?
महिलानां कृते एव किमर्थं ? हिंसा-मुक्त-परिवाराः तु सर्वेषां कृते एव आवश्यकाः । पश्यतु कुसुमे एतस्य अधिनियमस्य निर्माणे कियान् समयः नष्टः । परन्तु पूर्वं तु अस्माभिः अस्य अधिनियमस्य आवश्यकता प्रमाणीकृता ।
THE DAILY

कुसमा शाजिया च एकस्य महिलासङ्घटनस्य सदस्ये स्तः । एते उभे एतस्याः अधिनियम-प्रक्रियायाः प्रत्येकम् अंशं स्मरतः ।

अप्रैल-मासस्य १९९१ तमवर्षस्य कार्यालयस्य एकं सामान्यदिनम्....


अहं मार्गदर्शनम् इच्छामि । मम पतिः मम ताडनं करोति । अधुना यावत् एषा वार्ता मया केनापि न कृता यतो हि अहं लज्जाम् अनुभवामि । परन्तु अहम् इदानीम् अधिकं सोढुम् अपि न शक्नोमि । परन्तु मम पार्श्वे अधुना कश्चित् अन्यः उपायः अपि नास्ति । अहं कुत्र गच्छानि ?
मम पुत्रः पुत्रवधू च मयि दुर्व्यवहरतः, बहुदोषारोपणं कुरुतः, अहं स्वस्य वित्तकोशे रक्षितधनस्य अपि प्रयोगं न कर्तुं शक्नोमि । ते यदि इच्छेयुः तदा मम गृहतः अपि निष्कासनं कर्तुं शक्नुवन्ति ।

अहम् आरक्षकगृहम् अपि न गन्तुम् इच्छामि अहं तु केवलम् एतत् इच्छामि यत् ताडनं न भवेत् ।
अहं तु केवलम् एतत् इच्छामि यत् अहं स्वगृहात् निष्कासिता न भवेयम् ।
दुर्भाग्यवशात् वर्तमानाधिनियमाः न्यायालयीयाः (फौजदारी) सन्ति । तस्मिन् एतौ द्वौ मार्गौ सम्भवौ न स्तः ।

१९९० तमे दशके विभिन्नेभ्यः मञ्चेभ्यः एकस्य अधिनियमस्य अभ्यर्थना भवति स्म ।

अस्माभिः अनेकासां महिलानां जीवनसम्बद्धाः समस्याः श्रुताः । अस्माभिः दृष्टं यत् महिलाः ताडनम् न इच्छन्ति अपि च ताः स्वगृहे एव वसितुम् इच्छन्ति । बहुधा ताः केवलं किञ्चित् समाधानं प्राप्तं स्यात् इति एव इच्छन्ति । एतस्याः समस्यायाः निवारणार्थं कश्चित् नागरः अधिनियमः स्यात् ।
जन सुनवाई

१९९९ तमे वर्षे अधिवक्तॄणाम् अधिनियम-विद्यार्थिनां समाज-वैज्ञानिकानां यत् सङ्घटनं "लॉयर्स-क्लेक्टिव" इति आसीत् तेन सङ्घटनेन राष्ट्र-व्यापि-चर्चाऽनन्तरं पारिवारिक-हिंसा-नियन्त्रणार्थम् एकं विधेयकं सज्जीकृतम् । एतं विधेयकं बहून् जनान् पाठितवन्तः ।

सामूहिके पारिवारे निवसन्ती काऽपि महिला अपि एतस्य अभिनियमस्य सीमायां तिष्ठेत् । सा सामूहिक-भवनात् अपि निषकासिताः न भवेत् ।
पारिवारिकहिंसायाः परिभाषायां शारीरिक-मौखिक-भावनात्मक-दुर्व्यवहाराः अपि सम्मिलिताः स्युः ।
तथा च आर्थिक-साहाय्यस्य विषये कः विचारः अस्ति ?

विचार-विमर्शार्थं विभिन्नैः संस्थानैः सह उपवेशनानि कृतानि ।

महिलान्दोलनं पारिवारिकहिंसायाः विषये एकम् आन्दोलनम् इच्छति । सर्वकारः एतं प्रस्तावं शीघ्रातिशीघ्रं संसदि प्रस्तूयात् ।

अनेकैः महिलासङ्घटनैः अपि च राष्ट्रियमहिलायोगेन संसदीय-स्थायि-समितिं प्रति स्वकीयाः परामर्शाः प्रेषिताः ।

भोः संसदीय-स्थायि-समितेः माननीयाः सदस्याः! वर्तमानविधेयकस्य परिवर्तनम् आवश्यकम् अस्ति । वयं पारिवारिकहिंसायाः प्रस्तावितपरिभाषातः सहमताः न स्मः ।

अस्मिन् अधिनियमे बालकानाम् अस्थायि-संरक्षणस्य अपि व्यवस्था भवेत् ।

अन्ततो गत्वा २००२ तमे वर्षे अयं विधेयकः संसदि प्रस्तुतः। परन्तु ...

अस्मिन् विधेयके सः एकः अपि विषयः नास्ति यः विषयः अस्माभिः उक्तः आसीत् ।

अस्माभिः विधेयकस्य एतस्य रूपस्य विरोधः करणीयः ।

चलन्तु संवाददातृणां सम्मेलनस्य आयोजनं कुर्मः ।---- सह एव सङ्गणके एकस्याः साक्षात्-याचिकायाः अपि प्रारम्भः करणीयः तस्मात् जनाः झटिति अन्तर्जाले स्वकीयम् अभिमतं प्रकटयेयुः ।

दिसम्बरमासस्य २००२ तमे वर्षे स्थायि-समित्या स्व-अभिमताः राज्यसभायै प्रत्यर्पिताः । एते परामर्शाः लोकसभायाम् अपि प्रस्तुताः । समिति-समाख्यायां महिला-सङ्घटनानाम् अधिकतराः याचनाः स्वीकृताः । २००५ तमे वर्षे संसदः पुरतः एकः विधेयकः प्रस्तुतः। उभाभ्यां सदनाभ्यां स्वीकृते सति सः राष्ट्रपति-सकाशे स्वीकृत्यै प्रेषितः । २००६ तमसंवत्सरात् पारिवारिक-हिंसा-महिला-सुरक्षा-अधिनियमः क्रियान्वितः जातः ।

अक्तूवरमासस्य २००६तमे वर्षे एकदा संवाददातृ-सम्मेलन-समये --------

अयं प्रथमः अधिनियमः अस्ति यत्र महिलानां मुक्तहिंसा-परिवारस्य अधिकाराय मान्यता प्रदत्ता । अपि च पारिवारिक-हिंसायाः काचित् व्यापका परिभाषा प्रस्तुता अस्ति ।

अयम् एकः राज्यसभासम्बन्धिः (दीवानी) अधिनियमः अस्ति यः कोटिमिताभ्यः महिलाभ्यः सुरक्षां प्रददाति । बह्व्यः पत्न्यः मातरः पुत्र्यः भगिन्यः च अस्य अधिनियमस्य निर्माणेन स्वगृहेषु हिंसातः मुक्तिं प्राप्स्यन्ति ।

अयं नूतनः अधिनियमः कः अस्ति ?


अयम् अधिनियमः एकः महत्त्वपूर्णः प्रयासः अस्ति । अयम् अधिनियमः एकस्मिन् गृहे पत्या सह सामूहिकरूपेण वासकर्त्रीणां महिलानाम् अधिकारेभ्यः मान्यतां ददाति । महिलाः कस्याः अपि प्रकारिकायाः हिंसायाः विरुद्धं सुरक्षायाः आदेशं प्राप्तुं शक्नुवन्ति... महिलाः स्वस्य उपचाराय अन्याः आवश्यकताः पूरयितुं च आर्थिकं साहाय्यं प्राप्तुं शक्नुवन्ति ।
अधुना एकस्याः दीर्घयात्रायाः प्रारम्भः भवति ---
आम् , अस्माभिः अयं विषयः अपि ध्यातव्यः यत् एतस्मिन् अधिनियमे येषां तथ्यानाम् आश्वासनं प्रदत्तम् अस्ति तानि तथ्यानि यथार्थतया क्रियान्वितानि भवेयुः । अस्माभिः सर्वत्र जागरूकैः भाव्यम् । अस्माभिः महिलाः आरक्षकाः न्यायापालिका-जनाः एते सर्वे अपि एतस्य अधिनियमस्य विषये शिक्षिताः करणीयाः ।
एषः अधिनियमः एतावान् महत्त्वपूर्णः किमर्थम् अस्ति ।

पारिवारिकहिंसायाः विषये भवन्तः किं जानन्ति ? पारिवारिकहिंसाग्रस्ताभिः महिलाभिः नूतनाधिनियमतः द्वौ मुख्यौ अधिकारौ कौ प्राप्तौ ?

किं भवन्तः तां प्रक्रियां वक्तुं शक्नुवन्ति यस्याः प्रयोगः एतस्य अधिनियमस्य आवश्यकताविषये जनानाम् अवबोधनार्थं क्रियते ?

उपर्युक्तचित्र-कथा-पट्टं पठित्वा वदन्तु यत् जनैः काभ्याम् उपायाभ्यां संसदः उपरि प्रभावः स्थापिताः ?



याभिः महिलाभिः सह हिंसा अथवा दुराचारः भवति ताः सामान्यतः पीडिताः इति मन्यन्ते । एतादृशीभ्यः समस्याभ्यः अपगन्तुं महिलाः बहुविधान् सङ्घर्षान् कुर्वन्ति । अतः ताः पीडिताः सन्ति इति अनुक्त्वा " सरवाइवर" इति कथनं समुचितम् अस्ति । एतस्य आङ्गलशब्दस्य अर्थः अस्ति संरक्षितः स्यात् इति ।

पार्श्वस्थस्य चित्रस्य समीपे प्रदत्ते वाक्यखण्डे "समसम्बन्धाः हिंसायाः मुक्ताः" एतस्मात् वाक्यखण्डात् भवन्तः किम् अवगच्छन्ति ?

एतेन उदाहरणेन स्पष्टीभवति यत् नागराणां भूमिका अधिनियम-निर्माणे कियती मुख्यभूता भवति । ते जनतायाः चिन्ताः अधिनियम-क्षेत्रम् आनेतुं संसदः साहाय्यं कर्तुं शक्नुवन्ति । एतस्यां प्रक्रियायां नागराणाम् अभिमताः आवश्यकाः भवन्ति । एते अभिमताः दूरदर्शन-समाचाराणां माध्यमेन समाचार-पत्र-पत्रिकादीनां सम्पादकीयैः आकाशवाण्या अपि च सामान्य-जन-सभा-द्वारा श्रूयते व्यक्तीकर्तुं शक्यते च । एतेषां सर्वेषां संचारमाध्यमैः संसदः कार्यम् इतोऽपि दृढतया स्पष्टतया च जनानां पुरतः आयाति ।

अलोकप्रियाः विवादास्पदाः च अधिनियमाः

आगच्छन्तु, अधुना इतोऽपि एकस्यां स्थितौ विचारयामः । बहुधा संसद् एकं एतादृशम् अधिनियमं घोषितं करोति यः अतीव अलोकप्रियः जायते । एतादृशः अधिनियमः संवैधानिकरूपेण वैधकारणात् सम्यग् भवितुं शक्नोति । पुनरपि सः जनैः न इष्यते यतोहि ते अनुभवन्ति यत् अधिनियमकर्तृणां दृष्टिः सम्यक् नासीत् । तस्मात् जनाः तेषाम् आलोचनां कुर्तुं शक्नुवन्ति । तेषां विरोधार्थं च जनसभाः कर्तुं शक्नुवन्ति, समाचारपत्रेषु लेखितुं शक्नुवन्ति, दूरदर्शनप्रणालिकासु सूचनाः प्रेषयितुं शक्नुवन्ति । अस्माकं लोकतान्त्रिकदेशे सामान्याः जनाः संसद्-द्वारा निर्मितानां दमनकारिणाम् अधिनियमानां विषये स्वकीयाम् असहमतिं व्यक्तीकर्तुं शक्नुवन्ति । यदा बहवः जनाः इत्थम् अनुभवन्ति यत् असमीचीनः अधिनियमः जातः अस्ति तदा संसदि अपि तस्य अधिनियमस्य विषये पुनर्निरीक्षणस्य कार्यम् आपतति ।

उदाहरणार्थं, नगरपालिकायाः सीमायाम् अथवा नगरपालिका-भूमेः प्रयोग-सम्बन्धि-अधिनियमेषु तस्यां भूम्याम् अथवा रेलमार्गस्य स्थाने आपणस्थापनम् अपि च तत्र वस्तु-विक्रयणम् अधिनियम-विरुद्धम् अस्ति इति घोषितम् अस्ति । एतस्मिन् कोऽपि सन्देहः नास्ति यत् सार्वजनिक-स्थानानि स्वच्छानि स्थापनार्थं केचन अधिनियमाः आवश्यकाः सन्ति । तदा एव जनाः सरलतया पदमार्गेषु चलितुं शक्ष्यन्ति । परन्तु एतत् अपि ध्यातव्यं यत् वीथिषु ये आपणिकाः भवन्ति वयं तेषाम् उपेक्षां न कर्तुं शक्नुमः यतो हि ते नागराणां कृते आवश्यकसामग्रीः अन्याः सेवाः अत्यल्पमूल्येन कुशलतापूर्वकं च प्रापयन्ति । एतेन वणिक्कार्येण तेषां जीवनम् अपि प्रचलति । परिणामतः यदि अधिनियमः एकस्य समुदायस्य कृते लाभकारी भवति अपि च यदि अन्यस्य समुदायस्य उपेक्षां करोति तदा तस्मिन् विषये

यथा भवद्भिः अधिनियमस्य शासने केन्द्रिते गतभागे पठितं, भारतीय-राष्ट्र-वादि-समूहः आङ्ग्लीयैः बलात् क्रियान्वयितानां स्वेच्छिकानां दमनकारिणाम् अधिनियमानां विरोधम् आलोचनां च करोति स्म । इतिहासे अस्माभिः एतादृशाः बहवः जनाः समुदायाः च दृश्यन्ते यैः अन्यायपूर्णानाम् अधिनियमानां निवृत्यर्थं सङ्घर्षाः कृताः । सप्तमकक्षायाः पुस्तके भवन्तः पठितवन्तः आसन् यत् रोजा-पार्क्स-नाम्न्या अफ्रीकी-महिलया दिसम्बर-मासस्य प्रथमे दिनाङ्के १९५५ तमे वर्षे एकस्य श्वेत-जनस्य कृते स्वस्य आसनं त्यक्तुम् असहमतिः प्रकृटीकृता आसीत् । रोजा-पार्क्स-महोदया तस्य अधिनियमस्य विरोधं करोति स्म यस्मिन् अधिनियमे सार्वजनिकेषु स्थानेषु श्वेत-नागराणां कृते अफ्रीकी-अमेरिकि-नागराणां च कृते भिन्नान् भिन्नान् स्तरान् निर्धारीकरोति स्म । स्थितिः अत्र पर्यन्तम् आसीत् यत् राजमार्गेषु अपि द्वयोः समुदाययोः स्थानं पृथक्-पृथक् भवति स्म । रोजा-पार्क्स-महोदयायाः इयम् अस्वीकृतिः एका ऐतिहासिकी घटना आसीत् । एतदनन्तरम् एव तत्र नागराधिकारान्दोलस्य प्रारम्भः जातः यस्य परिणाम-स्वरूपं १९६४ तमे वर्षे नागराधिकाराधिनियमः क्रियान्वयितः जातः । एतस्य अधिनियमस्य माध्यमेन सङ्युक्तराज्ये अमेरिकायां जाति-धर्म-राष्ट्रियतायाः आधारेण कीदृशः अपि भेदभावः अधिनियमस्य विरुद्धः इति घोषितः अस्ति । उपर्युक्ते चित्रे रोजा-पार्क्स–महोदया बसयाने यात्रां कुर्वती दृश्यते ।

सप्ताहं यावत् समाचारपत्रं पठन्तु अथवा दूरदर्शने समाचारान् अवलोकयन्तु अपि च जानन्तु यत् किं कोऽपि एतादृशः अलोकप्रियः अधिनियमः अस्ति यस्य, भारतस्य अथवा अन्यक्षेत्रीयाः जनाः विरोधं कुर्वन्ति ।

उपरि-प्रदत्तेषु चित्रेषु अन्यायपूर्णानाम् अधिनियमानां विरोधार्थं केचन अन्ये उपायाः अपि दर्शिताः सन्ति।

विवादः भविष्यति अपि च घट्टनस्य अथवा सङ्घर्षस्य स्थितिः उत्पन्ना भविष्यति । ये जनाः चिन्तयन्ति यत् सम्बन्धितः अधिनियमः सम्यक् नास्ति, तदा ते एतस्मिन् विषये निर्णयार्थं न्यायालयस्य शरणं गन्तुं शक्नुवन्ति । यदि न्यायालयः अनुभवति यत् अयम् अधिनियमः सम्यक् नास्ति अपि वा संविधानविरुद्धम् अस्ति तदा न्यायालयः तस्मिन् संशोधनं कर्तुं शक्नोति ।

अस्माभिः एतत् तथ्यं सदा ध्यातव्यं नागररूपेण अस्माकं भूमिका प्रतिनिधीनां निर्वाचनेन सह एव समाप्तिं न याति अपितु तदनन्तरम् अपि समाचारपत्रैः अन्यैः च संचारसाधनैः एतस्मिन् विषये सर्वदा सावधानैः भाव्यं यत् अस्माकं सांसदाः किं कुर्वन्ति । यदि वयम् अनुभवामः यत् ते समीचीनं कार्यं न कुर्वन्तः सन्ति तदा वयं तेषाम् आलोचनां कुर्मः । अनेन प्रकारेण अस्माभिः सर्वदा ध्यातव्यं यत् जनानां सहभागिता यथा यथा अधिका भविष्यति तथा यथा उत्साहेन भविष्यति तावद् एव सांसदाः अपि स्वकार्यं सारल्येन सम्यक्प्रकारेण च करिष्यन्ति तेषां च साहाय्यं भविष्यति।

अभ्यासः

१ "अधिनियम-शासनम्" इति पदेन भवन्तः किम् अवगच्छन्ति ? स्वशब्देषु लिखन्तु । स्वप्रश्नम् उत्तरन् अधिनियमस्य उल्लङ्घनस्य एकं किमपि काल्पनिकम् अथवा वास्तविकम् उदाहरणं यच्छन्तु ।

२ इतिहासकाराः एतत् तथ्यम् असमीचीनं वदन्ति यत् भारते अधिनियम-शासनम् आङ्ग्लीयैः प्रारब्धम् । एतस्य कारणद्वयं वदन्तु ?

३ पारिवारिकहिंसायाः नूतनः अधिनियमः कथं निर्मितः, महिलासङ्घटनैः एतस्यां प्रक्रियायां विभिन्न-उपायैः कथं भूमिका निर्वोढा , तं विषयं स्वशब्देषु लिखन्तु ।

४ स्वशब्देषु लिखन्तु यत् अस्मिन् अध्याये आगतैः निम्नलिखितैः वाक्यैः (४४-४५ पृष्ठयोः) भवन्तः किम् अवगच्छन्ति ? स्वकीयान् आग्रहान् स्वीकारयितुं ते सङ्घर्षम् आरब्धवन्तः । अयं समानतायाः सङ्घर्षः आसीत् । तेषां दृष्टौ अधिनियमस्य अर्थः एतादृशः नियमः नासीत् । येषां व्यवहारः तेषां बाध्यता स्यात् । ते अधिनियमं ततः भिन्नेन एतादृश-व्यवस्था-रूपेण द्रष्टुम् इच्छन्ति स्म, ये न्याय-आधारितैः विचारैः सम्मताः स्युः ।

शब्द-सङ्कलनम्

आलोचनाः – कस्मिंश्चित् जने अथवा वस्तुनि न्यूनता-दर्शनम् अथवा तस्य अस्वीकरणम् । अस्मिन् अध्याये आलोचनाशब्दस्य प्रयोगः सर्वकारस्य कार्यशैल्यां नागराणां पक्षतः जायमानायाः आलोचनायाः कृते कृतः अस्ति ।

विकासक्रमः – सरलात् जटिलरूपं प्रति विकास-प्रक्रिया एव विकासक्रमः इति उच्यते । सामान्यतः एतस्य शब्दस्य प्रयोगः पशूनां पादपानां वा कस्याश्चित् प्रजात्याः विकासस्य वर्णनार्थं क्रियते । अस्मिन् अध्याये विकास-क्रमस्य अर्थः एतेन तथ्येन वर्तते यत् महिलानां पारिवारिक-हिंसातः सुरक्षाप्रदानस्य विचारः कथम् अखिलभारतीय-आधिनियमरूपेण विकसितः जातः ।

राजद्रोहः - यदा सर्वकारः अनुभवति यत् तस्य विरुद्धं प्रतिरोधः जायते अथवा विद्रोहः क्रियते तदा सः राजद्रोहः इति कथ्यते । एतादृश्यां सर्वकारः कस्यापि ग्रहणार्थं दृढप्रमाणस्य कारणस्य वा आवश्यकता न भवति । १८७० तमवर्षस्य राजद्रोह-अधिनियमस्य अन्तर्गतं राजद्रोहस्य अतिव्यापक-परिभाषायाः प्रयोगं करोति स्म । परिणामतः ते एतस्य अधिनियमस्य आधारेण कम् अपि जनं गृहित्वा कारगारं प्रति प्रेषयितुं शक्नुवन्ति स्म । राष्ट्रवादिनः नेतारः एतम् अधिनियमं स्वेच्छारिता इति मन्यन्ते स्मः। यतोहि बहून् जनान् ग्रहणात् पूर्वं कारणम् अपि नोच्यते स्म । ते अभियोगं विना एव कारागारं प्रेष्यन्ते स्म ।

दमनकारी -- स्वतन्त्रं स्वाभाविकं च विकासम् अथवा अभिव्यक्तिं निरोद्धुं शक्त्या नियन्त्रणस्य स्थापनम् । अस्मिन् अध्याये ते अधिनियमाः दमनकारिणः इति उक्ताः ये जनान् बहुनिर्ममरूपेण नियन्त्रणं कुर्वन्ति अपि च तान् सभानाम् आयोजनात् अथवा स्व-अभिव्यक्तेः प्रकटनात् अपि वारयन्ति ।

॥ इति चतुर्थाध्यायः ॥

तृतीयः घट्टः

शिक्षकाणां कृते

एतेषाम् अध्यायानां माध्यमेन विद्यार्थिनः न्यायपालिकया सह परिचिताः कार्यन्ते । एतस्याः व्यवस्थायाः आरक्षक-न्यायालय-प्रभृतीनाम् आयामानां विषये विद्यार्थिनः पूर्वतः एव बहु किमपि जानीयुः। ते संचारमाध्यमैः अथवा स्वस्य निजानुभवस्य आधारेण जानन्ति । एतस्मिन् एकाङ्के मुख्यप्रयासः अयम् अस्ति यत् न्याय-व्यवस्थायाः आधारभूतं ज्ञानम् अपराधिक-न्यायव्यवस्था-सम्बद्धानाम् उपयोगि-सूचनानां योजनं च भवेत् ।

पञ्चमे अध्याये ये विषयाः चर्चिताः ते अत्र इतोऽपि वैशिष्ट्येन चर्चिष्यन्ते। एतेषाम् अध्यायानां पाठनकाले विद्यार्थिनां कृते एषः अनुभवः कारणीयः यत् संविधानस्य सिद्धान्ताः यथावत् तिष्ठेयुः तन्निमित्तं न्यायपालिका कियतीं महत्त्वपूर्णां भूमिकां निर्वहति । षष्ठाध्याये अपराधिक-न्याय-व्यवस्थया सम्बद्धानां जनानां भूमिका उक्ता अस्ति। यया च विद्यार्थिनः प्रत्येकं मनुष्यस्य भूमिकाविषये न्यायविषये च जानीयुः। पञ्चमस्य अध्यायस्य प्रारम्भात् पूर्वम् अधिनियमव्यवस्थायाः चर्चायाः आवृत्तिः आवश्यकी वर्तते । तदनन्तरम् एव अधिनियम-शासनस्य रक्षणे न्यायपालिकायाः भूमिकायाः चर्चा कर्तुं शक्यते । पञ्चमे अध्याये न्यायपालिका-सम्बन्धितानां विभिन्नानां पुनरपि परस्परसम्बद्धानां धारणानाम् अपि चर्चा कृता अस्ति । न्यायपालिकायाः स्वतन्त्रता तस्याः दायित्वस्य निर्वहणार्थम् अति-महत्त्वपूर्णा अस्ति । विद्यार्थिनः एतस्मिन् विषये प्रोत्साहनीयाः यत् ते न्यायिकप्रक्रियायाः कार्यपद्धतिं ज्ञातुं केषाञ्चित् अन्येषां विषयाणाम् अपि चर्चां कुर्वन्तु । अपि च तेषां सहभागिताः अपि भवेत् । "न्यायं प्रति प्रापणम्" शीर्षकम् अस्य अध्यायस्य अन्तिमायाम् अवधारणायां जनहित-याचिकायाः (पी. आई.एल.) या भूमिका वर्तते तस्यां बलाघातः क्रियते । एतस्मिन् विभागे न्यायप्राप्तौ "विलम्बः" इत्यस्य अपि वर्णनं कृतम् अस्ति । एतस्य भागस्य चर्चां कुर्वन् मौलिक-अधिकाराणां विषये बालकानां वर्धितज्ञानस्य प्रयोगं कुर्वन्तु ।

षष्ठाध्यायस्य माध्यमेन बालकानाम् आपराधिक-न्यायव्यवस्थया सम्बद्धानां जनानां भूमिकायाः अपि च निष्पक्ष-अभियोगस्य प्रक्रियया विद्यार्थिनां परिचयः कारयिष्यते । एतस्य अध्यायस्य प्रारम्भः एकस्याः चित्र-कथा-पट्टतः भवति यस्मिन् चौर्यस्य एकस्याः घटनायाः वर्णनम् अस्ति । एतस्याः कथायाः माध्यमेन आरक्षकाणां राज-अधिवक्तृणां न्यायाधीशानां च भूमिकायाः निष्पक्षाभियोगस्य विषये चर्चा कृता। एतस्य तथ्यस्य महती सम्भावना वर्तते यत् एताः चर्चाः आश्रित्य विद्यार्थिनः स्वस्य मतानि उपस्थापयितुम् शक्नुवन्ति । एतद् अपि भवितुं शक्नोति यत् ते आपराधिक-न्याय-व्यवस्थायाः विषये अति-नकारात्मिकीं निराशापूर्णाम् अभिव्यक्तिं कर्तुं शक्नुवन्ति । शिक्षकरूपेण भवतां दायित्वम् अयम् अस्ति यत् अस्मिन् अध्याये प्रदत्तानाम् आदर्शानां चर्चामाध्यमेन तेषां निराशाम् अपाकुर्वन्तु। एतस्य कृते उपायद्वयं कर्तुं शक्नुमः – प्रथमतया तु भवन्तः एतस्मिन् तथ्ये बलाघातं कर्तुं शक्नुवन्ति यत् आदर्शकार्यपद्धतिः का वर्तते ? अपि च भारतीयसंविधाने प्रदत्तसिद्धान्तैः सह तस्याः कः सम्बन्धः अस्ति ? अपरः उपायः अस्ति यत् एतासां संस्थानां कार्ये संलग्नानां सचेतसां कार्यकर्तृणां जागरूक-जनतायाः च योगदानस्य पुनरावृत्तिः भवेत् ।

पञ्चमः अध्यायः

न्यायपालिका

समाचारपत्रे दृष्टिपाते कृते सति एव भवन्तः सम्पूर्णस्य देशस्य न्यायालयेषु कृतानां कार्याणां विषये ज्ञातुं शक्नुवन्ति। परन्तु किं भवन्तः वक्तुं शक्नुवन्ति यत् अस्माकं कृते एतेषां न्यायालयानाम् आवश्यकता किमर्थं भवति ? यथा भवद्भिः द्वितीये एकाङ्के पठितं यत् अस्माकं देशे अधिनियम-शासनं भवति । एतस्य अभिप्रायः अयम् अस्ति यत् सर्वे अधिनियमाः सर्वेषां नागराणां विषये समानरूपेण कार्यं कुर्वन्ति अपि च यदा कस्यापि नियमस्य उल्लङ्घनं क्रियते तदा एकस्याः निश्चित-प्रक्रियायाः उपयोगः भवति । अधिनियम-शासनस्य क्रियान्वयनं कर्तुम् अस्माकम् काचित् न्यायव्यवस्था अस्ति । एतस्यां व्यवस्थायां बहवः न्यायालयाः सन्ति, जनः न्यायार्थं तत्र आगन्तुं शक्नोति। सर्वकारस्य अभिन्नभागत्वात् न्यायपालिका अपि भारतीय-लोकतन्त्रस्य व्यवस्थायाः सम्यग्-रूपेण निर्वहणार्थं महत्त्वपूर्णां भूमिकां निर्वहति । एषा एतां भूमिकाम् एतस्मात् कारणात् निर्वहति यत् एषा स्वतन्त्रा वर्तते । "स्वतन्त्रायाः न्यायपालिकायाः" कः अर्थः वर्तते ? किं भवतां क्षेत्रे स्थितायाः न्यायपालिकायाः अपि च नवदेहलीस्थ-न्यायपालिकायाः मध्ये कश्चित् सम्बन्धः अस्ति ? अस्मिन् अध्याये भवन्तः एतेषां प्रश्नानाम् उत्तराणि प्राप्स्यन्ति।

न्यायपालिकायाः का भूमिका वर्तते ?

न्यायालयाः बहुषु विषयेषु निर्णयान् श्रावयन्ति । ते एतत् निश्चितं कर्तुं शक्नुवन्ति यत् शिक्षकाः विद्यार्थिनां ताडनं न कुर्युः ; ते राज्यानां मध्ये नदीनां जलवितरणस्य विषये निर्णयान् कर्तुं शक्नुवन्ति । ते कस्यचित् अपराधस्य कृते जनान् दण्डयितुं शक्नुवन्ति। न्यायपालिकायाः कार्याणि मुख्यतया निम्नलिखितभागेषु वण्टयितुं शक्यन्ते।

विवादानां समाधानम् - न्यायिक-व्यवस्था नागराणां, नागरसर्वकारयोः द्वयोः राज्ययोः केन्द्रसर्वकारस्य च मध्ये उत्पन्नं विवादं समाधातुं क्रियाविधिं प्रदर्शयति।

न्यायिकसमीक्षा - संविधानस्य व्याख्यायाः अधिकारः मुख्यरूपेण न्यायपालिकायाः भवति । एतस्मात् कारणात् यदि न्यायपालिका अनुभवति यत् संसद्-द्वारा निर्मितः कश्चित् अधिनियमः संविधानस्य आधारभूत-संरचनायाः उल्लङ्घनं करोति तदा संसद् तम् अधिनियमं निरस्तीकर्तुं शक्नोति। एषा एव न्यायिकसमीक्षा इति उच्यते।

अधिनियमानां संरक्षणं मौलिक-अधिकाराणां च क्रियान्वयनम् – यदि देशस्य कश्चित् अपि नागरः एतत् अनुभवति यत् तस्य मौलिक-अधिकाराणाम् उल्लङ्घनं भवति तदा सः सर्वोच्चनयायालयम् अथवा उच्चनयायालयं प्रति गन्तुं शक्नोति । उदाहरणार्थम् – सप्तमकक्षायाः पाठ्यपुस्तके भवद्भिः हाकिम-शेखस्य विषये पठितम् आसीत् यः एकः कृषकः आसीत् सः चलतः रेलयानात् पतित्वा अचेतनः जातः । यदा बहुभिः चिकित्सालयैः तस्य उपचारः अस्वीकृतः तदा तस्य स्थितिः अतीव शोचनीया अभवत् । एतस्य प्रकरणस्य श्रवणानन्तरं सर्वोच्च-न्यायालयेन इदं निर्णीतं यत् संविधानस्य २१ अनुच्छेदे प्रत्येकं नागरस्य कृते जीवनस्य मौलिकः अधिकारः प्रदत्तः अस्ति अपि च तस्मिन् अधिनियमे स्वास्थ्यस्य अपि अधिकारः निहितः अस्ति । परिणामतः न्यायालयेन पश्चिमबङ्गालस्य सर्वकारः आदिष्टः यत् सः चिकित्सालयस्य अनवधानतावशात् हाकिम-शेखस्य या हानिः जाता सर्वकारः तस्य क्षतिपूर्तिं कुर्यात्। सर्वकाराय अयम् अपि आदेशः दत्तः यत् सः प्राथमिक-स्वास्थ्य-व्यवस्थायाः स्वरूपं सज्जीकुर्यात् अपि च तस्याम् आपात परिस्थितिषु रोगिणां चिकित्सायां विशिष्टं ध्यानं दद्यात्। (पश्चिमबङ्ग-क्षेत्र-कर्मकर-समितिः अपि च पश्चिम-बङ्ग-राज्यम् (१९९६)

अयं भारतस्य सर्वोच्च-न्यायालयः अस्ति । एतस्य स्थापना जनवरी-मासस्य 26 दिनाङ्के १९५० तमे वर्षे अभवत्। तस्मिन् दिने एव अस्माकं देशः गणतन्त्रः जातः। स्वस्य पूर्ववर्ती फेडरल कोर्ट- ऑफ इंडिया(१९३७-४९) इत्यस्य न्यायालयस्य इव अयं न्यायालयः अपि पूर्वं संसद्-भवनस्य अन्तस्थितः चेबर-ऑफ-प्रिंसेज् इत्यस्मिन् भवति स्म । तस्य १९५८ तमे वर्षे एतस्मिन् भवने स्थानान्तरणं कृतम्।

स्वशिक्षिकायाः सहायतया एतस्यां तालिकायां प्रदत्तरिक्तस्थानानि पूरयन्तु--	
विवादस्य प्रकारः	**उदाहरणानि**
केन्द्रराज्ययोः मध्ये विवादः	
द्वयोः राज्ययोः मध्ये विवादः	
द्वयोः नागरयोः मध्ये विवादः	
एतादृशाः अधिनियमाः ये संविधानस्य उल्लङ्घनं कुर्वन्ति।	

स्वतन्त्र-न्यायपालिका का भवति ?

कल्पनां कुर्वन्तु यत् केनचित् प्रभावशालिना नेत्रा भवतां परिवारस्य भूमौ अधिकारः कृतः। भवन्तः एकस्याम् एतादृश्यां व्यवस्थायां वसन्ति यत्र नेतारः कमपि न्यायाधीशं तस्य पदात् च्युतं कर्तुं शक्नुवन्ति अथवा तस्य स्थानान्तरणं कर्तुं शक्नुवन्ति। यदा भवन्तः एतं विषयं न्यायालयं प्रति नयन्ति तदा न्यायाधीशः अपि नेतुः पक्षपातं करोति।

किं भवन्तः अनुभवन्ति यत् एतादृश्यां न्यायिक-व्यवस्थायाम् एकः सामान्यजनः अपि कस्यचित् नेतुः विरुद्धम् अभियोगं जेतुं शक्नोति ? यदि न जेतुं शक्नोति ? तर्हि तत्र किं कारणम् अस्ति ?

नेतॄणां न्यायाधीशेषु यत् नियन्त्रणं भवति तस्मात् कारणात् न्यायाधीशाः सम्यक् निर्णयान् न स्वीकुर्वन्ति। स्वतन्त्रतायाः एषः अभावः न्यायधीशं बाध्यं करोति यत् सः सर्वदा नेतुः पक्षे एव निर्णयं कुर्यात्। वयम् एतादृशीः बह्वीः घटनाः जानीमः यत्र धनाढयैः अपि च प्रभावशालिजनैः न्यायिकप्रक्रियां प्रभावयितुं प्रयासः कृतः। परन्तु भारतीय-संविधानम् एतादृशं हस्तक्षेपं न स्वीकरोति। अतः अस्माकं संविधाने न्यायपालिका पूर्णरूपेण स्वतन्त्रा कृता अस्ति।

एतस्याः स्वतन्त्रतायाः एकः पक्षः अस्ति " शक्तीनां वण्टनम्"। यथा भवद्भिः प्रथमाध्याये पठितम् आसीत्, अयम् अस्माकं संविधानस्य एकः आधारभूतः पक्षः अस्ति। एतस्य अर्थः अस्ति यत् विधायिका-कार्यपालिका-प्रभृतयः सर्वकारस्य अन्यशाखाः न्यायपालिकायाः कार्यप्रणालीं न बाधितुं शक्नुवन्ति।

शक्तीनाम् एतं विभाजनं समीचीनतया स्थापयितुम् इदम् अपि महत्त्वपूर्णम् अस्ति यत् उच्च-न्यायालयस्य सर्वोच्च-न्यायालयस्य च सर्वेषां न्यायाधीशानां नियुक्तौ सर्वकारस्य अन्यशाखानां कश्चित् अवरोधः न स्यात्। अतः एकदा नियुक्ति-अनन्तरं कस्यापि न्यायाधीशस्य पदात् निष्कासनं बहुकठिनं भवति।

न्यायपालिकायाः एषा स्वतन्त्रता न्यायालयेभ्यः बहु बलं ददाति । एतस्य बलस्य आधारेण न्यायपालिका विधायिकया कार्यपालिकया च शक्तीनां यः दुरुपयोगः क्रियते तं दुरुपयोगं रुणद्धि रोद्धुं शक्नोति वा । न्यायपालिका देशस्य नागराणां मौलिक-अधिकाराणां रक्षायाम् अपि महत्त्वपूर्णां भूमिकां निर्वहति यतो हि यदि कश्चित् अनुभवति यत् तस्य अधिकाराणाम् उल्लङ्घनं भवति तदा सः न्यायालयं प्रति गन्तुं शक्नोति ।

कारणद्वयं वदन्तु यत् लोकतन्त्रस्य कृते स्वतन्त्र-न्यायापालिका किमर्थम् अनिवार्या अस्ति ?

भारते न्यायालयानां संरचना कीदृशी अस्ति ?

अस्माकं देशे त्रयः भिन्न-भिन्न-स्तरीयाः न्यायालयाः भवन्ति। निम्नस्तरीयाः बहवः न्यायालयाः भवन्ति। एकः सर्वोच्च-न्यायालयः अस्ति। येषु न्यायालयेषु जनानां सर्वाधिकं कार्यं भवति, ते एव अधीनस्थाः न्यायालयाः अथवा जिल्लान्यायालयाः इति उच्यन्ते । एते न्यायालयाः सामान्यतया जिल्लायाम् अथवा उपमण्डलस्तरे अपि च कस्मिंश्चित् नगरे भवन्ति । एते बहुविधानां प्रकरणानां श्रवणं कुर्वन्ति । प्रत्येकं राज्यं जिल्लासु विभक्तं भवति अपि च प्रत्येकं जिल्लायाम् एकः जिल्ला-न्यायाधीशः भवति । प्रत्येकं राज्यस्य एकः सर्वोच्च-न्यायालयः भवति । अयं स्वस्य राज्यस्य सर्वतः उच्च-न्यायालयः भवति । एतेभ्यः उच्चनयायालयेभ्यः अपि महान् सर्वोच्च-न्यायालयः भवति। अयं देशस्य सर्वोच्च-न्यायालयः भवति यः नवदेहल्यां स्थितः अस्ति । देशस्य मुख्य-न्यायाधीशः सर्वोच्च-न्यायालयानां प्रमुखाः भवन्ति। सर्वोच्च-न्यायालयानां निर्णयाः देशस्य अन्यैः सर्वैः न्यायालयैः स्वीकरणीयाः भवन्ति।

निम्न-न्यायालयात् उपरिन्यायालयं यावत् अस्माकं न्याय-पालिकायाः संरचना कश्चित् पिरामिड् –सदृशः प्रतिभाति। उपर्युक्त-विवरणं पठित्वा अधोलिखितं चित्रं पूरयन्तु।



उच्च-न्यायालयानां स्थापना सर्वप्रथमं १८६२ तमे वर्षे कलिकत्ता-मुंबई-मद्रासेषु अभवत् एते त्रयाः प्रेसिडेंसी नगराणि आसन् । देहलीस्थस्य उच्चनयायालस्य गठनं १९६६ तमे वर्षे अभवत् । अद्य सम्पूर्णे देशे २४ उच्चनयायालयाः सन्ति । बहूनां राज्यानां स्वस्य उच्च-न्यायालयाः सन्ति तथा पञ्जाब-हरियाणा-राज्ययोः एकः एव सामूहिकः न्यायालयः चण्डीगढे अस्ति । अन्यस्मिन् पक्षे चतुर्णां पूर्वोत्तर-राज्यानाम् असम-नागालैण्ड-मिजोरम-अरुणाचल-प्रदेशानां कृते गुवाहाटी-मध्ये एकः एव उच्च-न्यायालयः स्थापितः अस्ति । आन्ध्रप्रदेशस्य तेलङ्गाणा-राज्यस्य च कृते एकः एव उच्च-न्यायालयः हैदराबादे स्थितः अस्ति । अधिकतराणां जनानां निकटतार्थं केषाञ्चित् उच्च-न्यायालयानां राज्यस्य इतरेषु भागेषु अपि शाखाः सन्ति ।

मद्रासस्य उच्चनयायालयः

पटनोच्चनयायालायः

कर्णाटकोच्चनयायालयः

किं विभिन्न-स्तराणाम् एते न्यायालयाः परस्परं सम्बद्धाः सन्ति ? आम् एवम् एव अस्ति । भारते अस्माकं पार्श्वे एकीकृतन्यायिक-व्यवस्था वर्तते । एतस्याः अर्थः अस्ति यत् उपरितनानां सर्वेषां न्यायालयानां निर्णयाः अधस्तनैः सर्वैः न्यायालयैः स्वीकरणीयाः भवन्ति । एतत् एकीकरणं ज्ञातुं निवेदनस्य व्यवस्था द्रष्टुं शक्यते । यदि कश्चित् मनुष्यः एतत् अनुभवति यत् निम्न-न्यायालयेन सम्यक्-निर्णयः न कृतः तदा सः तस्मात् उच्चतरं न्यायालयं प्रति गन्तुं शक्नोति अपि च तत्र पुनर्निवेदनं कर्तुं शक्नोति ।

पुनर्निवेदनस्य व्यवस्थां ज्ञातुम् आगच्छन्तु एकस्मिन् विषये विचारं कुर्मः । अयं, राज्यम् अर्थात् देहलीप्रशासनम् अपि च लक्ष्मणकुमारस्य अपि च अन्यस्य एकस्य अभियोगः अस्ति यः निम्न-न्यायालयतः सर्वोच्च-न्यायालयं यावत् प्राचलत् ।

फरवरी-मासस्य १९८० तमे वर्षे लक्ष्मणकुमारः २०वर्षीयया सुधागोयल इत्यनया विवाहं कृतवान् । तौ देहल्याम् एकस्मिन् भवने निवसतः स्म यत्र लक्ष्मणस्य भ्रातरः तेषां परिवारः च अपि निवसन्ति स्म । दिसम्बर-मासस्य द्वितीय-दिनाङ्के १९८० तमे वर्षे सुधायाः चिकित्सालये मृत्युः अभवत् सा अग्निना ज्वलिता आसीत् । सुधायाः गृहजनाः न्यायालये अभियोगं कृतवन्तः । यदा निम्न-न्यालयस्य समक्षे एषः अभियोगः आगतः तदा चतुर्णां प्रतिवेशिनाम् अपि साक्षिरूपेण न्यायालये आह्वानं जातम् । प्रतिवेशिभिः स्वकीयेषु कथनेषु उक्तं यत् दिसम्बर-मासस्य प्रथमायां रात्रौ ते सुधायाः करुण-क्रन्दनं श्रुतवन्तः अपि च ते एतस्य कारणं ज्ञातुं बलात् लक्ष्मणस्य गृहं प्रविष्टाः । तत्र ते दृष्टवन्तः यत् सुधायाः शाटके अग्निः ज्वलितः अस्ति । ते प्रतिवेशिनः सुधाम् एकस्यां गोण्यां कम्बले च वेष्टयित्वा अग्निं शान्तं कृतवन्तः । तदा सुधा तान् उक्तवती यत् तस्य श्वश्रू शकुन्तला तस्याः उपरि मृत्तिका-तैलं क्षिप्तवती अपि च तस्य पतिः लक्ष्मणकुमारः अग्निं प्रज्वालितवान् । अभियोग-समये सुधायाः पारिवारिक-जनैः अपि च एकेन प्रतिवेशिना उक्तं यत् सुधायाः श्वशुरालय-

पक्षीयाः तस्याः बहुताडनं कुर्वन्ति स्म। तेषां याचना आसीत् यत् प्रथमायाः सन्ततेः जाते सति तस्य पितृपक्षीयाः तेभ्यः महान्तं धनराशिम्, एकं स्कूटर-यानम् एकं शीतयन्त्रं (फ्रिज इति) च दद्युः। स्वस्य रक्षणार्थं लक्ष्मणः तस्य माता च उक्तवन्तौ यत् सुधा

दुग्धम् उष्णं कुर्वती स्म तदा तस्य शाटिकायाम् अग्निः प्रविष्टः एतेषां सर्वेषां कथनानाम् अपि च साक्ष्याणाम् आधारेण निम्न-न्यायालयः आदिष्टवान् यत् लक्ष्मणः तस्य माता अपि च शकुन्तलायाः ज्येष्ठः सुभाषचनद्रः सर्वे दोषिणः सन्ति अतः तेषां कृते मृत्युदण्डः दीयते इति।

नवम्बर-मासस्य १९८३ तमे वर्षे तैः त्रिभिः आरोपिभिः एतस्य निर्णयस्य-विरोधे उच्चनयायालये पुनर्निवेदनं कृतम्। उभयोः पक्षयोः अधिवक्तृणां कथनानि श्रुत्वा उच्च-न्यायालयः निर्णयं कृतवान् यत् सुधायाः मृत्युः एका दुर्घटना आसीत्। सा मृत्-तैल-चुल्ल्या ज्वलिता। न्यायालयेन लक्ष्मणः शकुन्तला सुभाषचनद्रः च त्रयः अपि निर्मोचिताः।

प्रायशः सप्तमकक्षायाः पुस्तके महिला-आन्दोलने केन्द्रितः चित्र-निबन्धः भवतां स्मृतौ स्यात्। तस्मिन् भवन्तः पठितवन्तः यत् १९८० तमे दशके समग्रस्य देशस्य महिला-सङ्घटनानि "यौतुकप्रथायाः कारण-भूतानां हत्यानां विरुद्धम् आन्दोलनानि कुर्वन्ति स्म। तानि महिला-सङ्घटनानि एतस्मात् विषयात् दुखितानि आसन् यत् न्यायालयैः एतादृशीषु घटनासु दोषिणः न दण्ड्यन्ते। उच्च-न्यायालयस्य उपर्युक्त-निर्णयैः एतादृश्यः जागरूक-महिलाः बहुपीडिताः। ताभिः अनेकेषु स्थानेषु प्रदर्शनानि कृतानि अपि च उच्चनयायालयस्य निर्णयस्य विरोधे सर्वोच्चनयायालये एका पुनर्याचिका योजिता। एषा पुनर्याचिका "इण्डियन फेडरेशन ऑफ वीमेन लायर्स" नामकसङ्घटनस्य पक्षतः योजिता। १९८५ तमे वर्षे सर्वोच्च-न्यायालयः लक्ष्मणः तस्य मातुः अपि च तस्याः भ्रातुः मोचनस्य निर्णयस्य विरोधे क्रियाकलापम् आरब्धवान्। अधिवक्तृणां तर्कान् श्रुत्वा सर्वोच्चनयायालयेन यः निर्णयः कृतः सः उच्चनयायालयस्य निर्णयतः पृथक् आसीत्। सर्वोच्च-न्यायालयः लक्ष्मणं तस्य मातरं च दोषिणौ इति निर्णीतवान् परन्तु सुभाषचनद्रः आरोपेभ्यः मुक्तः यतोहि तस्य दोषस्य पर्याप्त-साक्ष्याणि न प्राप्तानि आसन्। सर्वोच्च-न्यायालयेन उभयोः दोषिणोः कृते आजीवनं कारावासस्य दण्डः श्रावितः।

उपर्युक्तविषयं पठनानन्तरं द्वयोः वाक्ययोः लिखन्तु यत् पुनर्याचिकायाः विषये भवन्तः किं जानन्ति ?

अधीनस्थ-न्यायालयाः विभिन्न-नामभ्यः सम्बोध्यन्ते। ते ट्रायल-न्यायालयाः अथवा जिल्ला-न्यायालयाः, अतिरिक्तसत्र-न्यायाधीशः प्रधान-न्यायिक-न्यायाधीशः, मेट्रोपोलिटन- मजिस्ट्रेट, सिविल, न्यायाधीशः, न्यायालयः इत्यादिभिः नामभिः आहूयन्ते। एषः रायपुर-छत्तीसगढस्थस्य जिल्लान्यायालयस्य चित्रम् अस्ति।

विधि-व्यवस्थायाः विभिन्न-शाखाः काः काः वर्तन्ते ?

यौतुक-हत्यायाः एतत् प्रकरणं " समाज-विरुद्धः अपराधः" इत्यस्य श्रेण्यां गण्यते । अयम् अपराधिकस्य / अथवा फौजदारी इत्यस्य अधिनियमयोः उल्लङ्घनम् अस्ति । "फौजदारी" इति अधिनियमस्य अतिरिक्तम् अस्माकं विधि-व्यवस्था दीवानी-अधिनियमेन अथवा सिविल-अधिनियम-सम्बन्धित-प्रकरणानि अपि पश्यति । फौजदारी अथवा दीवानी इति अधिनियमस्य मध्यस्थं भेदं ज्ञातुम् अधोलिखितां तालिकां पश्यन्तु ।

क्र.	फौजदारी-अधिनियमः	दीवानी-अधिनियमः
१	एते एतादृशेभ्यः व्यवहारेभ्यः अथवा क्रियाभ्यः सम्बन्धिताः सन्ति ये अधिनियम-प्रक्रियायाम् अपराधाः इति गण्यन्ते । उदाहरणार्थं यथा-चौर्यं, यौतुकधनम्" इत्यस्य कृते महिलायाः उत्पीडनम्, हननम् इत्यादिः ।	एतेषाम् "अधिनियमानां सम्बन्धः व्यक्ति-विशेषस्य अधिकाराणाम् उल्लङ्घनेन अथवा अवहेलनया भवति । उदाहरणार्थं यथा - भूमेः विक्रयणं वस्तूनां क्रयणं भाटकं सम्बन्ध-विच्छेदादिभिः सह सम्बन्धिताः विवादाः एतस्य अधिनियमस्य अन्तर्गताः भवन्ति ।
२	एतस्मिन् अधिनियमे सर्वप्रथमं सामान्यतया प्रथमसूचनायाः (रिपोर्ट/प्राथमिकी(एफ.आई.आर.) नियोजनं भवति । तदनन्तरम् आरक्षकाः अपराधस्य निरीक्षणं कुर्वन्ति अपि च न्यायालयं प्रति अग्रेसरं कुर्वन्ति ।	प्रभावित-जनस्य पक्षतः न्यायालये एका याचिका नियोज्यते । यदि भाटक-सम्बन्धित-प्रकरणम् अस्ति तदा गृहस्वामी अथवा भाटकवासी अभियोगं नियोक्तुं शक्नोति ।
३	यदि व्यक्तिः दोषी इति सिद्ध्यति तदा सः कारागारः प्रेष्यते अपि च सः आर्थिक-दण्डेनापि दण्ड्यते ।	न्यायालयः कदाचित् न्यून-दण्डस्य व्यवस्थां करोति । उदारहरणं पश्यामः यथा- गृहस्वामिनः भाटकवासिनः च मध्ये कश्चित विवादः अस्ति तदा न्यायालयः एतम् आदेशम् अपि दातुं शक्नोति यत् भाटकवासी गृहं रिक्तं कुर्यात् अपि च शेष-धन-राशिम् अपि प्रत्यर्पयेत् ।

फौजदारी अपि च दीवानी इत्यनयोः अधिनियमयोः विषये भवन्तः यत् अवगच्छन्ति तस्य आधारेण एतां तालिकां पूरयन्तु --

उल्लङ्घनस्य विवरणम्	अधिनियमस्य शाखाः	स्वीकार्य-प्रक्रिया
केचन बालकाः विद्यालय-गमन-समये प्रतिदिनं बालिकाः बाधन्ते ।		
कश्चिद् भाटकवासी गृह-त्यागाय बाध्यः क्रियते अपि च सः गृहस्वामिनः विरुद्धं न्यायालये अभियोगं करोति ।		

किं प्रत्येकं मनुष्यः न्यायालयस्य शरणं गन्तुं शक्नोति ?

सिद्धान्तानुसारं भारतस्य सर्वे नागराः देशस्य न्यायालयानां शरणं ग्रहीतुं शक्नुवन्ति । एतस्य अयम् अभिप्रायः अस्ति यत् प्रत्येकं नागरस्य कृते न्यायपालिकायाः माध्यमेन न्यायस्य याचनायाः अधिकारः वर्तते । यथा भवन्तः गतकक्षासु पठितवन्तः । न्यायालयाः अस्माकं मौलिक-अधिकाराणां रक्षणं कुर्वन्ति तस्मिन् च महत्त्वपूर्णां भूमिकां निर्वहन्ति । यदि कश्चित् नागरः इत्थम् अनुभवति यत् तस्य मौलिकानाम् अधिकाराणाम् उल्लङ्घनं भवति तदा सः मनुष्यः न्यायार्थं न्यायालयं प्रति गन्तुं शक्नोति । न्यायालयस्य सेवाः सर्वेषां कृते समानरूपेण वर्तन्ते, परन्तु वास्तविकतायां निर्धनानां न्यायालयं प्रति गमनं बहुकठिनं भवति । अधिनियमप्रक्रियायां न केवलं पर्याप्त-धनस्य अपितु कार्यालयीयानाम् औपचारिकतानाम् अपि आवश्यकता भवति तथापि तत्र समयः अपि अधिकः नष्टः भवति । यदि कश्चित् निर्धन-मनुष्यः पठन-लेखनादिकं न जानाति अपि च तस्य सम्पूर्णः परिवारः दैनिक-श्रमेण चलति तदा एतादृशस्य मनुष्यस्य न्यायार्थं न्यायालयं प्रति गमनं बहुकठिनं भवति ।

एतत् एव तथ्यं मनसि निधाय १९८० तमे दशके सर्वोच्चनयायालयेन जनहित-याचिकायाः (पी.आई.एल.) व्यवस्था विकसिता आसीत् । एवम्प्रकारेण न्यायालयेन अधिकाधिकजनाः न्यायालयं प्रति गच्छेयुः तथाविधः प्रयासः कृतः । न्यायालयेन कस्यापि मनुष्यस्य कृते अपि वा संस्थायाः कृते अभावग्रस्तानां जनानां पक्षतः जनहितयाचिकायाः नियोजनस्य अधिकारः प्रदत्तः येषाम् अधिकाराणाम् उल्लङ्घनं भवति । न्यायालयेन अधिनियमानां प्रक्रिया अतीव सरला कृता । इदानीं सर्वोच्च-न्यायालयं प्रति अथवा उच्च-न्यायालयान् प्रति प्रेष्यमाणानि पत्राणि अपि जनहितयाचिकाः इति मन्यन्ते । प्रारम्भिकेषु वर्षेषु जनहितयाचिकायाः माध्यमेन बहुषु प्रकरणेषु जनेभ्यः न्यायः प्रदत्तः । बद्ध-कर्मकरान् अमानवीय-श्रमात् मोचयितुम् अपि च बिहार-प्रान्ते दण्डस्य अवधिं समाप्य अपि अनिर्मुक्तान् बन्दीन् मोचयितुं जनहितयाचिकायाः अपि प्रयोगः कृतः ।

किं भवन्तः जानन्ति यत् सर्वकारीयेषु अथवा सर्वकारानुदान-प्राप्त-विद्यालयेषु बालकानां कृते यत् मध्याह्न-भोजनं (मिड-डे-मील इति) दीयते तस्य व्यवस्था अपि जनहित-याचिकायाः परिणामस्वरूपम् एव अभवत् । वामतः प्रदत्तचित्राणि पश्यन्तु अपि च अधः प्रदत्त-विवरणं पठन्तु ।

चित्रम् –१ २००१ तमे वर्षे राजस्थान-उडीसयोः आगतस्य शुष्क-प्रकोपस्य कारणात् अथवा अनावृष्टि-वशात् लक्षशः जनानां समक्षे भोजनस्य महान् अभावः उत्पन्नः ।

चित्रम् – २ सर्वकारीय-अन्नभाण्डारण-गृहाणि अन्नेन पूरितानि आसन् । अत्यधिकाः गोधूमाः मूषकैः भक्षिताः ।

चित्रम् – ३ एतां स्थितिं दृष्ट्वा पीपुल्स यूनियन फॉर सिविल लिबर्टीज (पी.यू.सी.एल.) इति नामधेयेन सङ्घटनेन सर्वोच्च-न्यायालये एका जनहितयाचिका नियोजिता । याचिकायाम् उक्तम् आसीत् यत् संविधानस्य २१ तमे अनुच्छेदे प्रदत्तेषु जीवनस्य मौलिकाधिकारेषु भोजनस्य अधिकारः अपि सम्मिलितः अस्ति । तेन राज्यस्य एतत् कथनं हेतुं वा अनुचितम् इति सिद्धं कृतम् यत् तस्य पार्श्वे संसाधनानि न सन्ति । एतस्य आधारः अयम् आसीत् यत् सर्वकारीय-अन्न-भाण्डार-गृहाणि अन्नेन पूरितानि आसन् । तदा सर्वोच्च-न्यायालयेन आदेशः प्रदत्तः यत् सर्वेषां कृते भोजनस्य उपलब्धिः स्यात् एतत् राज्यस्य दायित्वम् अस्ति ।

चित्रम् – ४ फलतः सर्वोच्च-न्यायालयेन सर्वकारः आदिष्टः यत् सः वृत्तेः नूतनान् अवसरान् कल्पयेत्, अन्नस्य सर्वकारीयस्य आपणस्य माध्यमेन न्यूनेन मूल्येन भोजनस्य उपलब्धिं कारयेत् अपि च बालकानां कृते विद्यालये मध्याह्नभोजनं दीयेत् । न्यायालयेन सर्वकारीय-योजनानां क्रियान्वयनस्य विषये समाख्यां (रिपोर्ट) कर्तुं द्वयोः खाद्य-आयुक्तौ अपि नियुक्तौ ।

सामान्यस्य मनुष्यस्य न्यायालये प्राप्तिः एव न्यायस्य प्राप्तिः इति भवति । न्यायालयाः नागराणां मौलिकाधिकाराणां व्याख्याने एकां महत्त्वपूर्णां भूमिकां निर्वहति । यथा- भवद्भिः उपर्युक्ते उदाहरणे दृष्टम्, न्यायालयेन एव संविधानस्य २१तमस्य अनुच्छेदस्य व्याख्यानकाले इदम् उक्तम् आसीत् यत् जीवनस्य अधिकारेषु भोजनस्य अधिकारः अपि सम्मलितः भवति । अतः न्यायालयेन राज्यानि आदिष्टानि यत् तानि मध्याह्नस्य भोजनस्य व्यवस्थायाः सहितं सर्वेषां जनानां कृते भोजनस्य व्यवस्थां कुर्युः अपि च तस्यां दिशि आवश्यकं कार्यं कुर्युः ।

परन्तु न्यायालयस्य केचन निर्णयाः एतादृशाः अपि आसन् यत् तान् जनाः सामान्यजनानां कृते हानिप्रदान् अपि कथयन्ति । उदाहरणार्थं वदामः यथा निर्धनानाम् आवासस्य अधिकार-प्रभृतिषु विषयेषु कार्यं कुर्वतां कार्यकर्तृणां मान्यता अस्ति यत् निर्धनानां कुटीराः इत्येतेषां बहिष्कारस्य विषये न्यायालयेन ये निर्णयाः स्वीकृताः ते निर्णयाः पुरातनानां निर्णयानां विरुद्धाः सन्ति । सद्यः कृतेषु निर्णयेषु निर्धन-कुटीरान् नगरेषु अपि च तत्रत्याः वासिनः हीनदृष्ट्या अवलोक्यन्ते ।

ओल्गा-टेलिस इति विरुद्ध्य मुम्बई-नगर-निगमस्य अभियोगे न्यायालयेन एकः महत्त्वपूर्णः निर्णयः कृतः । एतस्मिन् निर्णये न्यायालयेन आजीविकायाः अधिकारः जीवनस्य अधिकारस्य अभिन्न-भागरूपेण उक्तः । अधोभागे एतस्य निर्णयस्य केचन अंशाः प्रदत्ताः सन्ति । तान् पठित्वा ज्ञायते यत् न्यायाधीशाः जीवनस्य अधिकारम् आजीविकायाः अधिकारेण सह नियोज्य कथं दृष्टवन्तः।

२१तमे अनुच्छेदे प्रदत्तस्य जीवनस्य अधिकारस्य परिधिः बहुव्यापी अस्ति । "जीवनम्" इत्यस्य अभिप्रायः केवलं जैविकस्य आस्तित्वस्य यत् निर्माणम् अस्ति तस्य स्थापनात् अधिकम् अस्ति । एतस्य अभिप्रायः केवलं एतत् एव नास्ति यत् अधिनियम-द्वारा निर्धारित-प्रक्रियया यथा मृत्युदण्ड-दाने अपि च तस्य क्रियान्वयनम् अपि वर्तते एतेन सह एव केनापि प्रकारेण कस्यापि मनुष्यस्य हत्यां वयं न कर्तुं शक्नुमः । जीवनस्य अधिकारस्य एषः एकः आयामः अस्ति । एतस्य अधिकारस्य एतावान् एव महत्त्वपूर्णः पक्षः आजीविकायाः अधिकारः अपि अस्ति । यतो हि कोऽपि मनुष्यः जीवनस्य उपयोगीनि साधनानि अर्थात् आजीविकायाः विना कश्चित् अपि जीवितुं न शक्नोति ।

कस्यापि व्यक्तेः रेलस्थानकतः अथवा आभीर-पल्लीतः निष्कासनम् एव तस्य आजीविकायाः साधनानां नाशः एव अस्ति । इयम् एका एतादृशी वार्ता अस्ति सा प्रत्येकं विषये प्रमाणीकरणीया इति नास्ति । प्रस्तुते प्रकरणे आनुभाविकैः साक्ष्यैः सिद्ध्यति यत् याचिकायाः कर्तारः आभीर-पल्लीषु रेलस्थानकेषु वा निवसन्ति स्म यतोहि ते नगरेषु लघु-वृत्तिषु संलग्नाः भवन्ति अपि च तेषां पार्श्वे अन्यत् किञ्चित् स्थानं वासार्थं न भवति। ते स्वकीयस्य कार्यकरण-स्थानस्य समीपे एव रेलस्थानकेषु पर्ण-कुटीरेषु एव निवसन्ति । अतः यदि तेषाम् अपसारणं ततः क्रियते तदा तेषां वृत्तिः अपि नष्टा भवेत् । अतः एतस्य निष्कर्षः अयम् अस्ति यत् याचिकायाः कर्तृणाम् उत्पाटनात् ते तेषां वृत्तितः अपि च्युताः भविष्यन्ति अतः इत्थं ते स्वकीयात् जीवनात् अपि वञ्चिताः भविष्यन्ति ।

यद्यपि पूर्वतनेषु निर्णयेषु यथा-१९८५ तमे वर्षे ओल्गा-टेनिस इति विरुद्ध्य मुम्बई-नगर-निगमस्य अभियोगे प्रदत्ते निर्णये) पर्णकुटीरस्थानां जनानाम् आजीविकायाः रक्षणस्य प्रयासः क्रियते स्म।

न्याय-पर्यन्तं सामान्यजनानां प्राप्तिः गमनम् अथवा तां प्राप्तिं प्रभावयितुम् एकः विषयः अयम् अपि अस्ति यत् अभियोगस्य श्रवणे न्यायालयाः बहूनि वर्षाणि यावत् समयस्य नाशं कुर्वन्ति। तं विलम्बम् एव मनसि निधाय प्रायशः एवम् उच्यते यत् "न्याये विलम्बः" अर्थात् "न्यायस्य हननम्"।

नवम्बरमासस्य २६ तिथौ २००७ तमे वर्षे भारतस्य मुख्यन्यायधीशः के.जी. बालाकृष्णन-महोदयः एकस्मिन् भाषणे अवदत् यत् "भारतीय-न्यायपालिकायां २६ न्यायाधीशैः युक्त एकः सर्वोच्च-न्यायालयः, तत्रापि ७२५ स्वीकार्य-पद-युक्ताः २१ उच्चनयायालयाः तत्रापि मार्च-मासस्य २००७ तमे वर्षे केवलं ५९७ न्यायाधीशाः आसन् अपि च तत्रापि 14,477 अधीनस्थ-न्यायालयाः/ न्यायाधीशाः च (31दिसम्बर, २००६ इति दिनाङ्के तेषां वास्तविकी सङ्ख्या ११,७६७ इति आसीत्) सन्ति।

भारते न्यायाधीशानां सङ्ख्या

क्रम*	न्यायालयस्य नामानि	स्वीकृत-पदानि	कार्यरताः	रिक्तानि
क	उच्चतमाः न्यायालयाः	३१	२८	३
ख	उच्चनयायालयाः	९८४	६३५	३४९
ग	जिल्लाः अधीनस्थ-न्यायालयाः च	१९,४२१	१५,०३९	?

* क तथा ख (नवंबर-मासस्य प्रथमः दिनाङ्कः २०१४ तमवर्षस्य स्थितिः) ; ग (दिसम्बर-मासस्य ३१ दिनाङ्के २०१३ तमवर्षस्य स्थितिः)

एतत् अतिरिच्य अयं विषयः अपि नैव अस्वीकर्तुं शक्यते यत् लोकतान्त्रिके भारते न्यायपालिकया एका महत्त्वपूर्णा भूमिका निर्वोढा। न्यायपालिका कार्यपालिकायाः विधायिकायाः च शक्तिषु अङ्कुशं स्थापितवती अपि च जन-अधिकाराणां सुरक्षा अपि कृतवती। संविधानसभायाः सदस्यैः एतादृश्याः न्यायपालिकया पूर्णतः सम्यक्-स्वप्नः दृष्टः आसीत् यः पूर्णरूपेण स्वतन्त्रः स्यात्। अयम् एव अस्माकं लोकतन्त्रस्य आधारभूतः पक्षः अस्ति।

अस्मिन् चित्रे मयी-मासस्य २२ दिनाङ्के १९८७ तमे वर्षे हाशिमपुरायाः मृतानां ४३ मुस्लिमजनानां केचन परिवारस्य सदस्याः दृश्यन्ते। एते परिवाराः गतेभ्यः विंशति-वर्षेभ्यः न्यायार्थं सङ्घर्षरताः सन्ति। अभियोगः यावता कालेन प्रारब्धः तावता एतावान् विलम्बः जातः तस्मात् कारणात् सितम्बर-मासस्य २००२ तमे वर्षे सर्वोच्च-न्यायालयेन एतत् प्रकरणम् उत्तर-प्रदेशात् देहलीं प्रति स्थानान्तरितम्। अयम् अभियोगः अधुना अपि प्रचलति। तस्मिन् प्रोविंशियल आर्म्ड कॉंस्टेब्युलरी (पी.ए.सी.) इत्यस्य एकोनविंशत्यां जनानां विरुद्धं अभियोगाः चलन्ति। एतस्मिन् अभियोगे २००७ तमवर्षं यावत् केवलं त्रयाणां साक्षिणां कथनानि नियोजितानि। (मयी-मासस्य २४ दिनाङ्के २००७ तमे वर्षे प्रेस क्लब, लखनऊ –मध्ये एतत् चित्रं गृहीतम् अस्ति।)

जिल्ला-न्यायालयेषु अधीनस्थ-न्यायालयेषु च रिक्त-पदानां सङ्ख्यायाः गणनां कुर्वन्तु। न्यायाधीशानाम् अभावात् अभियोग-कर्तृणां कृते न्यायप्राप्तौ जायमानस्य प्रभावस्य चर्चां कुर्वन्तु।

अभ्यासः

१. भवन्तः पठितवन्तः यत् "अधिनियम-शासन-स्थिरीकरणं मौलिक-अधिकाराणां क्रियान्वयनम्" न्यायपालिकायाः एकं मुख्यं कार्यं भवति। भवतां दृष्टौ एतत् महत्त्वपूर्णं कार्यं कर्तुं न्यायपालिकायाः स्वतन्त्रता आवश्यकी भवति।

२. प्रथमाध्याये मौलिकाधिकाराणां सूची प्रदत्ता अस्ति। तां पुनः पठन्तु। भवन्तः एतत् कथम् अनुभवन्ति यत संवैधानिकस्य उपचारस्य अधिकारः न्यायिक-समीक्षायाः विचारेण सम्बद्धः अस्ति ?

३. अधः त्रिस्तरीयाः न्यायालयाः प्रदर्शिताः। प्रत्येकं पुरतः लिखन्तु यत् तेन न्यायालयेन सुधा-गोयलस्य विषये किं निर्णीतम् ? स्वस्य उत्तरं कक्षायाः अन्यविद्यार्थिभिः प्रदत्तैः उत्तरैः सह मेलयित्वा पश्यन्तु।



४. सुधा-गोयल-विषयं मनसि निधाय अधोलिखितानि कथनानि पठन्तु । यानि वक्तव्यानि समीचीनानि सन्ति तेषु सम्यक्-चिह्नं योजयन्तु अपि च यानि असमीचीनानि सन्ति तानि सम्यक्-कुर्वन्तु।

(क) आरोपिणः एतत् प्रकरणम् उच्चनयायालयं नीतवन्तः यतोहि ते निम्न-न्यायालयात् सन्तुष्टाः न आसन्।

(ख) ते सर्वोच्च-न्यायालयस्य निर्णय-विरोधे उच्च-न्यायालयं गतवन्तः।

(ग) यदि आरोपिणः सर्वोच्च-न्यायालयस्य निर्णयात् सन्तुष्टाः न सन्ति तदा पुनः निम्न-न्यायालयं गन्तुं शक्नुवन्ति।

५. भवन्तः इत्थं किमर्थम् अनुभवन्ति यत् १९८० इति दशके प्रारब्धा जनहितयाचिकायाः व्यवस्था सर्वेभ्यः न्यायप्रदानस्य दृष्ट्या एकः महत्त्वपूर्णः प्रयासः अस्ति ?

६. "ओल्गा-टेनिस"इत्येतं विरुद्ध्य मुम्बई-नगर-निगमस्य अभियोगे प्रदत्त-निर्णयस्य अंशान् पुनः एकदा पठन्तु । एतस्मिन् निर्णये उक्तम् अस्ति यत् आजीविकायाः अधिकारः जीवनस्य अधिकारस्य भागः अस्ति। स्वशब्देषु लिखन्तु यत् एतेन वक्तव्येन न्यायाधीशानां कः अभिप्रायः अस्ति ?

७. "न्याये विलम्बः अथवा न्यायस्य हननम्" एतस्मिन् विषये एकां कथां रचयतु ?

८ अग्रिमे पृष्ठे शब्दसङ्कलने प्रदत्तस्य प्रत्येकं शब्दस्य माध्यमेन वाक्यं रचयतु।

९. इदं चित्रं भोजनस्य अधिकाराभियान-द्वारा निर्मितम्।


बुभुक्षया मृत्युः
उत्तरदायी कः
सर्वकारस्य कर्तव्यम्
प्रत्येकं मनुष्यः आहारं प्राप्नुयात्।
कश्चित् बुभुक्षितः न शयनं कुर्यात्।
बुभुक्षापत्ति-ग्रस्ताः अशक्ताः वृद्धाः, विकलाङ्गाः, विधवाः हत्यादिषु विशिष्टम् अवधानं भवेत्।
कुपोषणेन बुभुक्षया च कस्यापि मरणं न भवेत्।
सर्वकारः स्वस्य दायित्वस्य निर्वहणं न कुर्यात् तदा न्यायालये सः उत्तरदायी भविष्यति।राज्यसर्वकारस्य अपि च केन्द्र-शासित-प्रदेशानां मुख्यसचिवाः प्रशासकाः च।
"बुभुक्षितानि उदराणि पूरिताः भाण्डागाराः"! न चलिष्यति, न चलिष्यति!!"
भोजनाधिकाराय अभियानम्

एतत् चित्रं पठित्वा भोजनस्य अधिकार-विषये सर्वकारस्य दायित्वानां सूचीं निर्मान्तु।

अस्मिन् चित्रे उक्तम् अस्ति यत् " बुभुक्षितानि उदराणि पूरितानि भाण्डागाराणि"! न चलिष्यति , न चलिष्यति !!" एतत् वक्तव्यं ६१ तमे पृष्ठे प्रदत्ते भोजनाधिकार-विषये प्रदत्तचित्र-निबन्धैः मेलयित्वा पश्यन्तु।

शब्द-सङ्कलनम्

मोचनम् (बरी करना) - यदा न्यायालयः कम् अपि मनुष्यं तेभ्यः आरोपेभ्यः मोचयति येषाम् आधारेण तस्य विरुद्धम् अभियोगः चालितः आसीत् एतत् एव मोचनम् इति कथ्यते।

पुनर्विचार-प्रार्थना - निम्नन्यायालयस्य निर्णयं विरुद्ध्य यदा कश्चित् पक्षः तस्मिन् पुनर्विचाराय उच्चनयायालयं गच्छति तदा सः एव पुनर्विचारः इति उच्यते।

क्षति-पूरण-धनम् – कस्याश्चित् हानेः अथवा क्षतेः पूरणार्थं प्रदत्तधनम् एव क्षतिपूरणधनम् इति उच्यते।

निष्कासनम् – अधुना जनाः यस्मिन् गृहे अथवा भूमौ निवसन्ति यदि ततः तेषाम् अपसारणं क्रियते चेत् तद् एव निष्कासनम् इति उच्यते।

उल्लङ्घनम् - कस्यचित् अधिनियमस्य अवहेलनम् अथवा मौलिक-अधिकाराणां हननस्य क्रिया एव उल्लङ्घनम् इति कथ्यते।

॥ इति पञ्चमाध्यायः ॥

षष्ठः अध्यायः

अस्माकम् आपराधिक – न्यायप्रणाली

यदा वयं कञ्चित् जनम् अपराधं कुर्वन्तं पश्यामः तदा सर्वप्रथमं वयम् आरक्षिणः सूचयामः। यथार्थ-जीवने अथवा चलचित्रेषु भवद्भिः दृष्टं स्यात् यत् आरक्षकालयस्य अधिकारिणः प्राथमिकीं सूचनां लिखन्ति, अपराधिनः च गृह्णन्ति। अपराधिनः ग्रहीतुम् आरक्षकाणां या भूमिका भवति तस्याः आधारेण बहुधा एवम् अनुभूयते यत् आरक्षकाः एव एतत् निश्चिन्वन्ति यत् कः अपराधी अस्ति अथवा अपराधी नास्ति। यदा कश्चित मनुष्यः अधिगृह्यते तदा न्यायालयः एव निश्चिनोति यत् सः आरोपी वास्तविकतायां दोषी अस्ति अथवा नास्ति। संविधानस्य अनुसारं, यदि कस्मिन् अपि मनुष्ये कश्चित् आरोपः क्रियते तदा तस्य निष्पक्ष-श्रवणस्य अधिकारः भवति।

किं भवन्तः जानन्ति यत् निष्पक्ष-श्रवणस्य अवसर-प्राप्तेः कः अभिप्रायः अस्ति? किं भवद्भिः एफ.आई.आर. अर्थात् प्राथमिक्याः विषये श्रुतम् अस्ति? अथवा किं भवन्तः जानन्ति यत् सर्वकारीयः वाक्कीलः कः भवति? एतस्मिन् अध्याये वयं चौर्यस्य एकस्याः काल्पनिक-घटनायाः माध्यमेन इदं ज्ञातुं प्रयत्नं करिष्यामः यत् न्यायप्राप्तेः प्रक्रिया कथं प्रचलति अपि च आपराधिक-न्यायस्य व्यवस्थायां भिन्न-भिन्न-जनानां का भूमिका वर्तते? एतद् अवधातव्यं यत् अधिकतराः विषयाः तया प्रक्रियया एव निर्गच्छन्ति यस्याः अस्माभिः स्वस्य काल्पनिके उदाहरणे उल्लेखः कृतः अस्ति। फलस्वरूपम् एतासां प्रक्रियाणाम् अवगमनम् अपि च अपराधिक-न्याय-व्यवस्थायां विभिन्नानां जनानां भूमिकानाम् अवगमनं महत्त्वपूर्णम् अस्ति। यदि कदाचित् एतादृशः अवसरः आयाति तदा एतत् ज्ञानं भवतां कृते उपयोगिनीं भूमिकां निर्वोढुं शक्नोति।



मुम्बई-नगरस्य एकस्मिन् गृहे श्रीमती-शिन्दे कुत्रचित् गमनाय सज्जां करोति। विगत-एक-होरातः सा स्वकण्ठ-हारम् अन्वेषयति।

शीघ्रं करोतु, बिलम्बो जायते विवाहकार्यक्रमं गन्तुम्।
अहं स्वकीयं स्वर्णकण्ठहारं न पश्यामि ....! कपाटिकायाम् अपि नास्ति अहम् अनुभवामि यत् शान्तिः मम कण्ठहारं चोरितवती। मम प्रकोष्ठस्य सज्जासमये सा तत्र अधिकं कालं यापयति।

शान्ति-हेमब्रामः गतत्रिभ्यः वर्षेभ्यः एतस्मिन् भवने कार्यं कुर्वन्ति।

श्रीमान् शिन्दे शान्तेः मञ्जूषायाः निरीक्षणं करोति तत्र च एकस्मिन् पुटके सः १०,००० रुप्यकाणि प्राप्नोति। सः शान्तये क्रुध्यति सः आश्वस्तः भवति यत् शान्तिः तं कण्ठहारं विक्रीणवती अपि च एतत् तस्य एव धनम् अस्ति।

शान्तिःकिं भवती अधुना चौर्यम् अपि प्रारब्धवती ? तदपि स्वर्णकण्ठ-हारस्य ! भवती स्वकीयां मञ्जूषाम् आनयतु अहं तस्य निरीक्षणं करिष्यामि। अस्माभिः आरक्षकाः आहूताः अतः भवती अधुना कण्ठहारं प्रत्यर्पयतु।
न मान्ये मया चौर्यं न कृतम्।

श्रीमान्-शिन्दे आरक्षिगृहं प्राप्नोति।

शिन्दे महोदयस्य कथनं श्रुत्वा उप-निरीक्षकेण प्राथमिकी स्वीकृता।



शिन्दे महोदयःउपनिरीक्षकेण सह गृहम् आगच्छति ।

इदानीम् अहम् एतस्य चौर्यस्य विषये श्री-शिन्दे-महोदयस्यअपि च तस्य भार्यायाः वक्तव्यानि ग्रहीष्यामि। रूप्यक-पुटकं पिधाय प्रमाणरूपेण सार्धं नयामि । अपि च अहं शान्तिं गृहीत्वा आरक्षिगृहं नयामि ।
कृपां कृत्वा माम् आरक्षिगृहं न नयतु । अहं हारं न चोरितवती । इदं मम सञ्चितं धनम् अस्ति ।

शान्त्याः भ्राता सुशीलः आगच्छति अपि च उपनिरीक्षकं राव-महोदयं प्रार्थयति यत् सः शान्तिं मक्तां कुर्यात् ।

सा सुवर्णहारं चोरितवती भवान् न्यायालयात् प्रातिभाव्यपत्रं गृहीत्वा आगच्छतु ।
परन्तु अहं वाक्कीलस्य शुल्कं कुतः आनेष्यामि अपि च तस्य कृते कः प्रतिभावी भविष्यति ? भवता तु अस्माकं सम्पूर्णं धनं गृहीत्वा स्वस्य पार्श्वे स्थापितम् ।

उपनिरीक्षकेण रावमहोदयेन सुशीलः अपि दिनद्वयं यावत् कारागारे निपातितः । तम् उपनिरीक्षकः रावः अपि च अन्यः आरक्षकाः अपि ताडयन्ति गालिकानां प्रयोगं च कुर्वन्ति । ते तस्युपरि बलप्रयोगं कुर्वन्ति यत् सः आरोपं स्वीकुर्यात् । ते तं कथयन्ति यत् सः अपि च तस्य भगिनी-शान्तिः गृह-कर्मकराणाम् एकं समूहं चालयन्ति अपि च सः समुहः गृहेभ्यः स्वर्णाभूषणानि चोरयति शिन्दे-महोदयस्य प्रतिवेशात् स्वर्णलोपस्य कासाञ्चित् घटनानां सूचनाः आगताः । यदा सुशीलः पौनःपुन्येन एतत् एव कथयति यत् सः निर्दोषः अस्ति अपि च सः कस्मिंश्चित् उद्योगे भृतिं करोति तदा दिनद्वयानन्तरम् आरक्षकाः तं मोचयन्ति ।

२३.०८.२००६

न्यायालयेन एकमासानन्तरं शान्तेः प्रतिभाव्यपत्रं तु स्वीकृतं परन्तु कश्चित् अपि २०००० रूप्यकाणि दत्वा तस्याः प्रतिभावी भवितुं तत्परः न आसीत् । परिणामतः प्रतिभाव्यपत्रस्य स्वीकृत्याः अनन्तरम् अपि सा कारागारे एव अतिष्ठत् । सा गम्भीर-दुःखे वर्तते । सा भीता वर्तते यत् अभियोगस्य कः परिणामः भविष्यति ।

१४.०९.२००६

आरक्षकैः न्यायाधीशस्य न्यायालये आरोपपत्रं नियुक्तम् । न्यायालय-पक्षतः आरोपपत्राणां साक्षिक-धनानां च एका प्रतिकृतिः शान्त्यै प्रदत्ता । शान्तिः न्यायालयं वदति यत् चौर्यस्य एतस्मात् असत्यारोपात् रक्षितुं तस्याः पार्श्वे कश्चित वाक्कीलः नास्ति ।

न्यायाधीश-महोदयः शान्त्याः कथनं श्रुत्वा अधिवक्त्रीं कमलारॉय-महोदयां सर्वकारि-व्ययद्वारा रक्षण-पक्षस्य वाक्कीलं नियोजयति ।

संविधानस्य २२ द्वाविंशतितमस्य अनुच्छेदस्य अनुसारं प्रत्येकं व्यक्तिः एकेन वाक्कील-माध्यमेन स्वरक्षणस्य मौलिकाधिकारं प्राप्तवान् अस्ति । संविधानस्य ३९ तमानुच्छेदानुसारम् एतादृशानां जनानां कृते अधिवक्तृव्यवस्थायाः दायित्वं राज्यस्य उपरि स्थापितम् अस्ति यः निर्धनः अस्ति अथवा केनापि अन्यकारणेन वाक्कीलं न नियोक्तुं शक्नुवन्ति ।

11.12.06

अधिवक्त्री कमला-रॉयः न्यायालये शान्त्या सह मिलति।


एतानि मम अभियोगस्य पत्राणि सन्ति। मम स्वामिनः हार-चौर्यस्य मिथ्या-आरोपं योजितवन्तः।
ते शान्तेः पेटिकायां १०,००० रूप्यकाणि प्राप्तवन्तः। ते अनुभवन्ति यत् सा हारं क्रीत्वा एव धनं प्राप्तवती। परन्तु एतत् आवयोः द्वयोः रक्षितधनम् अस्ति।

न्यायालयः शान्तिम् आरोपयति यत् सा श्रीमती-शिन्दे-महोदयायाः स्वर्ण-कण्ठ-हारं चोरयित्वा तस्य विक्रयणं कृत्वा १०,००० इति रूप्यकाणि प्राप्तवती तानि तस्याः पार्श्वे प्राप्तानि।

न्यायाधीशस्य समक्षे अभियोगः प्रारभते।

०८.०३.०७

सर्वकारि-वाक्कीलः राज्यपक्षतः अभियोगे उपस्थितः भवति। सः श्रीमती-शिन्दे-महोदयां शिन्दे-महोदयं च मुख्य-साक्षि-रूपेण प्रस्तौति।

तर्हि अधुना वदतु श्रीमती-शिन्दे ! भवत्याः कण्ठहारः कथं लुप्तः ?
मया सवर्णहारः कपाटिकायां स्थापितः आसीत्। शान्तिः तं चोरितवती। शान्तिम् परित्यज्य कश्चित् अपि मम प्रकोष्ठं न प्रविशति। श्रीमान् शिन्दे-महोदयः मम पुरतः तस्याः पेटिकायाः निरीक्षणं कृतवान्। तदा तत्र एकस्मिन् पुटके १०,००० रूप्यकाणि दृष्ट्वा वयं तु आश्चर्यचकिताः अभवाम। शान्तिः एतत् धनं मम कण्ठहारं क्रीत्वा प्राप्तवती। सा चौरिणी अस्ति।

तदनन्तरम् अधिवक्त्री रॉयः श्रीमती-शिन्दे-महोदयां प्रति प्रश्नान् करोति।

तर्हि भवती एतत् कथयति यत् भवती शान्तिं चौर्यं कुर्वतीं न दृष्टवती। न तु भवती तस्याः पार्श्वे चोरित-हारं प्राप्तवती। गतत्रिभ्यः वर्षेभ्यः शान्तिः भवत्याः गृहे कार्यं करोति परन्तु एतेषु वर्षेषु भवत्याः गृहात् एकम् अपि वस्तु न लुप्तं न केनापि चोरितम् अपि च भवती तस्यै प्रतिमासं १००० रूप्यकाणि अपि वेतनरूपेण ददाति।

२०.०४.०७

अधिवक्त्री-रॉयः रक्षितपक्षस्य साक्षिरूपेण सुशीलात् अपि च तस्य स्वामिनः काञ्चन प्रश्नान् पृच्छन्ति। एतयोः द्वयोः कथनाधारेण सुश्री-रॉयः इदं प्रमाणीकरोति यत् शान्तेः मञ्जूषातः प्राप्तानि १०००० रूप्यकाणि सुशीलस्य अथ च शान्तेः श्रमस्य राशिः अपि भवितुं शक्नोति।

यदा अभियोगः समाप्ति-पथे आगच्छति तदा सुशीलः जानाति यत् निरीक्षिक-शर्मा यूनाम् एकस्य समूहस्य रहस्योद्घाटनं कृतवान् । एतस्य समूहस्य सदस्याः शिन्दे-महोदयस्य प्रतिवेशात् आभूषणानि चोरयन्ति । श्रीमती-शिन्दे-महोदयायाः पुत्रस्य कानिचन मित्राणि एतस्य समूहस्य सदस्याः सन्ति । तेषां सकाशात् श्रीमती-शिन्दे-महोदयायाः हारः प्राप्तः । सुशीलः एतां वार्ताम् अधिवक्त्री-रॉय-महोदयां वदति । अधुना अधिवक्त्री- रॉय-महोदया रक्षण-पक्षस्य साक्षि-रूपेण निरीक्षक-शर्माणं न्यायालये प्रस्तौति ।

निरीक्षक-शर्मन्, किं भवान् अस्मान् दर्शयितुं शक्नोति यत् भवान् किं किं प्राप्तवान् ?
आम्, श्रीमती-शिन्दे-मान्ये स्वकीयं हारं परिचितवती । अस्माभिः युवकानाम् एकः समूहः गृहीतः येन अयं हारः चोरितः आसीत् । तैः युवकैः स्व-आरोपः स्वीकृतः । एषः हारः तैः एव चोरितः आसीत् ।

१५.०७.०७

न्यायाधीश-महोदयः सर्वेषां साक्षिणां वृन्तान्तान् शृणोति । निरीक्षक-शर्मणः वृत्तान्तं श्रवणानन्तरम् अधिवक्त्री-रॉयः न्यायाधीशस्य पुरतः स्वतर्कम् उपस्थापयति यत् अधुना शान्तिः निर्दोषा अस्ति इति प्रमाणितम् अस्ति अतः एतस्याः मोचनं स्यात् ।


शान्ते भवती चौर्यारोपात् मोचिता अस्ति । आरक्षकैः भवत्याः सकाशात् यत् दश-सहस्रं प्राप्तम् आसीत् तद् भवत्यै प्रत्यर्पयिष्यते । मया लिखितरूपेण विशेषरूपेण च कथितम् अस्ति यत् अपराधस्य विवेचने उपनिरीक्षक-राव-महोदयस्य यः प्रमादः त्रुटिः वा वर्तते तस्याः विशेषरूपेण निरीक्षणं करिष्यते तस्य कारणात् भवती कारगारं गन्तुं बाद्ध्या जाता ।

एतस्याः घटनायाः आधारेण भवन्तः द्रष्टुं शक्नुवन्ति यत् आरक्षिणः, सर्वकारीयाः अधिवक्तारः, रक्षणपक्षस्य अधिवक्ता न्यायाधीशः च एते चत्वारः अधिकारिणः आपराधिक-न्यायस्य व्यवस्थायां मुख्याः जनाः भवन्ति । एतस्मिन् विषये भवद्भिः एतेषां चतुर्णां भूमिका दृष्टा । आगच्छन्तु अधुना तेषां भूमिकाम् इतोऽपि व्यापकस्तरेण पश्यामः ।

अपराधस्य निरीक्षणे आरक्षकाणां का भूमिका वर्तते ?

आरक्षकाणाम् एकं महत्त्वपूर्णं कार्यं भवति कस्यापि अपराधस्य विषये प्राप्तायाः सूचनायाः निरीक्षणम् भवेत् । निरीक्षणार्थं साक्षिणां वृत्तानि सङ्गृह्यन्ते अपि च साक्ष्याणि एकत्रीक्रियन्ते । एतस्य निरीक्षणस्य आधारेण आरक्षकाः स्वाभिमतिं निर्मान्ति । यदि आरक्षकाः अनुभवन्ति यत् साक्ष्यैः आरोपिणः दोषः प्रमाणीभवति इति दृश्यते तदा आरक्षकाः न्यायालये आरोपपत्रं नियोजयन्ति । यथा अध्यायस्य प्रारम्भे एव उक्तम् आसीत् यत् निर्धारणम् आरक्षकाणां कार्यं नास्ति यत् कोऽपि जनः दोषी अस्ति अथवा नास्ति । एतत् कार्यं न्यायाधीशस्य अस्ति ।

द्वितीये एकाङ्के भवन्तः अधिनियमस्य शासनस्य विषये पठितवन्तः । एतस्य साक्षात् अयम् अर्थः भवति यत् प्रत्येकं जनः देशस्य अधिनियमानाम् अधीनम् अस्ति । आरक्षकाः अपि एतस्य अधिनियमस्य अन्तर्गताः भवन्ति । परिणामतः आरक्षकैः सर्वदा अधिनियमस्य आधारेण मानवस्य अधिकाराणां सम्माननं कुर्वद्भिः निरीक्षणं करणीयम् । सर्वोच्च-न्यायालयेन निग्रहणस्य स्वाधीकरणस्य पृच्छायाः विषये, आरक्षकाणां कृते च केचन दिशानिर्देशाः निर्धारिताः सन्ति । एतेषां दिशानिर्देशानाम् अनुसारम् आरक्षकाणां पार्श्वे निरीक्षणकाले कस्यापि जनस्य हननं पीडनं ताडनम् अथवा गुलिकाप्रहारस्य च अधिकारः नास्ति । कस्यापि लघुतरस्य अपराधस्य कृते आरक्षकाः कम् अपि न दण्डयितुं शक्नुवन्ति।

संविधानस्य २२ तमे अनुच्छेदे अपि च फौजदारी इति अधिनियमे प्रत्येकं निगृहीतस्य जनस्य निम्नलिखिताः मौलिकाः अधिकाराः वर्तन्ते ---

- निग्रहणकाले तस्य पार्श्वे एतत् ज्ञातुम् अधिकारः वर्तते यत् निग्रहणं कस्मात् कारणात् भवति ।
- निग्रहणस्य २४ होराभ्यन्तरे न्यायधीशस्य समक्षं गमनस्य अधिकारः अस्ति ।
- निग्रहणकाले अथवा बन्धने कथञ्चित् अपि दुर्व्यवहारात् अथवा यातनातः रक्षितुम् अधिकारः वर्तते ।
- पुलिसबन्धे प्रदत्तं स्वीकृति-वृत्तान्तम् आरोपि-विरुद्धं साक्ष्य-रूपेण न प्रयोक्तुं शक्यते ।
- पञ्चदश-वर्षेभ्यः न्यून-वयसः बालकः महिला च केवलं प्रश्नान् प्रष्टुं आरक्षकालयं प्रति न आह्वातुं शक्येते ।

भवन्तः इत्थं किमर्थम् अनुभवन्ति यत् आरक्षकाः बन्धनस्य समये स्वदोषं स्वीकुर्वता आरोपि-द्वारा प्रदत्त-वक्तव्यानि तस्य विरुद्धं साक्ष्यरूपेण न प्रयोक्तुं शक्नुवन्ति ?

सर्वोच्चनयायालयेन कस्यापि जनस्य निग्रहणस्य बन्धनस्य पृच्छायाः च विषये आरक्षकाणाम् अन्यसंस्थानां कृते च केचन विशिष्ट-नियमाः प्रक्रियाः च निर्धारिताः सन्ति । एते नियमाः डी.के.बसुः इति दिशानिर्देशाः उच्यन्ते । तेषु केचन दिशानिर्देशाः इत्थं सन्ति –

- ग्रहण-कर्तुः अथवा निरीक्षकस्य आरक्षिणः अधिकारिणः वेशभूषायां तस्य परिचयपत्रं नामपट्टः अथवा पदविषयिणी सूचना स्पष्टरूपेण स्यात् ।
- निग्रहणकाले निग्रहण-सूचना-पत्र-रूपेण (अरेस्ट-मेमो) इति अस्मिन् निग्रहण-सम्बन्धि-सम्पूर्ण-विवरण-पञ्जिकायाः सिद्धता स्यात् । तस्यां निग्रहण-समयस्य दिनाङ्कस्य च उल्लेखः स्यात् । तस्याः सत्यापनस्य कृते न्यूनातिन्यूनम् एकः साक्षी अवश्यमेव स्यात् । सः साक्षी निगृहीत-जनस्य परिवारिकजनः सम्बन्धिः वा अपि भवितुं शक्नोति । निग्रहण-पत्रे निगृहीत-जनस्य हस्ताक्षराणि अपि भवेयुः ।
- निगृहीत-जनस्य बन्धकस्य च अथवा यस्मात् पृच्छा क्रियते एतादृशस्य जनस्य कस्यचित् सम्बन्धिनः अथवा शुभचिन्तकस्य सूचनायाः दानस्य अधिकारः वर्तते ।
- यदा निगृहीत-जनस्य मित्रं सम्बन्धिः वा तस्मात् जनपदात् बहिः भवति अथवा बहिः निवसति तदा निग्रहणस्य अष्टौ द्वादश वा होरासु तस्य सम्बन्धिनः समीपे तस्य निग्रहणस्य सूचना अथवा यस्मिन् स्थाने सः बन्धकरूपेण अस्ति तस्य स्थानस्य विषये सूचना प्रेषणीया भवति ।

1. आगच्छन्तु अधुना शान्तेः कथां प्रति पुनः चलामः एतेषां प्रश्ननां च उत्तराणि अन्वेषयामः –

   (क) यदा चौर्यस्य आरोपे शान्तिः निगृहिता, तस्मिन् समये उपनिरीक्षक-रावः तस्य भ्रातरं सुशीलम् अपि द्वे दिने यावत् आरक्षकनिग्रहे स्थापितवन्तः । किं तस्य आरक्षकैः निग्रहणम् अधिनियमानाम् आधारितम् आसीत् ? किम् एतस्मात् डी.के. बसुः इति निर्देशानाम् उल्लङ्घनं जातम् ?

   (ख) किम् उपनिरीक्षकः राव-महोदयः शान्तेः निग्रहणे अपि च तस्याः विरुद्धम् अभियोगस्य योजनात् पूर्वं साक्षिभ्यः पर्याप्ताः पृच्छाः कृताः अपि च आवश्यकानि सर्वाणि प्रमाणानि एकत्रीकृतानि ? आरक्षकाणां दायित्वस्य दृष्ट्या भवतां मते उपनिरीक्षकेण राव-महोदयेन निरीक्षणस्य दृष्ट्या अन्यत् किं किं करणीयम् आसीत् ?

२. आगच्छन्तु अधुना किञ्चित् पृथक् स्थितेः दृष्ट्या एनं विषयं पश्यामः । कल्पनां कुर्वन्तु यत् शान्तिः तस्याः भ्राता सुशीलः च आरक्षकालयं गत्वा दूषणं सूचयति यत् शिन्दे-महोदयस्य विंशतिवर्षीयेण पुत्रेण तस्य १५,००० रक्षित-रूप्यकाणि चोरितानि । किं भवन्तः अनुभवन्ति यत् आरक्षकगृहस्य प्रभारी शीघ्रं तस्य प्राथमिकीं (एफ.आई.आर.) नियोक्ष्यति लेखिष्यति वा ? एतादृशानि कारणानि लिखन्तु यानि भवतां मते प्राथमिकी-लेखने (एफ.आई.आर.) अथवा अलेखने आरक्षकाणां निर्णयं प्रभावयन्ति ।

प्रथम-सूचना-समाख्या अथवा प्राथमिकी (एफ.आई.आर.)

आरक्षकाः प्राथमिक्याः अनन्तरम् एव कस्यापि अपराधस्य निरीक्षणं प्रारब्धुं शक्नुवन्ति। अधिनियमे उक्तम् अस्ति यत् कस्यापि संज्ञेय-अपराधस्य सूचनायाः प्राप्तौ आरक्षकगृहस्य प्रमुखेण अधिकारिणा झटिति प्राथमिकी लेखनीया । आरक्षकाणां कृते इयं सूचना लिखितरूपेण अथवा मौखिक-रूपेण अपि प्राप्तुं शक्यते । प्राथमिक्यां प्रायशः घटनायाः दिनाङ्कः समयः स्थानस्य च उल्लेखः क्रियते । तस्यां घटनायाः मूलतथ्यानां घटनानां च विवरणम् अपि लिख्यते । यदि अपराधिनां परिचयः स्यात् तदा तेषां नामानि साक्षिणां च उल्लेखः अपि क्रियते । प्राथमिक्यां दूषणस्य सूचनायाः नियोक्तुः नाम परिचयः च अपि उल्लिख्यते । प्राथमिक्याः कृते आरक्षकाणां पार्श्वे एकं प्रपत्रं भवति । एतस्मिन् दूषणस्य कर्तुः हस्ताक्षराणि अपि स्वीक्रियन्ते । दूषणस्य कर्ता आरक्षकेभ्यः प्राथमिक्याः एकां प्रतिकृतिं निर्मूल्यं प्राप्तुं शक्नोति यतो हि एषः अधिनियमेन प्रदत्ताधिकारः अस्ति ।

सर्वकारि-अधिवक्तुः का भूमिका भवति ?

किञ्चित् अपि आपराधिकम् उल्लङ्घनं जनतायाः विरुद्धं मन्यते । एतस्य अर्थः अयं भवति यत् सः अपराधः केवलं पीडितस्य जनस्य एव हानिं न करोति, अपितु सम्पूर्णस्य समाजस्य एव अपराधः भवति। गताध्याये यौतुकस्य कृते सुधायाः हत्यायाः घटनां स्मरन्ति किम् ? आरोपिणः लक्ष्मणस्य तस्य च परिवारस्य विरुद्धम् अयम् अभियोगः राज्यपक्षतः नियुक्तः जातः। अतः एतस्मै अभियोगाय "राज्यम् अर्थात् देहली-प्रशासनं विरुद्ध्य लक्ष्मण-कुमारः अन्यस्य च" नाम प्रदत्तम्। तथैव शान्तेः अभियोगे अपि "श्रीमती-शिन्दे-महोदयां विरुद्धं शान्ति-हेमब्रामयोः स्थाने "राज्यं विरुद्ध्य शान्तेः हेमब्राम-महोदयस्य च नाम्ना ज्ञातुं शक्नुमः।

न्यायालये सर्वकारि-वाक्कीलः राज्यस्य पक्षं प्रस्तौति। सर्वकारि-वाक्कीलस्य भूमिका तदा प्रारभते यदा आरक्षकाः निरीक्षणं समाप्य न्यायालये आरोपपत्रं नियोजयन्ति । सर्वकारि-वाक्कीलस्य एतस्मिन् निरीक्षणे काऽपि भूमिका न भवति । तेन राज्यपक्षतः अभियोजनं प्रस्तोतव्यं भवति । न्यायालयस्य पदाधिकारित्वेन तस्य दायित्वं भवति यत् सः निष्पक्षरूपेण स्वकीयं कार्यं कुर्यात् न्यायालयस्य च पुरतः सर्वाणि दृढानि तथ्यानि साक्ष्याणि च प्रस्तुतानि कुर्यात्। तदा एव न्यायालयः समीचीनं निर्णयं कर्तुं शक्नोति।

न्यायाधीशस्य का भूमिका भवति ?

न्यायाधीशस्य सा एव क्षमता भवति या क्रीडासु निर्णायकस्य भवति । ते निष्पक्षभावेन मुक्तन्यायालये च अभियोगस्य सञ्चालनं कुर्वन्ति। न्यायाधीशाः सर्वेषां साक्षिणां वक्तव्यानि शृण्वन्ति अपि च अभियोजन-पक्षस्य रक्षण-पक्षणस्य च पक्षतः प्रस्तुतानां साक्ष्याणां निरीक्षणं कुर्वन्ति । न्यायाधीशाः स्वस्य पुरतः विद्यामानानां साक्ष्याणां वक्तव्यानां च आधारेण अधिनियमस्य अनुसारं निश्चिन्वन्ति यत् असौ वास्तविकतायां दोषी वर्तते उत न इति । यदि आरोपी दोषी वर्तते तदा न्यायाधीशाः तं दण्डयन्ति। न्यायाधीशाः एतादृशं जनं अधिनियमस्य अनुसारं दण्डयन्ति कारागारं च प्रेषयितुं शक्नुवन्ति अथवा तं धनस्य दण्डेन अपि दण्डयितुं शक्नुवन्ति।

निष्पक्ष-श्रवणं किं भवति ?

आगच्छन्तु अल्पकालाय कल्पनां कुर्वन्तु यत् यदि न्यायाधीशः शान्तेः अभियोगं केनापि अन्येन प्रकारेण अचालयिष्यत् तदा किं भवितुं शक्नोति स्म ? यदि न्यायालयेन शान्त्यै आरोप-पत्राणां साक्षिणां च वक्तव्यानां प्रतिकृतिः न अदास्यत् तदा किम् अभविष्यत् ? यदि न्यायाधीशः कस्मिंश्चित् एतादृशे स्थाने अभियोगम् अचालयिष्यत् यत्र शान्तिः सुशीलः च न गन्तुम् अशक्ष्यताम् तदा किम् अभविष्यत् ? यदि न्यायाधीशेन शान्तेः अधिवक्त्रीं रॉय-महोदयां अभियोजन-पक्षतः प्रस्तुताः श्रीमती-शिन्देमहोदयादिभिः साक्षिभिः सह


तर्हि अधुना वदतु श्रीमती-शिन्दे !
भवत्याः कण्ठहारः कथं लुप्तः ?
मया सुवर्णहारः कपाटिकायां स्थापितः आसीत् । शान्तिः तं चोरितवती । शान्तिं परित्यज्य कश्चित् अपि मम प्रकोष्ठं न प्रविशति । श्रीमान् शिन्दे-महोदयः मम पुरतः तस्याः पेटिकायाः निरीक्षणं कृतवान् । तदा तत्र एकस्मिन् पुटके १०,००० रूप्यकाणि दृष्ट्वा वयं तु आश्चर्यचकिताः अभवाम । शान्तिः एतत् धनं मम कण्ठहारं क्रीत्वा प्राप्तवती । सा चौरिणी अस्ति ।

सर्वेषां साक्षिणां वक्तव्यानि श्रुत्वा न्यायाधीशः शान्तेः अभियोगे किम् अकथयत् ?


एतानि मम अभियोगस्य पत्राणि सन्ति । मम स्वामिनौ हार-चौर्यस्य मिथ्या-आरोपं मम उपरि योजितवन्तौ।
ते शान्तेः पेटिकायां १०,००० रुप्यकाणि प्राप्तवन्तः । ते अनुभवन्ति यत् सा हारं क्रीत्वा एव धनं प्राप्तवती । परन्तु एतत् आवयोः द्वयोः रक्षितधनम् अस्ति।

तर्हि भवती एतत् कथयति यत् भवती शान्तिं चौर्यं कुर्वतीं न दृष्टवती । न तु भवती तस्याः पार्श्वे चोरित-हारं प्राप्तवती । गतेभ्यः त्रिभ्यः वर्षेभ्यः शान्तिः भवत्याः गृहे कार्यं करोति परन्तु एतेषु वर्षेषु भवत्याः गृहात् एकम् अपि वस्तु न लुप्तम् न केनापि चोरितम् अपि च भवती तस्यै प्रतिमासं १००० रुप्यकाणि अपि वेतनरूपेण ददाति।

प्रश्नोत्तराणां कृते पर्याप्तसमयः न प्रदत्तः अभविष्यत् अपि च पूर्वम् एव एतत् स्वीकुर्यात् यत् शान्तिः दोषिणी अस्ति तदा किं स्यात् ? यदि एतादृशं किञ्चित् कार्यं स्यात् तदा तत् निष्पक्ष-कार्यान्वयनम् अस्ति इति न वक्तुं शक्नुमः स्म । एतस्य कारणम् एतत् अस्ति यत् निष्पक्ष-क्रियान्वयनार्थं बहूनां विषयाणां पालनम् आवश्यकं भवति। संविधानस्य एकविंशतितमे अनुच्छेदे जीवनस्य अधिकारस्य आश्वासनं प्रदत्तम् अस्ति । एतस्य अभिप्रायः अयम् अस्ति यत् कस्यापि जनस्य जीवनं अथवा स्वतन्त्रता केवलम् एकया तर्क-सङ्गत-प्रक्रियया न्यायपूर्ण-प्रक्रियया च एव परिहर्तुं शक्नुमः । निष्पक्षस्य श्रवणे इदं सुनिश्चीयते यत् संविधानस्य एकविंशति-तमस्य अनुच्छेदस्य सम्पूर्णतया पालनं करिष्यते । आगच्छन्तु अधुना चित्र-कथा-पट्टे प्रदत्ते शान्तेः अभियोगं पुनः स्मरामः एकस्य निष्पक्षस्य श्रवणस्य मूलभूतानां तत्त्वेषु अवधानं कुर्मः ।

प्रथमः विषयः अयम् अस्ति – शान्त्यै आरोप-पत्रस्य अन्येषां च सर्वेषां साक्ष्याणां प्रत्येकं प्रतिकृतिः प्रदत्ता आसीत् यत्र अभियोजन-पक्षतः तस्य विरुद्धं न्यायालये तथ्यानि प्रस्तुतानि आसन्। शान्तिः चौर्यस्य आरोपेण ग्रस्ता आसीत् यः अधिनियमे एकः अपराधः अस्ति। अयम् अभियोगः जनतायाः पुरतः मुक्ते न्यायालये चालितः । शान्तेः भ्राता सुशीलः न्यायालयस्य क्रियान्वयनेषु उपस्थितः आसीत्। अभियोगः आरोपिणः उपस्थितौ प्राचलत्। शान्तेः एका अधिवक्त्री रक्षणं कृतवती । शान्तेः अधिवक्त्र्यै रॉय-महोदयायै अभियोजन-पक्षतः उपस्थितैः साक्षिभिः सह तर्क-वितर्कयोः अवसरः प्रदत्तः । अधिवक्त्र्यै रॉय-महोदयायै शान्तेः पक्षतः साक्ष्याणाम् उपस्थितेः अधिकारः प्रदत्तः ।

यद्यपि आरक्षकैः शान्तेः विरुद्धं चौर्यप्रकरणं नियोजितम् आसीत् परन्तु न्यायाधीशः तां निर्दोषिणीम् इति मत्वा अभियोगं चालितवान्। अधुना अभियोजन-पक्षेण इदं निर्णायक-रूपेण सिद्धं करणीयम् आसीत् यत् शान्तिः एव दोषिणी अस्ति। अस्मिन् अभियोगे अभियोजन-पक्षः एतत् न कर्तुं शक्तवान्।

महत्त्वपूर्णं तथ्यम् इदम् अस्ति यत् न्यायाधीशेन न्यायालयस्य समक्षे प्रस्तुतानां साक्ष्याणाम् आधारेण एव अभियोगस्य निर्णयः श्रावितः । न केवलं न्यायाधीशेन शान्तेः निर्बल-स्थितिं ज्ञात्वा तस्य आधारेण अविचार्य इदं निर्णयः कृतः यत् सा यथार्थेन चौरिणी वर्तते, अपितु न्यायाधीशस्य आचरणं नैरन्तर्येण निष्पक्षम् आसीत् अथ च साक्ष्यैः अपि इदं सिद्धं यत् शान्तिम् अतिरिच्य कैश्चित् युवकैः चौर्यं कृतम् आसीत्, अतः न्यायाधीशेन शान्तिः विमुक्ता। शान्तिः एतस्मात् कारणात् न्यायं प्राप्तवती यतो हि तस्याः कृते निष्पक्षस्य श्रवणस्य अवसरः प्रदत्तः आसीत्।

अस्मिन् अध्याये अस्माभिः येषां जनानां विषये चर्चा कृता संविधाने अधिनियमे च इदम् उक्तम् अस्ति यत् तैः जनैः स्वस्य दायित्वं सम्यक्-प्रकारेण निर्वोढव्यम्। एतस्य अभिप्रायः अस्ति यत् प्रत्येकं जनः कामं सः विभिन्न-वर्ग-जाति-धर्म-वैचारिक-मान्यातानां भवेत्, तस्मै निष्पक्षस्य श्रवणस्य अधिकारः दातव्यः। अधिनियम-शासनस्य विशेषता अस्ति यत् तस्य पुरतः प्रत्येकं जनः समानः अस्ति। यदि प्रत्येकं जनाय संविधानस्य माध्यमेन निष्पक्षस्य श्रवणस्य अवसरः दीयेत तर्हि एतस्य सिद्धान्तस्य कश्चित् विशेषः अर्थः न स्यात्।

सप्ततितमे पृष्ठे स्थूलाक्षरेषु याः प्रक्रियाः लिखिताः सन्ति ताः सर्वाः निष्पक्षस्य श्रवणस्य कृते नितान्तम् आवश्यक्यः सन्ति। शान्तेः अभियोगस्य विवरणस्य आधारेण स्व-शब्देषु लिखन्तु यत् निम्नलिखित-प्रक्रियाभ्यः भवन्तः किम् अवगच्छन्ति -

१. मुक्तन्यायालयः –

२. साक्ष्याणाम् आधारेण –

३. अभियोजन-पक्षस्य साक्षिभिः सह तर्क-वितर्कौ -

स्वकक्षायां चर्चां कुर्वन्तु यत् शान्तेः अभियोगे निम्नलिखितानां प्रक्रियाणां पालनं न स्यात् तदा किं भवितुं शक्नोति स्म ?

१. यदि सा स्वरक्षार्थम् अधिवक्तारं न अप्राप्स्यत्।

२. यदि न्यायालयः तां निर्दोषिणीम् इति मत्वा अभियोगं न अचालयत्।

अभ्यासः

पीसलैण्ड-नामके नगरे फिएस्ता-पादकन्दुक-क्रीडक-दलस्य समर्थकाः सूचनां प्राप्नुवन्ति यत् समीपस्थे नगरे यत् ततः प्रायशः चत्वारिंशत्-किलोमीटर-परिमितम् दूरम् अस्ति ,जुबली-पादकन्दुक-क्रीडक-दलस्य समर्थकाः क्रीडाक्षेत्रं खनितवन्तः। तत्र एव अग्रिमे दिने द्वयोः दलयोः मध्ये अन्तिमा क्रीडास्पर्धा भविष्यति। फीएस्ता इत्यस्य समर्थकानाम् एकः समूहः घातकैः अस्त्र-शस्त्रैः सज्जी-भूय स्वस्य नगरस्य जुबली-समर्थकेषु आक्रमणं करोति। अस्मिन् आक्रमणे दश-जनाः म्रियन्ते , पञ्च-महिलाः गभीर-रूपेण आहताः भवन्ति बहूनि गृहाणि नष्टानि भवन्ति अथ च पञ्चाशदधिकाः जनाः व्रणिताः भवन्ति।

कल्पनां कुर्वन्तु यत् भवान् भवन्तः सहपाठिनः च अपराधिक-न्यायव्यवस्थायाः अङ्गभूताः सन्ति। अधुना स्वकक्षां चतुर्षु समूहेषु विभक्तां कुर्वन्तु –

१. आरक्षकाः २. सर्वकारी अधिवक्ता ३. अभियुक्त-पक्षस्य अधिवक्ता ४. न्यायाधीशः

अधोदत्त-तालिकायाः वाम-स्तम्भे कानिचन दायित्वानि प्रदत्तानि सन्ति। एतानि दायित्वानि वामतः प्रदत्तानाम् अधिकारिणां भूमिकया सह मेलयन्तु। प्रत्येकं समूहं स्वस्य कृते तेषां कार्याणां चयनं कुर्यात्यानि कार्याणि फिएस्ता-समर्थकानां हिंसया पीडितानां जनानां न्यायार्थम् आवश्यकानि सन्ति। एतानि कार्याणि कस्मिन् क्रमे करणीयानि भविष्यन्ति ?

भूमिकाः	**कार्याणि**
आरक्षकाः	साक्षिणां श्रवणम्
सर्वकारी अधिवक्ता	साक्षिणां वृत्तान्तानां पञ्जीकरणम्
अभियुक्त-पक्षस्य अधिवक्ता	साक्षिभिः सह तर्कवितर्कौ
न्यायाधीशः	ज्वलितानां गृहाणां चित्राणाम् आकलनम्
	साक्ष्याणां पञ्जीकरणम्
	फिएस्ता-समर्थकानां निघटनम्
	निर्णय-लेखनम्
	पीडित-पक्षस्य प्रस्तुतीकरणम्
	एतत् निर्णयस्य करणं यत् आरोपिणः कति वर्षाणि यावत् कारागारे स्थास्यन्ति।
	न्यायालये साक्षिणां निरीक्षणम्।
	निर्णय-श्रवणम्
	आक्रमणेन पीडितानां महिलानां चिकित्सकीयं निरीक्षणम्
	निष्पक्ष-श्रवणम्
	आरोपि-जनैः मेलनम्

अधुना एताम् एव स्थितिं स्वीकुर्वन्तु अथ च कम् अपि एतादृशं विद्यार्थिनम् उपर्युक्तानि सर्वाणि कार्याणि कर्तुं कथयन्तु यः फिएस्ता-समूहस्य सदस्यः स्यात्। यदि आपराधिक-न्याय-व्यवस्थायाः सर्वाणि कार्याणि केवलम् एकः एव जनः कुर्यात् तर्हि किं भवन्तः अनुभवन्ति यत् पीडिताः न्यायं प्राप्स्यन्ति ? किमर्थं न ?

भवन्तः इत्थं किमर्थम् अनुभवन्ति यत् आपराधिक-न्याय-व्यवस्थायां विभिन्नैः जनैः स्वस्य पृथक् पृथक् भूमिकानां निर्वहणं करणीयम् ? कारणद्वयं वदन्तु।

शब्द-सङ्कलनम्

आरोपी – अस्य अध्यायस्य सन्दर्भे सः जनः आरोपी उक्तः यस्मिन् न्यायालये कस्मैचित् अपराधाय अभियोगः प्रचलति।

संज्ञेयः – अस्मिन् अध्याये ते अपराधाः संज्ञेयाः इति उक्ताः येभ्यः आरक्षकाः कम् अपि जनं न्यायालयस्य अनुमतिं विना अपि निग्रहीतुं शक्नुवन्ति।

प्रतिपृच्छा – यदा कश्चित् साक्षी न्यायालये स्वकीयं वृत्तान्तं ददाति तदा अन्य-पक्षस्य अधिवक्ता अपि तं प्रश्नान् पृच्छति येन तस्य गतानां वृत्तान्तानाम् औचित्यम् अनौचित्यं च सिद्धं भवेत् सा एव प्रतिपृच्छा इति उच्यते।

निग्रहणम् – आरक्षकैः कस्यचिद् अपि अवैध-रूपेण स्व-नियन्त्रणे स्थापनं निग्रहणम् इति उच्यते।

निष्पक्षः – एतस्य अभिप्रायः अस्ति यत् स्पष्टम् अथवा न्यायसङ्गतं व्यवहरणम् अथ च कस्य अपि एकस्य पक्षस्य असमर्थनम्।

कस्यचित् अपराधस्य आरोपणम् - यदा न्यायाधीशः आरोपिणं लिखितरूपेण सूचयति यत् तम् उद्दिश्य कस्य अपराधस्य कृते अभियोगः चालयिष्यते तदा एतत् एव अपराधस्य आरोपणं कथ्यते।

साक्ष्यम् – यदा कश्चित् मनुष्यः न्यायालये एतत् वृत्तान्तं वक्तुम् आहूयते यत् तेन एतस्य प्रकरणस्य सम्बन्धितं किं दृष्टम् अथवा श्रुतं ज्ञातं वा तदा एतादृशः जनः एव साक्षी इति कथ्यते।

॥ इति षष्ठाध्यायः ॥

चतुर्थः घट्टः

शिक्षकाणां कृते

समानता एकं मूल्यम् अस्ति अधिकारः च अपि अस्ति । एतं विषयं वयं सामाजिक-राजनैतिक-जीवनम् इति पुस्तकस्य शृङ्खलायाम् अवगमनस्य प्रयासं कृतवन्तः । एतेषु वर्षेषु वयं समानतायाः अवधारणात्मकं ज्ञानम् इतोऽपि पुष्टं कृतवन्तः । वयम् औपचारिक-समानतायाः वस्तुगतायाः समानतायाः च मध्ये अन्तरं स्पष्टीकुर्वन्तः वस्तुगत-समानतायाः दिशि अग्रेसरणस्य आवश्यकताम् अनुभूतवन्तः । सप्तम-कक्ष्यायाः पुस्तके प्रदत्तायाः कान्तायाः कथा एतस्य तथ्यस्य उदाहरणम् अस्ति । वयम् एतत् तथ्यम् अपि रेखाङ्कितं कृतवन्तः यत् समानताम् अवगन्तुम् असमानतायाः अनुभवः तस्य च अभिव्यक्तौ अवधानम् अपि आवश्यकं भवति। अनेन प्रकारेण वयं डॉ-अम्बेडकरस्य ओमप्रकाशस्य च बाल्यस्य अनुभवैः भेदभावस्य असमानतायाः च पारस्परिकानां सम्बन्धानां निरीक्षणं कृतवन्त । संसाधनानां प्राप्तिः असमानतायाः कारणात् कथं प्रभाविता भवति , एतत् तथ्यं वयं शिक्षां यावत् महिलानां प्राप्तिः" इति उदाहरणेन अवगमनस्य प्रयासं कृतवन्तः। रससुन्दरी-देवी रुकैया बेगमस्य च लेखनेन वयम् अनुमानं कर्तुं शक्नुमः यत् एतम् अवरोधम् अपाकर्तुं महिलाः कथं सङ्घर्षं कुर्वन्ति । वयं संविधाने प्रदत्तानां मूल-अधिकाराणां पुनः पुनः चर्चां कृतवन्तः । एतेन माध्यमेन वयम् एतत् तथ्यं मुख्यतया वक्तुम् इच्छामः यत् समानतायाः प्रतिष्ठायाः च विचारः भारतीय-लोकतन्त्रस्य सञ्चालनस्य कृते महत्त्वपूर्णः अस्ति ।

अस्मिन् घटके उपान्तकरणतः अथवा मुख्यधारातः बहिष्कृतायाः अवधारणायाः माध्यमेन एतस्मिन् तथ्ये इतोऽपि सूक्ष्मतया अवधानं कृतम् अस्ति यत् असमानतया विभिन्नेषु समूहेषु समुदायेषु च कथं प्रभावाः भवन्ति । अस्मिन् घटके आदिवासिनां मुस्लिमानां दलितानां च एतेषु त्रिषु समूहेषु विशेषतया अवधानं प्रदत्तम् अस्ति । एतेषां त्रयाणां समूहानां चयनम् एतदर्थं कृतम् अस्ति यतोहि एतेषां त्रयाणां समूहानाम् उपान्तकरणस्य कारणानि पृथक्-पृथक् सन्ति अथ च बहुधा तैः एतत् उपान्तकरणं पृथक्-पृथक्-रूपेषु अनुभूयते । एतं घटकं पाठनसमये इयं चेष्टा स्यात् यत् विद्यार्थिनः तानि तानि कारकाणि परिचेतुं साहाय्यम् अनुभवेयुः ये उपान्ततां वर्धयितुं योगदानं कुर्वन्ति । तथा एव, उपान्ते निपातितानां समुदायानाम् अवज्ञाने तेषां कष्टानां च अनुभवकरणे अपि विद्यार्थिनः सक्षमाः स्युः तदर्थं शिक्षकैः प्रयत्नः कार्यः ।

भवता एतत् कार्यम् अवश्यमेव करणीयम् यत् भवतां परिवेशे ये बहिष्कृत-समुदायाः वर्तन्ते तत्र तत्र बालकान् नीत्वा तैः समुदायैः बालकानां परिचयः कारणीयः । तेन प्रकारेण बालकानां साहाय्यं करणीयम् । सप्तमे अध्याये वयम् आदिवासिनां मुस्लिम-जनानां ये समुदायाः सन्ति तेषां विषये विस्तरेण चर्चां करिष्यामः । अष्टमे अध्याये वयम् एतस्मिन् विषये चर्चां करिष्यामः यत् सर्वकारेण अथ च स्वयंसेवि-सङ्घटनैः अपि च एतैः समुदायैः स्वयं कथं विभिन्नानां सङ्घर्षाणां माध्यमेन स्वस्य वहिष्कारस्य निराकरणं कर्तुं कीदृशाः प्रयासाः कृताः सन्ति। सर्वकारः एतस्याः परिस्थितेः निराकरणाय नियमान् निर्माति अपि च एतेषां समुदायानां लाभार्थम् अनेकासां नीतिनां निर्माणम् अपि करोति। तासां नीतीनां क्रियान्वयनम् अपि कारयति । अस्मिन् घटके वयम् अङ्कानां कवितानां चित्रकथापट्टानां व्यक्तित्व-अध्ययनम् इत्यादीनां बहूनां शैक्षणिक-साधनानां प्रयोगं कृतवन्तः । आदिवासिनः स्वकीये जीवने कथं बहिष्कारस्य प्रक्रियाः अनुभवन्ति, एतस्मिन् विषये चर्चयितुं चित्रकथापट्टस्य प्रयोगं कुर्वन्तु । दलित-सम्बन्धिनां व्यक्तित्वाध्ययनस्य माध्यमेन भवन्तः एतस्य अभिनियमस्य महत्त्वस्य विषये चर्चयितुं शक्नुवन्ति । एतस्य अधिनियमस्य मौलिक-अधिकारान् प्रति संविधानस्य प्रतिबद्धता कथं प्रतिबिम्बिता भवति । मुस्लिम-समुदायस्य स्थितिम् अवगन्तुं वयम् अङ्कानाम् एकस्य पत्रस्य व्यक्तित्वस्य अध्ययनस्य च प्रयोगं कृतवन्तः येषां च कक्षायां विश्लेषणं कर्तुं शक्यते । एतस्मिन् घटके सामाजिक-विज्ञानस्य भाषायाः पाठ्यपुस्तकानां मध्ये जातानां विभाजनस्य रेखानां त्रोटनार्थं गीतानां कवितानां च प्रयोगं कृतवन्तः । एतेन व्याजेन वयम् इदम् अपि वक्तुम् इच्छामः यत् विभिन्न-समुदायानां दैनिकजीवने एतादृशः भेदः न भवति । तथापि न्यायस्य सङ्घर्षाः एतादृशानि अनेकानि अविस्मरणीयानि गीतानि कविताः च जनितवन्तः यानि पाठ्यपुस्तकेषु स्थानं न प्राप्तवन्तः ।

अस्मिन् अध्याये एतादृशाः बहवः विषयाः सन्ति ये कक्षायाः अन्तः विवादं कारयितुं शक्नुवन्ति । बालकाः एतैः विषयैः परिचिताः अपि सन्ति ।

अतः अस्माभिः एतेषु विषयेषु चर्चायै परिपक्वाः सन्तुलिताः च मार्गाः अन्वेषणीयाः । भवद्भिः एतेषु विषयेषु इदं सुनिश्चेतुं मुख्या भूमिका निर्वहणीया यत् कोऽपि बालकः अथवा बालकसमूहः भेदभावेन पीडितः इति न अनुभवेत् अथ च कोऽपि इत्थम् अपि न अनुभवेत् यत् मम उपहासः जायते अथवा एतासु चर्चासु अहम् अप्रासङ्गिकः अस्मि ।

सप्तमः अध्यायः

पश्चवर्ति-जनानां (उपान्तस्थजनानां) विषये अवगमनम्

सामाजिक-रूपेण उपान्तस्थस्य कः अर्थः भवति ?

भवन्तः टिप्पणीपुस्तिकायाः येषु पृष्ठेषु लिखन्ति तेषु पृष्ठेषु वामभागे रिक्तस्थानं भवति सामान्यतः तस्मिन् स्थाने न लिख्यते। सः पृष्ठस्य उपान्तभागः उच्यते। तादृशम् एव किञ्चित् समाजे अपि भवति। उपान्तस्थस्य अर्थः भवति यत् यः उपान्तदेशे अथवा स्थाने निपातितः स्यात्। एतस्यां परिस्थितौ सः जनः विषयाणां केन्द्रस्थः न भवति। एषः एतादृशः विषयः अस्ति यं विषयं भवन्तः स्वकक्षायां क्रीडाक्षेत्रे च अपि अनुभूतवन्तः स्युः। यदि भवन्तः स्वकक्षायाः अधिकतराणां बालकानां समानाः न सन्ति अर्थात् यदि सङ्गीते अथवा चलनचित्रेषु भवतां रुचिः पृथक् अस्ति, यदि भवतः कथनस्य शैली अन्येभ्यः भिन्ना अस्ति, यदि भवान् अन्यैः इव वार्तासु अधिकस्य आनन्दस्य अनुभवं न करोति यदि च भवान् न क्रीडितुम् इच्छति यथा अन्ये अधिकतराः बालकाः क्रीडितुम् इच्छन्ति यदि च भवतः वेशभूषा अन्येभ्यः पृथक् अस्ति तदा एतस्याः वार्तायाः सम्भावना इतोऽपि वर्धिष्यते यत् भवतः सम्बन्धितानि मित्राणि च भवन्तं सामान्यं न अनुभविष्यन्ति अथवा आत्मसमानं न चिन्तयिष्यन्ति। इत्थं भवान् प्रायशः अनुभवति यत् भवान् अन्येभ्यः पृथक् अस्ति, परिणामतः भवता उक्तं तथ्यं भवतः अनुभवाः भवतः चिन्तनं भवतः व्यवहारः च सम्यक् नास्ति अथवा अन्येभ्यः न रोचते।

कक्षायाः इव समाजे अपि एतादृशाः समूहाः समुदायाः वा भवितुं शक्नुवन्ति। येषाम् एतादृशस्य बहिष्कारस्य अनुभवः भवति। तेषाम् उपान्तस्थस्य इदं कारणं भवितुं शक्नोति यत् ते पृथक्-भाषया भाषन्ते पृथक्-परम्पराः अङ्गीकुर्वन्ति अथवा बहुसङ्ख्यक-समुदायस्य अपेक्षया कस्यचित् अन्यस्य धर्मस्य अवलम्बिनः सन्ति। ते स्वस्याः निर्धनतायाः कारणात् सामाजिक-स्तरेण न्यूनतराः इति कारणात् च अन्येषां जनानां दृष्ट्या अल्पतरेण मनुष्यस्य रूपेण अवलोक्यन्ते एतस्मात् कारणात् ते जनाः आत्मानम् उपान्तस्थाः वयम् इति मन्यन्ते। बहुधा उपान्तस्थान् समूहान् जनाः शत्रुतया अथवा भयस्य भावेन अपि पश्यन्ति। पृथक्-करणस्य बहिष्करणस्य च अयम् अनुभवः संसाधनेभ्यः अवसरेभ्यः च लाभं प्राप्तुं समुदायान् अवरुणद्धि। परिणामतः उपान्तस्थाः समुदायाः स्व-अधिकाराणां कृते स्व-विषयस्य उपस्थापनस्य अवसरं त्यजन्ति। ते समाजस्य तथाविधानां शक्तिशालिनां वर्चस्वशालिनां च समुदायानाम् अपेक्षया शक्तिहीनतायाः पराजयस्य च अनुभवं कुर्वन्ति येषां पार्श्वे भूमिः अस्ति, धनसम्पत्तयः सन्ति ये अधिक-साक्षराः अथ च राजनैतिक-रूपेण बलवत्तराः सन्ति। एतस्य अयम् अभिप्रायः अस्ति यत् उपान्तकरणं कस्मिंश्चित् एकस्मिन् एव समुदाये न भवति। आर्थिक-सामाजिक-राजनैतिक-सीमया निबद्धाः केचन समूहाः समाजस्य अन्यान् काञ्चन समूहान् 'वयम् उपान्तस्थाः' इति अनुभवितुं बाध्यं कुर्वन्ति।

अस्मिन् समुदाये भवन्तः द्वयोः एतादृशयोः समुदाययोः विषये पठिष्यन्ति यौ आधुनिके भारते सामाजिक-रूपेण उपान्तस्थौ इति मन्येते।

आदिवासिनः उपान्तकरणम् च

देहल्यां कश्चित् आदिवासि-कुटुम्बः

सोमा हेलेन च पितामहेन सह उपविश्य दूरदर्शने गणतन्त्र-दिवसस्य प्रचरणं पश्यन्ति ।



अरे पश्यन्तु ! आदिवासिनां नौका !

पितामह ! ते आदिवासिनः सदैव नृत्यतः एव किमर्थं दर्शयन्ति ?

सत्यम् उक्तम् त्वया, आदिवासिनां जीवनं बहु-समृद्धम् अस्ति । अधिकतराः जनाः एतस्मिन् विषये किञ्चित् अपि न जानन्ति ।

आम्, किम् अस्माकं विषये ते अन्यत् किम् अपि न जानन्ति !

एकदा सहसा वयं बोधिताः यत् एतानि जङ्गलानि अस्माकं न सन्ति । वनविभागस्य अधिकारिणः संविदा-स्वामिनः च अधिकतरं जङ्गलं कर्तितवन्तः । यदि वयं जङ्गलानां रक्षणं कुर्मः स्म तदा ते अस्मान् ताडयन्ति स्म । अस्माभिः न्यायायिक-प्रक्रियायाः च साक्षात्कारः करणीयः भवति स्म । तत्र न अस्माकं कृते अधिवक्तुः व्यवस्था भवति स्म न तु वयं स्वयं स्व-अभियोगं प्रतियोद्धुं शक्नुमः स्म ।

यदा अहं भवतां समवयसः आस्म तदा उडीसायाम् अस्माकं ग्रामः अतीव सुन्दरः भवति स्म । वयं स्वस्य जीवनोपयोगीनि सर्वाणि वस्तूनि तत्र स्वकीयायाः भूमेः जङ्गलात् च प्राप्नुमः स्म । वयम् अपि स्वभूमौ जङ्गलेषु नदीषु च स्निह्यामः स्म ।

तदा पुनः कथं भवद्भ्यः स्वजीवनं रक्षितम् ।

अस्मासु बहवः जनाः स्वकीयानि गृहाणि परित्यक्तुं बाध्याः जाताः । अस्माकं समीपस्थेषु नगरेषु यानि कानि अपि कार्याणि यथाकालम् उपलभ्यन्ते स्म वयं तानि कर्तुं प्रारब्धवन्तः ।

पुनः तत्र अधिकारिणः आगताः । तैः उक्तं यत् अस्माकं भूमौ लौहस्य आकराः सन्ति । ते ततः लौहं निष्कासयितुम् इच्छन्ति स्म । ते बह्वीः प्रतिज्ञाः कृतवन्तः ते कथयन्ति स्म यत् यदि स्वभूमिं तान् विक्रेष्यन्ति तदा तेभ्यः सर्वकारि-वृत्तीः धनानि च दास्यामः । केचन ग्रामवासिनः बहुप्रसन्नाः जाताः । केचन अनुभवन्ति स्म यत् एतस्मात् तेषां जीवनं नष्टं भविष्यति । कैश्चित् तु कर्गदेषु हस्ताक्षराणि अपि कृतानि । ते न जानन्ति स्म यत् हस्ताक्षरं कृत्वा ते स्वकीयां भूमिं विक्रीणन्ति । अङ्गुलिगण्याः जनाः तैः अधिकारिभिः वृत्तौ नियुक्ताः । परन्तु अधिकतराः जनाः स्वभूमिं न विक्रीतवन्तः ।

तदा ते अस्माभिः सह कलहं ताडनं च प्रारब्धवन्तः । ते विविध-प्रकारेण अस्मान् भाययितवन्तः । अन्ततः ते सर्वान् जनान् स्वपूर्वजानां भूमिं विक्रेतुं त्यक्तुं च बाध्यान् कृतवन्तः । अस्माकं जीवन-शैल्याः शीघ्रम् एव समूलनाशः जातः।

अरे पितामह ! अस्माकं भूमिः ! तस्याः किम्.....

त्रिंशत्-एकडम् इति परिमितायाः भूमेः परिवर्ते संविदा-कर्मिणा वयं केवलं किञ्चित् एव धनं प्राप्तवन्तः । अहं स्वस्य अधिकतरैः मित्रैः सह तदनन्तरं कदापि न मेलितुं शक्तवान् ।

नगरे तत् धनं शीघ्रमेव समाप्तम् । अस्माकं पार्श्वे स्वजीवनं चालयितुं किमपि साधनं न आसीत् । वयं सर्वे भाटक-प्रकोष्ठे वासं कृतवन्तः । स्वस्य स्वतन्त्रस्य जीवनस्य तस्य मुक्तस्य वातावरणस्य च स्मरणं सर्वदा आगच्छति स्म ।

कतिपय-वर्षानन्तरं तव पिता देहल्यां वृत्तिं प्राप्तवान् अथ च वयम् अत्र आगतवन्तः । तानि दिनानि बहुकष्टयुक्तानि आसन् ..। अतः वयं भवन्तौ द्वौ अपि बहूनि वर्षाणि यावत् विद्यालयं प्रेषयितुं न शक्तवन्तः ।

मम विद्यालये गमनात् घृणा आसीत् । आवाम् अध्ययने तथा विफलौ आस्व यत् सर्वे बालाः अस्माकं परिहासं कुर्वन्ति स्म । वयं गृहे संथाली-भाषां वदामः स्म अतः हिन्द्या वयं सम्भाषणं न कर्तुं शक्नुमः स्म ।

परन्तु अधुना अस्माकम् अत्र कानिचन मित्राणि जातानि । अहं स्वल्पाम् आङ्ग्लभाषाम् अपि वक्तुं शक्नोमि ।

भवती अधुना अपि तानि स्वग्रामस्य विषये बोद्धुं शक्नोति । एतेन ते बहुकिमपि ज्ञातुं शक्नुवन्ति ।

कामये, अहं स्वमित्राणि स्वग्रामस्य नाशात् पूर्वं स्वग्रामं दर्शयितुम् अशक्ष्यम् ।

एकस्मिन् दिने अहम् आदिवासिनां जीवने आधारितस्य एकस्य चलचित्रस्य निर्माणं करिष्यामि ।

अधुना भवन्तः पठितवन्तः यत् कथं पितामहः स्वं ग्रामं त्यक्त्वा बाध्यः अभवत् । पितामहस्य कथा अस्माकं देशस्य लक्षाधिकानाम् आदिवासिनां कथायाः समाना अस्ति । एतस्य समुदायस्य उपान्तकरणस्य विषये भवन्तः अस्मिन् अध्याये विस्तरेण पठिष्यन्ति ।

न्यूनातिन्यूनं त्रीणि कारणानि वदन्तु यत् विभिन्नाः समूहाः उपान्तभागं कथं गच्छन्ति ?

पितामहः उडीसायाः स्वग्रामं त्यक्तुं कथं बाध्यः जातः ?

आदिवासिनः के भवन्ति ?

आदिवासि-शब्दस्य अर्थः भवति "मूल-निवासी" इति । एते एतादृशाः समुदायाः सन्ति ये वनस्य आश्रयं स्वीकृत्य जीवमानाः सन्ति अद्यापि च तथैव जीवमानाः सन्ति । भारतस्य प्रायः अष्टौ प्रतिशतं जनसङ्ख्या आदिवासिनाम् अस्ति । देशस्य अधिकतराणि महत्त्वपूर्णानि खननस्य क्षेत्राणि अथ च औद्योगिक-क्षेत्राणि आदिवासिनां क्षेत्रेषु सन्ति । जमशेदपुर-राउरकेला-बोकारो-भिलाई इत्यादीनां स्थानानां नामानि भवद्भिः श्रुतानि स्युः । आदिवासिनां सम्पूर्णा जनसङ्ख्या समाना नास्ति । भारते पञ्चशताधिकाः आदिवासिसमूहाः सन्ति । छत्तीसगढ-झारखण्ड-मध्यप्रदेश-उडीसा-गुजरात-महाराष्ट्र-राजस्थान-आन्ध्र-प्रदेश-पश्चिम-बङ्ग-प्रान्ताः अपि च उत्तरपूर्वस्य अरुणाचल-प्रदेश-असम-मणिपुर-मेघालय-मिजोरम-नागालैण्ड-त्रिपुरादिषु राज्येषु आदिवासिनां सङ्ख्या अत्यधिका वर्तते । केवलम् उडिसायाम् एव षष्टितः अधिकाः विभिन्नाः जनजातीय-समूहाः वसन्ति । आदिवासि-समाजः अन्येभ्यः सर्वथा पृथक् दृश्यते यतोहि तेषां मध्ये निम्नोच्च-भावनायाः कारणात् उत्पन्न-भेद-भावः अत्यल्पः भवति । एतस्मात् कारणात् एव एते समुदायाः जाति-वर्णाधारित-समुदायानां शासने अथवा राजशासने जीवमानेभ्यः समुदायेभ्यः सर्वथा पृथक् भवन्ति ।

आदिवासिनः जनजातिः इति शब्देन अपि सम्बोध्यन्ते ।

प्रायशः भवद्भिः अनुसूचित-जनजाति-शब्दः श्रुतः स्यात्। सर्वकारीय-पत्र-लेखेषु आदिवासिनां कृते एतस्य शब्दस्य एव प्रयोगः कृतः वर्तते । आदिवासि-समुदायानाम् एका सर्वकारीया सूची अपि निर्मापिता अस्ति । अनुसूचित-जनजातयः कदाचित् अनुसूचित-जातिभिः सह अपि सम्मेल्य दृश्यते ।

आदिवासिनां बहवः जनजातीयाः धर्माः भवन्ति । तेषां धर्माः इस्लाम्-हिन्दु- ईसाई -इत्यादिभ्यः धर्मेभ्यः सर्वथा पृथक् सन्ति । एते प्रायः स्वपूर्वजानां ग्रामस्य प्रकृतेः च उपासनां कुर्वन्ति । प्रकृतेः सम्बद्धासु आत्मसु पर्वतानां नदीनां पशूनां च आत्मानः सन्ति । एते विभिन्नेभ्यः स्थानेभ्यः युक्ताः भवन्ति अथ च तेषां तत्र एव निवासः मन्यते । ग्रामस्य आत्मनां प्रायः ग्रामस्य आभ्यन्तरे एव निर्धारितेषु पवित्रेषु लता-कुञ्जेषु पूजा क्रियते तथा पूर्वजानाम् उपासना गृहे एव क्रियते । आदिवासिनः स्वस्मिन् परिवेशे विद्यमानेभ्यः बौद्ध-ईसाई इत्यादि धर्मेभ्यः अथ च शाक्त-वैष्णव-भक्ति-सङ्घेभ्यः अपि प्रभाविताः भवन्ति । परन्तु इदम् अपि सत्यम् अस्ति यत् आदिवासिनां धर्माणां निकटस्थेषु साम्राज्येषु प्रचलितेषु प्रभुत्वशालि-धर्मेषु अपि प्रभावः भवति स्म । उडीसायाः

भवतां ग्रामे अथवा नगरे के समूहाः उपान्तस्थाः वर्तन्ते ? चर्चां कुर्वन्तु ।

किं भवन्तः स्वराज्यस्य कस्यचित् जनजातीयस्य समुदायस्य नाम वक्तुं शक्नुवन्ति ?

सः समुदायः कां भाषां ब्रूते ? किं ते वनानां समीपे निवसन्ति ? किं ते कार्याणि अन्वेषयन्तः अन्यानि क्षेत्राणि अपि गच्छन्ति ।

एते पारम्परिकासु वेश-भूषासु सुसज्जिताः जनजातीयानां समुदायानां चित्राणि सन्ति । सामान्यतः आदिवासिनः एतेषु रूपेषु एव प्रस्तूयन्ते । एतस्य आधारेण वयं तेषां विषये विपरीतेन ज्ञानेन ग्रस्ताः भवामः यत् आदिवासिनः वर्णयुक्ताः विपद्ग्रस्ताः च सन्ति ।

जगन्नाथ-सङ्घः अथ च बङ्ग-असमयोः शक्तिः एवं तान्त्रिक-परम्पराः एतस्य उदाहरणानि सन्ति । एकोनविंशत्यां शताब्द्यां बहुभिः आदिवासिभिः ईसाई-धर्मः आश्रितः यः आधुनिकानाम् आदिवासिनां इतिहासे एकः महत्त्वपूर्णः धर्मः जातः ।

आदिवासिनां स्वभाषाः आसन् तासु अधिकांशतः संस्कृततः सर्वथा पृथक् संभवतः तावत्यः एव पुरातन्यः च सन्ति । एताभ्यः भाषाभ्यः बाङ्ग्ला-प्रभृतयः मुख्यधारायाः भारतीयाः भाषाः प्रगाढरूपेण प्रभाविताः । एतासु संथाली-वक्तृणां सङ्ख्या सर्वाधिका वर्तते । तेषां स्वकीयाः पत्र-पत्रिकाः भवन्ति । अन्तर्जाले अपि च तेषां पत्रिकाः उपलभ्यन्ते ।

आदिवासिनः प्रचलित-शैल्यः च

अस्माकं देशे आदिवासिनः एकेन विशिष्टेन प्रकारेण प्रस्तूयन्ते । विद्यालयीयेषु उत्सवेषु सर्वकारीयेषु कार्यक्रमेषु अथवा पुस्तकेषु चलचित्रेषु वा ते सदा एकेन रूपेण एव प्रस्तूयन्ते । ते विविध-वर्ण-युक्तानि वस्त्राणि धृत्वा शिरसि मुकुटं धृत्वा च सदा नृत्यन्तः दृश्यन्ते । एतद् अतिरिच्य वयं तेषां जीवनेन सम्बद्धानां तत्वानां विषये अत्यल्पं जानीमः । अतः बहवः जनाः तेषां जीवनस्य विषये विपरीतया धारणया ग्रस्ताः भवन्ति यत् तेषां जीवनं अत्याकर्षकं पुरातनकालीनम् अपि च मन्दायते । आदिवासिषु अयम् आरोपः सर्वदा भवति यत् ते अग्रेसराः न भवितुम् इच्छन्ति अर्थात् आधुनिकाः न भवितुम् इच्छन्ति । बहवः जनाः पूर्वाग्रहेण ग्रस्ताः सन्ति तस्मात् कारणात् ते पूर्वम् एव इत्थं मन्यन्ते यत् ते आदिवासिनः परिवर्तनं न इच्छन्ति अथवा नूतनैः विचारैः परिचयं न इच्छन्ति । षष्ठ-कक्षायाः पाठ्यपुस्तके भवन्तः पठितवन्तः यत् वयं विशिष्टान् समुदायान् तेषां निर्मितासु प्रचलितासु शैलीषु पश्यामः तस्मात् कारणात् एवंविधैः आदिवासिभिः समुदायैः सह प्रायः कियतः भेदभावस्य प्रारम्भः भवति ।

आदिवासिनः तेषां विकासः च

यथा भवद्भिः इतिहासस्य स्वस्य पाठ्यपुस्तके पठितम् अस्ति, भारते सर्वेषां साम्राज्यानां विकासक्रमे जङ्गलानां महती भूमिका वर्तते । लौह-ताम्र-सुवर्ण-रजतानाम् अयस्काः कृष्णाङ्गाराः हीरकाणि बहुमूल्य-काष्ठानि अधिकतराणि ओषधानि सिक्थानि लाक्षाः मधु–इत्यादीनि द्रव्याणि अथ च पशुषु यथा हस्ती यः च विशिष्ट-सेनासु अपि उपयुज्यते एतानि सर्वाणि वस्तूनि वनेभ्यः एव लभ्यन्ते । एतदतिरिच्य जीवनम् अग्रे नेतुम् अरण्यानाम् आधिक्येन योगदानम् अस्ति । एतेभ्यः वनेभ्यः एव बह्व्यः नद्यः नैरन्तर्येण जलं प्राप्नुवन्ति । इदानीम् एषः विषयः बुद्धिगतः भवति यत् एतानि वनानि अस्माकं वायोः जलस्य च उपलब्धतां गुणवत्तां च गभीरतया प्रभावयन्ति । एकोनविंशत्याः शताब्द्याः अन्तपर्यन्तम् अस्माकं देशस्य एकः बृहद्-भू-भागः वनैः आच्छादितः आसीत्। अपि च न्यूनातिन्यूनं

एकोनविंशत्याः शताब्द्याः मध्य-पर्यन्तं तु एतेषां बृहद्-भूखण्डानाम् आदिवासिनां पार्श्वे आधिक्येन ज्ञानम् आसीत् । एतेषां क्षेत्राणां विशिष्टं ज्ञानम् आसीत् । तेषां वनेषु पूर्णं नियन्त्रणम् आसीत् । अतः आदिवासिनां समुदायाः बृहद्-राज्यानां राज्ञां च अधीनस्थाः न अभवन् । अपितु बहूनि राज्यानि वनसंसाधनानां कृते आदिवासिनाम् आश्रितानि भवन्ति स्म ।

एतत् चित्रम् आदिवासिनां प्रचलितया जीवनस्य प्रक्रियया सर्वथा पृथक् अस्ति । अद्य ते उपान्तस्थैः शक्तिहीन-समुदाय-रूपेण च दृश्यन्ते । औपनिवेशकात् शासनात् पूर्वम् आदिवासि-समुदायाः आखेटेन, वस्तूनि चित्वा च आजीविकां चालयन्ति स्म । ते एकस्मिन् स्थाने चिरकालं यावत् न तिष्ठन्ति स्म । ते स्थानान्तरितया कृषिना सह एव चिरकालं यावत् एकस्मिन् स्थाने अपि कृषिं कुर्वन्ति स्म । यद्यपि एताः परम्पराः अद्यापि प्रचलन्ति , पुनरपि गतेषु द्विशत-वर्षेषु जातैः आर्थिकैः परिवर्तनैः अपि च वननीतीनां राज्यानां निजोद्योगानां राजनैतिकस्य प्रभावस्य कारणात् एते जनाः उद्यानेषु निर्माण-स्थलेषु अपि च गृहेषु वृत्तिं कर्तुं बाध्याः क्रियन्ते । इतिहासे प्रथमतया एवं भवति यत् तेषाम् एतेषु वनक्षेत्रेषु किमपि नियन्त्रणं नास्ति अथ च तत्र तेषां साक्षात् प्रतिरोधः नास्ति ।

झारखण्डस्य तत्समीपवर्ति-क्षेत्राणां च आदिवासिनः 1830 इति दशकाद् एव अधिकसंख्यायां भारतस्य विभिन्न-स्थानेषु तथा च मॉरिशस-कैरीबियन-ऑस्ट्रेलिया-प्रभृतिषु संसारस्य अनेकेषु देशेषु श्रमार्थं गच्छन्ति स्म । भारतस्य चाय-उद्योगः तेषाम् आदिवासिनां श्रमेण एव जीवनं लब्धवान् । अद्य एकस्मिन् असम-प्रान्ते एव केवलं सप्ततिः लक्षाःआदिवासिनः सन्ति । एतस्य विस्थापनस्य कथा, भीषण-कठिनतायाः, यातनायाः, विरहस्य, मृत्योः च कथा वर्तते । एकोनविंशत्यां शताब्द्यां एव एतेषां पलायनानां कारणात् पञ्च-लक्षम् आदिवासिनः मृत्युमुखं प्रविष्टाः । अधोलिखितं गीतम् आदिवासिनाम् आकाङ्क्षानाम् असम-प्रान्ते च तेषां वास्तविकीं स्थितिं ज्ञापयाति ।

आगच्छतु मिनि ! असमं चलेव ।
अस्माकं देशे तु बहूनि कष्टानि सन्ति ।
मिनि! असमभूमौ हरित-चाय-उद्यानानि सन्ति ।
प्रमुखः वदति - कार्यं कार्यम्
लिपिकः वदति- तान् गृह्णन्तु अत्र च आनयन्तु ।
अध्यक्षः कथयति अहं भवतः दण्डयिष्यामि ।
हे जादूराम ! भवान् अस्मान् असमं प्रेषयित्वा बहुच्छलं कृतवान् ।

श्रोत- बसु.एस.झारखण्ड-मूवमेण्ट: ऐथनीसिटी-कल्चर-एण्ड-साइलेंसः इति ।

अद्यतन-भारते के धातवः महत्त्वपूर्णाः सन्ति ? किमर्थम् ? ते धातवः कुतः लभ्यन्ते ? किं तत्र आदिवासिनां जनसङ्ख्या वर्तते ?

एतादृशान् पञ्च उत्पादान् वदन्तु ये वनात् प्राप्यन्ते अथ च येषां भवन्तः गृहेषु उपयोगं कुर्वन्ति ?

वनभूमिषु निम्नलिखिताः याचनाः केभ्यः जनेभ्यः क्रियते ?

- भवनानां रेलयानानां च निर्माणार्थं गृहकाष्ठानि ।
- खननस्य कृते वनभूमिः ।
- जन-जातीयेभ्यः भिन्नैः जनैः कृषेः कृते वनभूमेः उपयोगः क्रियते ।
- वन्यजीवाभयारण्य-रूपेण सर्वकाराय भूमेः अपेक्षा भवति ।

एताभ्यः याचनाभ्यः जनजातीयेषु समुदायेषु कथं प्रभावः भवति ?

अस्यां कवितायां कं विषयं वक्तुं प्रयासः क्रियते ।

इदं चित्रम् उडीसायाः कालाहाँडी-जनपदस्थस्य न्यामगिरि-पर्वतस्य अस्ति। इदं डोङ्गरिया-कोण्ड-नामकम् आदिवासि-समुदायस्य क्षेत्रम् अस्ति । न्यामगिरिः एतस्य समुदायस्य पवित्रः पर्वतः अस्ति। कश्चित् बृहद्- एल्यूमीनियम- जनसमूहः (कम्पनी) अत्र अथ आकरं शोधक-संयन्त्रं च (रिफाइनरी) इति उद्घाटयितुम् इच्छति। इयं योजना एनम् आदिवासि-समुदायं विस्थापितं करिष्यति। एतस्य समुदायस्य जनाः एतस्याः प्रस्तावित-योजनायाः प्रबलं विरोधं कृतवन्तः। पर्यावरणवादिनः अपि तेषां समर्थनं कुर्वन्ति। सर्वोच्च-न्यायालये कम्पनी-विरोधे अभियोगः अपि प्रचलति।

गृहकाष्ठानां, कृषेः, उद्योगानां च कृते विशालाः वनभूमयः वृक्षैः वनस्पत्यादिभिः च हीनाः कृताः। आदिवासिनां क्षेत्रेषु खनिज-पदार्थानाम् अन्येषां प्राकृतिकानां संसाधनानां च आधिक्यम् आसीत्। अतः एता भूमयः खननार्थम् अन्यासां बृहद्-औद्योगिकीनां परियोजनानां कृते च पुनः पुनः अपहरणं कृतम् । जनजातीयाः भूमीः अधिकर्तुं शक्तिशालिनः समुदायाः मिलित्वा कार्यं कृतवन्तः। बहुधा तेषां भूमिः बलात् परिहृताः अस्ति एवञ्च निर्धारितानां प्रक्रियाणां पालनम् अपि न्यूनातिन्यूनं कृतम् । सर्वकारीय-गणनया ज्ञायते यत् खननात्, खनन-परियोजनायाः कारणात् च जनाः विस्थापिताः जाताः तेषु विस्थापितेषु पञ्चाशत् प्रतिशतम् अधिकाः केवलम् आदिवासिनः आसन्। आदिवासिनां विषये कार्यकर्तृणां सङ्घटनानां कस्यचित् सर्वेक्षणस्य आधारेण ज्ञायते यत् आन्ध्रप्रदेशे, छत्तीसगढे, उडीसायां, झारखण्डे च ये जनाः विस्थापिताः सन्ति तेषु एकोनाशीति-प्रतिशतम् आदिवासिनः आसन्। तेषां भूमिः आधिक्येन सम्पूर्णे देशे निर्मितानां शताधिकानां जलाशयानां कृते उपयुक्ता । पूर्वोत्तरे भारते तेषां भूमिः चिरकालाद् सशस्त्रबल-सैनिकानाम् आदिवासिनां च मध्ये जायमानेन सङ्घर्षेण नष्टा अभवत् । एतत् अतिरिच्य भारते चतुःपञ्चाशत्–राष्ट्रिय-उद्यानानि ३७२ वन्यजीव-अभयारण्यानि च सन्ति । एतेषां सम्पूर्णं क्षेत्रफलं १,०९,६५२ वर्ग-किलो-परिमितम् अस्ति । एतानि एतादृशानि क्षेत्राणि सन्ति यत्र मूलरूपेण आदिवासिनः निवसन्ति स्म । अधुना ते ततः विस्थापिताः सन्ति। यदि ते एतेषु अरण्येषु वासस्य प्रयासं कुर्वन्ति तदा ते उग्रवादिनः इति उच्यन्ते।

स्वभूमेः अरण्येभ्यः च वियोगे सति आदिवासि-समुदायाः आजीविकायाः भोजनस्य च स्वस्य मुख्य-स्रोतसः वञ्चिताः भवन्ति । स्वस्य परम्परागत-निवास-स्थानानां परिहरणात् बहवः आदिवासिनः कार्यम् अन्वेष्टुं नगराणि प्रति आगच्छन्तः सन्ति। तत्र ते लघुषु उद्योगेषु अथवा निर्माणस्थलेषु च अल्पवेतनाय

आदिवासिनः प्रायशः दश-सहस्रं प्रकारकाणां पादपानां प्रयोगं कुर्वन्ति । तेषु प्रायशः अष्टौ सहस्रं प्रजातयः ओषधरूपेण ३२५ प्रजातयः कीटनाशक-रूपेण ४२५प्रजातयः निर्यास-रेजिन –डाई-इति रूपेण अथ च ५५० प्रजातयः तन्तूनां कृते प्रयोग-पथे आनीयन्ते। एतासु ३५०० प्रजातयः भोजनरूपेण प्रयुक्ताः भवन्ति। यदा आदिवासि-समुदायः वनभूमिषु स्वाधिकारात् च्युताः भवन्ति तदा एषा सम्पूर्णा ज्ञानस्य शक्तिः अपि समाप्ता भवति।

कार्यं कर्तुं बाध्याः जाताः । एवम्प्रकारेण ते निर्धनतायां निरुपाये च अहर्निशं प्रवर्तन्ते । ग्रामीणेषु क्षेत्रेषु ४५ प्रतिशतं ३५ प्रतिशतं च नागरक्षेत्रेषु आदिवासि-समूहाः विपन्न-रेखायाः अन्तर्गताः सन्तः स्वजीवनं यापयन्ति । एतस्मात् कारणात् ते बहुविधैः अभावैः ग्रस्ताः भवन्ति । तेषां बहवः बालकाः कुपोषणेन ग्रस्ताः भवन्ति । आदिवासिनां साक्षरता अपि न्यूना अस्ति ।

भवतां मतानुसारम् इदं तथ्यं महत्त्वपूर्णं किमर्थम् अस्ति यत् आदिवासिनः तेषां वनानां वनभूमेः उपयोग-सम्बद्धेषु निर्णयेषु स्वस्य विचाराभिव्यक्तेः अवसरं प्राप्नुयुः ?

यदा आदिवासिनः तेषां भूमितः अपसार्यन्ते तदा तेषाम् आयस्य स्रोतांसि अन्यानि च बहूनि साधनानि सर्वकालाय नष्टानि भवन्ति । ते स्वकीयाभ्यः ताभ्यः परम्पराभ्यः नीतिभ्यः नियमेभ्यः च वञ्चिताः भवन्ति याः परम्पराः तेषां जीवनस्य आस्तित्वस्य च स्रोतांसि वर्तन्ते । उडीसायाम् एकस्याः शोध-सन्यन्त्र-परियोजनायाः कारणात् विस्थापितः एकः गोविन्दमारन-नामधेयः जनः कथयति यत्– ते अस्माकं कृषियोग्यां भूमिम् अपहृतवन्तः । केवलं स्वल्प-सङ्ख्यकानि गृहाणि अवशिष्टानि सन्ति । ते श्मशान-भूमिं मन्दिराणि कूपान् तडागान् अन्यानि च सर्वाणि क्षेत्राणि स्वायत्तीकृतवन्तः । तत्र इदानीं वयं कथं जीविष्यामः ?

यथा भवन्तः पठितवन्तः यत् आदिवासि-जीवनस्य आर्थिकाः सामाजिकाः च आयामाः परस्परं सम्बद्धाः सन्ति । एकस्मिन् क्षेत्रे जातः विनाशः अन्यस्मिन् क्षेत्रे अपि प्रभावं जनयति । तेषां संसाधनानां जायमानं बलात् स्वीकरणं, विस्थापनस्य च एषा प्रक्रिया प्रायशः कष्टप्रदा हिंसायुक्ता च भवति ।

अल्पसङ्ख्यकाः तेषाम् उपान्तकरणं च

प्रथमे घट्टके भवन्तः पठितवन्तः यत् मौलिकाधिकाराणां माध्यमेन अस्माकं संविधानं धार्मिक-भाषायी-अल्पसङ्ख्यकेभ्यः सुरक्षां प्रददाति । भवतां दृष्टौ एतेभ्यः अल्पसङ्ख्यकेभ्यः एताः सुरक्षाः किमर्थं दीयन्ते ? अल्पसङ्ख्यक-शब्दः प्रायेण एतादृशानां समुदायानां कृते उपयुज्यते ये सङ्ख्यायाः दृष्ट्या अन्यायाः जनसङ्ख्यायाः दृष्टौ अल्पतराः सन्ति । परन्तु एषा अवधारणा केवलं सङ्ख्यायाः दृष्ट्या एव सीमिता नास्ति । एतस्यां न केवलं सत्तायाः संसाधनानां च प्राप्तिः इत्यादिप्रभृतयः विषयाः सम्बद्धाः सन्ति अपितु एतस्य सामाजिकाः सांस्कृतिकाः च आयामाः अपि भवन्ति । यथा भवन्तः प्रथमे घटके पठितवन्तः आसन् –भारतीयं संविधानम् एतत् तथ्यम् अङ्गीकरोति यत् बहुसङ्ख्यकानां समुदायानां संस्कृतिः समाजस्य सर्वकारस्य च अभिव्यक्तिं प्रभावितां कर्तुं शक्नोति । एतस्याम् अवस्थायां सङ्कीर्णा मानसिकता हानिप्रदा भवितुं शक्नोति । एतस्याः कारणात् च अल्पसङ्ख्यकाः समुदायाः उपान्तस्थाः जायन्ते । एतस्यां स्थितौ अल्पसङ्ख्यकानां समुदायानां कृते बहुसङ्ख्यक-समुदायानां सांस्कृतिक-वर्चस्वस्य आशङ्कातः त्रायितुं सुरक्षात्मकानां प्रावधनानाम् आवश्यकता भवति ।

अस्माभिः किमर्थम् अल्पसङ्ख्यकानां कृते सुरक्षात्मकानि प्रावधानानि करणीयानि ?

एतानि प्रावधानानि तान् भेदभावस्य क्षतेः, आशङ्कातः च अपि रक्षन्ति । कासुचित् विशिष्टासु परिस्थितिषु लघु-समुदायाः स्वजीवनस्य सम्पत्तेः कुशलक्षेमस्य च विषये असुरक्षिताः इति अनुभवितुं शक्नुवन्ति । असुरक्षायाः एते भावाः तदा इतोऽपि वर्धितुं शक्नुवन्ति यदा अल्पसङ्ख्यकस्य बहुसङ्ख्यकस्य च समुदायस्य मध्ये प्रतिकूलं वातावरणं भवति । संविधाने एतेषां सुरक्षायाः प्रबन्धानां व्यवस्था एतदर्थं कृता अस्ति यत् अस्माकं संविधानं भारतस्य सांस्कृतिक-विविधतायाः सुरक्षायाः समानतायाः न्यायस्य च स्थापनायाः कृते सङ्कल्पबद्धम् अस्ति । यथा भवन्तः पञ्चमे अध्याये पठितवन्तः यत् अधिनियमस्य संरक्षणाय मौलिकाधिकारान् सफलीकर्तुं न्यायापालिका एकां महत्त्वपूर्णां भूमिकां निर्वहति । यदि कोऽपि नागरः इत्थम् अनुभवति यत् तस्य अधिकाराणां हननं जायमानम् अस्ति तदा सः न्यायालयं प्रति गन्तुं शक्नोति । आगच्छन्तु अधुना एतेषां प्रावधानानां प्रकाशे मुस्लिम-जनानां सन्दर्भे उपान्तकरणं जानीमः ।

मुस्लिम-जनाः उपान्तकरणं च

२००१ तमस्य वर्षस्य जनगणनायाः अनुसारं भारतस्य जनसङ्ख्यायां मुस्लिम-जनानां सङ्ख्या १३.४ प्रतिशतम् अस्ति । ते उपान्तस्थाः इति मन्यन्ते यतोहि अन्येषां समुदायानां साम्ये ते सामाजिकस्य आर्थिकस्य च विकासस्य तावतः अवसरान् न प्राप्तवन्तः । विभिन्नेभ्यः स्रोतोभ्यः स्वीकृताभ्यः निम्नलिखिताभ्यः सारणीभ्यः ज्ञायते यत् मूलभूतानां सुविधानां साक्षरतायाः सर्वकारीयाणां वृत्तीनां च दृष्ट्या मुस्लिमसमुदायस्य सामाजिकी आर्थिकी च स्थितिः कीदृशी अस्ति ।

१. मूलभूत-सुविधाः – १९९४	
मृण्मयानि गृहाणि	६३.६% मुस्लिम-जनाः मृण्मयेषु गृहेषु निवसन्ति ।
	५५.२ % हिन्दवः मृण्मयेषु गृहेषु निवसन्ति ।
विद्युत्	३०% मुस्लिम-जनानां गृहेषु विद्युत् अस्ति ।
	४३.२ % हिन्दुगृहेषु विद्युत् अस्ति ।
नलिकायाः जलम्	१९.४ % मुस्लिम-जनाः नलिकाजलस्य प्रयोगं कुर्वन्ति ।
	२५.३ % हिन्दवः नलिका-जलस्य प्रयोगं कुर्वन्ति ।

स्रोत- अबुसालेह-शरीफ (१९९९), मानवसंसाधन-विकास-मन्त्रालयस्य आख्यानुसारम् । अ प्रोफाइल ऑफ् इण्डियन स्टेट्स इन दि १९९० ज, ऑक्सफोर्ड यूनिवर्सिटी प्रेस फॉर नेशनल काउंसिल ऑफ् एप्लाइड इकॉनॉमिक रिसर्च, नयी देहली , पृ.२३६,२३८,२४०

किं मुस्लिम-जनानां कृते मूलभूत-सुविधाः समानरूपेण उपलब्धाः सन्ति ?

२. विभिन्न-धर्मेषु साक्षरतायाः मात्रा, २००१						
सम्पूर्णाः	हिन्दवः	मुसलिमाः	ईसाई-जनाः	सिखाः	बौद्धाः	जैनाः
६५ %	६५%	५९%	८०%	७०%	७३%	९४%
स्रोतः – भारतस्य जनगणना, २००१						

कस्य धार्मिक-समुदायस्य साक्षरतायाः मात्रा न्यूनतरा वर्तते ?

3. सर्वकारीय-वृत्तिषु मुस्लिम-जनानां प्रतिशतता						
जनसङ्ख्या	भारतीय-प्रशासनिकसेवा (आईएएस)	भारतीय-आरक्षकसेवा (आईपीएस)	भारतीयविदेश-सेवा (आईएफ. एस)-जनाः	केन्द्रियसार्वजनिक-क्षेत्रीयघटकाः (पीएसयू)	राज्यस्तरीयः (पीएसयू)	वित्तकोशः रिजर्व-वित्त-कोशः
१३.५	३	४	१.८	३.३	१०.८	२.२
स्रोतः – भारते मुस्लिम-समुदायस्य सामाजिक-आर्थिक-शैक्षणिक-स्थितयः, प्रधानमन्त्रिणः उच्च-स्तरीयायाः समितेः समाख्या, २००६						

एते अङ्काः किं प्रदर्शयन्ति ?

एतत् तथ्यं मनसि निधाय यत् मुस्लिम-जनाः विकासस्य विभिन्नेषु सङ्केतकेषु अविकसिताः सन्ति, सर्वकारः २००५ तमे वर्षे एकस्याः उच्चस्तरीयाः समितेः घटनं कृतवान् । न्यायमूर्तेः राजेन्द्र-सच्चरस्य आध्यक्षे निर्मित-समितिः भारते मुस्लिम-समुदायस्य सामाजिक-आर्थिक-शैक्षणिक-स्थितानां च अवलोकनं कृतवती ।समाख्यायाम् अस्यां मुस्लिम-समुदायस्य उपान्तकरणस्य विस्तरेण अध्ययनं कृतम् । समितेः समाख्यया ज्ञायते यत् विभिन्न-सामाजिक-आर्थिक-शैक्षणिक-सङ्केतकानां दृष्ट्या मुस्लिम-जनानां स्थितिः अनुसूचित-जाति-अनुसूचित-जाति-प्रभृतिभिः अन्यैः उपान्तस्थ-समुदायैः पृथक् नास्ति अपितु समाना एव वर्तते । उदाहरणार्थं यथा – सप्ततः षोडश-वर्षदेशीयाः मुस्लिम-बालकाः अन्येषां सामाजिक-धार्मिक-समुदायानां बालकानां तुलनायां सामान्यतः न्यूनतराणि वर्षाणि यावत् एव विद्यालयीयां शिक्षां गृह्णन्ति ।

मुस्लिम-जनानाम् आर्थिक-सामाजिकस्य उपान्तकरणस्य बहवः पक्षाः सन्ति । अन्येषाम् अल्पसङ्ख्यकानाम् इव मुस्लिम-जनानाम् अपि बह्व्यः परम्पराः रीति-नीतयः व्यवहाराः च मुख्यधारायाः तुलनायां बहुपृथक् सन्ति । सर्वेषु मुस्लिम-जनेषु नैव परन्तु केषुचित् मुस्लिम-जनेषु बुर्का-लम्ब-श्मश्रू-फैज-शिरस्त्राणानां प्रचलनं दृश्यते ।

सच्चर-समितेः समाख्यायां प्रदत्त-शिक्षा-सम्बद्धाङ्कान् पठन्तु –

- **६-१४ वर्षदेशीया २५प्रतिशतं -बालकाः कदापि विद्यालयं न गतवन्तः अथवा ते विद्यालयान् त्यक्तवन्तः । कस्यचिद् अपि सामाजिकधार्मिक-समुदायस्य तुलनायाम् इयं सङ्ख्या बृहत्तरा वर्तते ।**

किं भवन्तः अनुभवन्ति यत् एतस्याः स्थितेः समाधानाय विशेषस्य प्रावधानस्य आवश्यकता वर्तते ?

मुस्लिम-महिलाः भारते महिला-आन्दोलनस्य एकः महत्त्वपूर्णः भागः असीत्।

बहवः जनाः सर्वान् मुस्लिमजनान् एतैः चिह्नैः एव चयनस्य प्रयासं कुर्वन्ति। एतस्मात्कारणात्एव प्रायः ते भिन्न-दृष्ट्या अवलोक्यन्ते। केचन जनाः मन्यन्ते यत् ते अस्माकं समानाः न सन्ति। प्रायः एतादृशं चिन्तनम् एव तैः सह कुव्यवहारस्य भेदभावस्य च व्याजभूतं भवति। सप्तमकक्षायां भवन्तः पठितवन्तः यत् कथम् अंसारी-परिवारः भाटक-प्रकोष्ठम् अन्वेष्टुं कष्टम् अनुभवति स्म। मुस्लिम-जनानाम् एतस्य सामाजिकस्य उपान्तकरणस्य कारणात् एव ते कासुचित् परिस्थितिषु ते येषु क्षेत्रेषु पूर्वतः एव निवसन्ति स्म, ततः ते निर्गच्छन्तः सन्ति यस्मात् कारणात् च तेषां "घेटोआइज़ेशन" (ghettoisation) इति प्रारम्भः भवति। कदाचित् एषः पूर्वाग्रहः एव घृणां हिंसां च जनयति।

अहम् एकस्मिन् मुस्लिम-बहुल-क्षेत्रे निवसामि। केभ्यश्चित् दिनेभ्यः पूर्वं तत्र रमजान इति उत्सवस्य अवसरे त्रुटिः जाता तया तत्र शीघ्रम् एव सांप्रदायिकं रूपं गृहीतम्। तदा मम भ्राता प्रतिवेशे एव इफ्तार इत्याख्ये प्रीतिभोजे गतवान् आसीत्। अहं पारम्परिकानि वस्त्राणि अर्थात् पादांशुकं करांशुकं च धृतवती आस्म। मम भ्राता शेरवानी-वस्त्रं धृतवान् आसीत्। गृहागमन-काले आवाम् उक्ताः यत् आवां स्वस्य वस्त्राणि परिवर्त्य जींस-उरुकं युतकं च धरेव।

अधुना यद्यपि सर्वं समीचीनम् अस्ति तर्हि अहम् आश्चर्यम् अनुभवामि यत् आवां वस्त्राणि परिवर्तितुं किमर्थम् उक्तौ अपि च एतत् वचनं विचित्रम् इति अनुभूतवती। किम् अस्माकं वेशभूषातः अस्माकं परिज्ञानं भवति अथ च एतत् परिज्ञानम् एव सर्वेषाम् अपायानां भेदभावस्य च मूलकारणम् अस्ति ?

ऐनी.ए. फारूकी

उपर्युक्त-निबन्धः भवतां समवयस्कया एकया बालिकया लिखितः अस्ति। भवतां मते सा किं वक्तुं प्रयासं करोति ?

अस्य अध्यायस्य उपर्युक्तभागे वयं दृष्टवन्तः यत् मुस्लिम-जनानाम् आर्थिकस्य सामाजिकस्य च उपान्तकरणस्य मध्ये गहन-सम्बन्धः अस्ति। अस्मिन् अध्याये पूर्वं भवन्तः आदिवासिनां स्थितेः विषये पठितवन्तः। सप्तमकक्षायां भवन्तः भारते महिलानाम् असमानस्थितेः विषये पठितवन्तः। एतेषां सर्वेषां समूहानाम् अनुभवैः ज्ञायते यत् उपान्तकरणम् इति एका जटिला परिघटना अस्ति यस्याः विमुक्तिं प्राप्तुम् अनेकासां रणनीतीनां साधनानां सुरक्षाणां च आवश्यकता वर्तते। एतस्य अर्थः अस्ति यत् संविधानेन पारिभाषितानाम् अधिकाराणाम्, एतान् अधिकारान् साकारीकर्तुम् अधिनियमानां नीतीनां संरक्षणं च अस्माकं सर्वेषाम् समानरूपेण दायित्वम् अस्ति। एतैः विना न तु वयं तस्याः विविधतायाः संरक्षणं कर्तुं शक्नुमः या अस्माकं देशाय काञ्चिद् अपूर्वां छटां ददाति, न च एव समानतां प्रति राज्यस्य प्रतिबद्धतां साकारीकर्तुं शक्यामः।

निष्कर्षः -

अस्मिन् अध्याये वयम् एतत् ज्ञातुं प्रयासं कृतवन्तः यत् उपान्तस्थस्य समुदायस्य कः अभिप्रायः वर्तते । वयं विभिन्नानां समुदायानाम् अनुभवैः एतत् तथ्यम् अवगन्तुं प्रयासं कृतवन्तः । एतेषां समुदायानाम् उपान्तस्थस्य पृथक्-पृथक् कारणानि सन्ति । प्रत्येकं समुदायः एनं विषयं पृथक्तया अपि अनुभवति। वयम् एतत् अपि दृष्टवन्तः यत् उपान्तकरणस्य सम्बन्धः अभावेन, पूर्वाग्रहेण, शक्तिहीनतायाः च अनुभवैः अपि युक्तः अस्ति । अस्माकं देशे इतोऽपि बहवः उपान्तस्थाः समुदायाः सन्ति । दलितः अपि अस्य एव एकः समुदायः अस्ति । अस्य समुदायस्य विषये वयम् अग्रिमे अध्याये विस्तरेण पठिष्यामः । उपान्तकरणात् केवलं दुर्बला सामाजिक-व्यवस्था एव न उदेति अपितु शिक्षायाः अन्येषां संसाधनानां च प्राप्तिः अपि न भवति।

एतत् अतिरिच्य उपान्तस्थानां समुदायानां जीवनम् अपि परिवर्तयितुं शक्यते, परिवर्तयति अपि च । कश्चित् अपि सदा उपान्तस्थः न भवति । यदि वयम् उपान्तकरणस्य एतेषु उदाहरेणु अवधानं कुर्मः तदा तत्र वयं द्रक्ष्यामः यत् एतयोः द्वयोः समुदाययोः सङ्घर्षस्य प्रतिरोधस्य च एकः लम्बतरः इतिहासः अस्ति। उपान्तस्थाःसमुदायाः स्वस्य सांस्कृतिकीं विशेषतां स्थापयितुं प्रयत्नं कुर्वन्ति अपि च एतत् इच्छन्ति अपि । अपि च अन्येषु अधिकारेषु विकासस्य क्रमेषु अन्येषु अवसरेषु च सहभागिताम् इच्छन्ति। अग्रिमे अध्याये भवन्तः ज्ञास्यन्ति यत् विभिन्नाः समूहाः एतस्य उपान्तकरणस्य साम्मौख्यं कथं कृतवन्तः ।

सच्चर-समितेः समाख्या मुस्लिमजनानां विषये प्रचलिताः अन्याः विपरीताः अवधारणाः अपि प्रकाशितवती। सामान्यतः अङ्गीक्रियते यत् मुस्लिमजनाः स्वस्य बालकान् केवलं मुस्लिम-विद्यालयं प्रति एव प्रेषयितुम् इच्छन्ति । गणनाद्वारा ज्ञायते यत् केवलं चतुःप्रतिशतम् एव मुस्लिमबालाः मुस्लिमविद्यालयं (मदरसा) प्रति गच्छन्ति । मुस्लिमजनानां षट्षष्टिप्रतिशतं बालकाः सर्वकारीयं विद्यालयम् अपि च त्रिंशत्-प्रतिशतं बालकाः निजविद्यालयेषु च पठन्ति।

अभ्यासः

१. "उपान्तकरणम्" (हाशियाकरण)इति शब्देन भवन्तः किम् अवगच्छन्ति ? स्वशब्देषु द्वित्रेषु वाक्येषु लिखन्तु।

2. आदिवासिनः नैरन्तर्येण उपान्तस्थाः कथं भवन्ति ? कारणद्वयं वदन्तु।

3. अल्पसङ्ख्यक-समुदायस्य सुरक्षायाः कृते संवैधानिक-सुरक्षाः महत्त्वपूर्णाः इति भवन्तः किमर्थं मन्यन्ते ? एतस्य एकं कारणं वदन्तु।

4. पाठे अल्पसङ्ख्यक-उपान्तकरण-युक्त-भागम् एकदा पुनः पठन्तु। भवन्तः अल्पसङ्ख्यक-शब्देन किम् अवगच्छन्ति ?

5. भवन्तः एकस्यां चर्चायां भागं गृह्णन्ति यत्र भवद्भिः एकस्य तर्कस्य समर्थने तर्काः दातव्याः यत् मुस्लिमः एकः उपान्तस्थः समुदायः अस्ति। एतस्मिन् अध्याये प्रदत्तानां सूचनानाम् आधारेण तर्कद्वयं प्रस्तुवन्तु ?

6. कल्पनां कुर्वन्तु यत् भवन्तः दूरदर्शने जनवरी-मासस्य २६ दिनाङ्कस्य प्रचरणं पश्यन्ति। भवतां एका सखी भवतां निकटे उपविष्टा वर्तते। सा सहसा वदति "एतान् आदिवासिनः पश्यतु, कियन्तः विचित्रवर्णाः सन्ति। एवं प्रतीयते यत् एते सदैव नृत्ये एव मग्नाः भवन्ति। तस्याः कथनं श्रुत्वा भवान् भारते आदिवासिनां जीवनसम्बद्धाः काः काः वार्ताः तां वदिष्यति ? तासु कथनत्रयं लिखन्तु।

7. चित्रकथा-पट्टे भवन्तः दृष्टवन्तः यत् हेलेन-होपः आदिवासि-जीवन-कथाधारितम् एकं चलचित्रं निर्मातुम् इच्छति। किं भवन्तः आदिवासिनां विषये एकां कथां रचयित्वा तेषां साहाय्यं कर्तुं शक्नुवन्ति ?

8. किं भवन्तः एतेन तथ्येन सहमताः सन्ति यत् आर्थिकम् उपान्तकरणं सामाजिकम् उपान्तकरणं च परस्परं सम्बद्धे स्तः ? कथम् ?

शब्द-सङ्कलनम्

निम्नोच्च-भावाः– व्यक्तीनाम् अथवा वस्तूनाम् एका क्रमिका व्यवस्था अस्ति । सामान्यतः निम्नोच्च-सोपानस्य सर्वतः अधस्तने पादे ते जनाः भवन्ति येषां पार्श्वे अल्पीयसी शक्तिः वर्तते । जातेः व्यवस्था निम्नोच्च-भेदभावस्य व्यवस्था अस्ति यस्यां च दलिताः निम्नस्तरे मन्यन्ते ।

घेटोआइजेशन - अयं शब्दः प्रायशः एतादृशानां क्षेत्राणाम् अथवा वासस्थानां कृते उपयुज्यते यस्मिन् मुख्यरूपेण एकस्य एव समुदायस्य जनाः निवसन्ति । एतां स्थितिं यावत् प्राप्यमाणा प्रक्रिया घेटोआइजेशन इति उच्यते । एषा प्रक्रिया विभिन्नेषु सामाजिकेषु सांस्कृतिकेषु आर्थिकेषु च कारणेषु आधारिता भवितुं शक्नोति । भयम् अथवा शत्रुता अपि कञ्चित् समुदायम् एकत्रीभवितुं बाध्यं कर्तुं शक्नुतः यतो हि स्वसमुदायस्य जनैः सह निवासः, तेषां कृते अधिकः सुखदः भवति । एतस्य समुदायस्य पार्श्वे ततः पलायनस्य अधिकाः अवसराः न भवन्ति यस्मात् कारणात् असौ अवशिष्टसमाजात् सर्वदा पृथग्भूतः भवति ।

मुख्यधारा - नियमानुसारं कस्याः अपि नद्याः अथवा जलधारायाः प्रवाहः मुख्यधारा इति उच्यते । अस्मिन् अध्याये एषः शब्दः एतादृशस्य सांस्कृतिकस्य सन्दर्भस्य कृते प्रयुक्तः अस्ति यस्मिन् वर्चस्वशालिनः समुदायस्य रीतिः नीतिः परम्पराः च एव उचिताः इति मन्यन्ते । एतस्मिन् एव क्रमे ते समुदायाः अथवा जनाः अपि मुख्यधारा इति उच्यते ये समाजस्य केन्द्रभूताः इति मन्यन्ते, यथा- बहुधा शक्तिशालिनः अथवा वर्चस्वशालिनः समूहाः इति ।

विस्थापितः - एतादृशाः जनाः ये जलबन्ध-खननादीनां विकासपरियोजनानाम् आवश्यकताः पूरयितुं बलात् तेषां गृहेभ्यः ते उत्पाट्यन्ते ।

कुपोषितः – एतादृशः जनः यः पर्याप्तं भोजनम् अथवा पोषणं न प्राप्नोति ।

॥ इति सप्तमाध्यायः ॥

अष्टमः अध्यायः

उपान्तीकरणात् मुक्तिः

गताध्यायेषु वयं द्वयोः भिन्नयोः समूहयोः असमानतायाः भेदभावस्य च तेषाम् अनुभवानां विषये पठितवन्तः। एते समूहाः यद्यपि अल्पशक्तयः सन्ति, तथापि ते पृथक्-करणस्य अन्येषां च वर्चस्वस्य विरोधं कृतवन्तः ते च स्वस्य अभिव्यक्तिं कृतवन्तः अपि च ते सङ्घर्षरताः आसन्। ते स्वस्य बृहत्तरे इतिहासे विविधानां रणनीतीनां माध्यमेन परिस्थिनां परिवर्तनाय प्रयासं कृतवन्तः। स्वस्थितेः परिष्काराय ते धार्मिक-सान्त्वना, सशस्त्र-सङ्घर्षः, आत्मपरिष्कारः, शिक्षा, आर्थिकविकासः च इत्यादीन् पृथक् पृथक् मार्गान् आश्रितवन्तः। सङ्घर्षस्य कः मार्गः चेतव्यः – इदं प्रत्येकस्मिन् विषये तासु परिस्थितिसु आश्रितं भवति यासु उपान्तस्थाः समुदायाः निवसन्ति।

अस्मिन् अध्याये वयम् इदं ज्ञातुं प्रयत्नं करिष्यामः यत् विभिन्न-समूहैः जनैः च असमानतायाः निवृत्त्यर्थं के के उपायाः कृताः। स्वतन्त्रतायाः अनन्तरम् अपि एतादृशाः सङ्घर्षाः तर्क-वितण्डाः च दीयन्ते यद्यपि तेषां स्वरूपं परिवर्तितम् अस्ति। अद्य अस्माकं देशस्य आदिवासिनः दलिताः मुस्लिमजनाः महिलाः एवञ्च अन्ये उपान्तस्थ-समूहाः एतं तर्कं वदन्ति यत् एकस्य लोकतान्त्रिक-देशस्य नागरत्वात् ते अपि समानरूपेण अधिकारान् प्राप्नुयुः अपि च तेषाम् अधिकाराणां रक्षणम् अपि स्यात्। तेषु बहुभिः जनैः स्वचिन्ताः अपाकर्तुं संविधानस्य अपि आश्रयणं कृतम्। अस्मिन् अध्याये एव वयं द्रक्ष्यामः यत् उपान्तस्थाः समूहाः स्वसङ्घर्षकाले संविधानस्य आश्रयणं कथं कुर्वन्ति। वयम् इदम् अपि पठिष्यामः यत् विभिन्न-समूहान् शोषणात् त्रातुम् अधिकाराः अनियमरूपेण कथं परिवर्त्यन्ते। तत्र एतस्मिन् तथ्ये अपि विचारं करिष्यामः यत् एतेषां समुदायानां कृते विकासस्य लाभं प्रदातुं सर्वकारस्य पक्षतः कीदृशाः नीतिगत-प्रयासाः कृताः वर्तन्ते।

मौलिक-अधिकाराणाम् उपयोगः

यथा भवन्तः अस्य पुस्तकस्य प्रथमे अध्याये पठितवन्तः, संविधाने एतादृशाः बहवः सिद्धान्ताः सूत्रबद्धाः कृताः सन्ति ये अस्माकं समाजस्य राज्यस्य च व्यवस्थां लोकतान्त्रिकीं कुर्वन्ति । एते सिद्धान्ताः मौलिकाधिकाराणां माध्यमेन परिभाषिताः । अयम् अस्माकं संविधानस्य एकः महत्त्वपूर्णः भागः वर्तते। एते अधिकाराः समानरूपेण सर्वेषां भारतीयानां कृते उपलब्धाः सन्ति। उपान्तस्थाः समुदायाः एतान् अधिकारान् द्विधा प्रयुक्तवन्तः। प्रथमतः - स्वमौलिक-अधिकारेषु बलाघातं कृत्वा ते सर्वकारं, तैः (उपान्तस्थ-समुदायैः) सह जात-अन्यायस्य विषये अवधान-आकर्षणाय बाध्यं कृतवन्तः । द्वितीयः – ते एतस्मिन् तथ्ये बलाघातं कृतवन्तः यत् सर्वकारः एतान् नियमान् व्यवहारपथम् आनयेत् । बहुधा उपान्तस्थानां सङ्घर्षस्य कारणतः एव सर्वकारः मौलिकानाम् अधिकाराणां भावनायाः अनुरूपं नूतनान् अधिनियमान् निर्मातुं बाध्यः जातः ।

संविधानस्य सप्तदश-अनुच्छेदानुसारम् अस्पृश्यतायाः उन्मूलनं जातम् अस्ति । एतस्य अर्थः अस्ति यत् अधुना कोऽपि जनः दलितान् अध्ययनात् देवालय-गमनात् सार्वजनिकानां सुविधानां प्रयोगात् च, न वारयितुं शक्नोति । एतस्य अर्थः अस्ति यत् अस्पृश्यता इति दूषितं प्रचलनम् अस्ति अथ च लोकतान्त्रिक-सर्वकारः एतस्य आचरणं न सहिष्यते । परिणामतः अस्पृश्यता एकः दण्डनीयः अपराधः अस्ति ।

संविधाने एतादृशाः अन्ये अपि अनुच्छेदाः सन्ति ये अस्पृश्यतायाः विरोधे सन्ति । उदाहरणार्थं पश्यामः – संविधानस्य पञ्चदशे अनुच्छेदे उक्तम् अस्ति यत् भारतस्य केनापि नागरेण सह धर्म-प्रजाति-जाति-लिङ्ग-जन्मस्थानाम् आधारेण भेदभावः न कर्तुं शक्यते । एतस्मिन् विषये भवन्तः सप्तमकक्षायां समानता-केन्द्रित-अध्याये पर्याप्तं पठितवन्तः । समानतायाः अधिकारस्य हनने जाते सति दलिताः एतस्य प्रावधानस्य आश्रयं स्वीकुर्वन्ति ।

इत्थं यदि दलिताः अनुभवन्ति यत् कोऽपि जनः अथवा समुदायाः

दलितशब्दस्य अर्थः भवति – "दबा-कुचला" इति । दलितसमूहैः अयं शब्दः जाति-व्यवस्थायाः अन्तर्गतम् आत्मना सह शतकेभ्यः जायमानं भेदभावं रेखाङ्कितं कर्तुं स्वयं चितः अस्ति ।

इयं कविता महाराष्ट्रस्य विख्यात-भक्त-कवयित्री-सोयाराबाई-द्वारा लिखिता अस्ति। सा चतुर्दश-शताब्द्याः प्रख्यात-भक्त-कवि-चोखामेला इत्यस्य पत्नी आसीत्। सोयराबाई-महोदया महार-जातेः आसीत्। तस्मिन् काले एषा जातिः अस्पृश्या इति मन्यते स्म।

काया अस्ति दूषिता
कथनम् अस्ति तेषाम्
अपि च केवलम् आत्मा वर्तते निष्कलङ्कम्-

परन्तु दूषित-काया
उत्पद्यते कायायाः अन्तस्थात् एव

अनुष्ठानम् अस्ति सः कः
भवति यस्मात् काया-शुद्धिः ?

एतादृशः कश्चित् जीवः नास्ति
यः उत्पन्नः न स्यात्
रक्तरञ्जित-कुक्षितः
अयम् एव अस्ति तस्य ईश्वरस्य महिमा

अतः दूषणम् अस्ति अन्तः
दूषिता वर्तते काया अन्तःस्थात्
एतस्मिन् कश्चित् भ्रमः न स्यात्
महारी-चोखायाः अस्ति एतत् कथनम्।

स्रोतः – उमा-चक्रवर्ती, जेंडरिंग-कास्ट; थ्रू ए फेमिनिस्लेंस, स्त्री, २००३, पृष्ठः-९९.

एतस्यां कवितायां सोयाराबाई-महोदया शुद्धतायाः चिन्तने प्रश्नं करोति यत् प्रत्येकं मनुष्यस्य जन्मप्रक्रिया एका एव अस्ति अतः एतादृशं किमपि वस्तुजातं नास्ति यत् एकस्य शरीरम् अधिकं शुद्धम् अपरस्य च न्यूनशुद्धम् इति कर्तुं शक्नोति। सम्भवतः सा एवं वक्तुम् इच्छति यत् जाति-व्यवस्थायां जनानां विभिन्नस्थानेभ्यः कार्येभ्यः ज्ञानात् प्रतिष्ठातः वा च्युतिकरणम् अथवा जनानाम् अन्योऽन्येभ्यः पृथक्-कारकः अस्पृश्यताभावः कर्मणः स्वरूपात् न उत्पद्यते। अपितु अयम् अस्माकम् अन्तःस्थात् अस्माकं विचारेभ्यः अस्माकं स्व-मूल्य-मान्याताभ्यः च उदेति।

अथवा सर्वकारः तैः सह सम्यग् न व्यवहरति, तर्हि ते मौलिक-अधिकाराणाम् आश्रयं स्वीकर्तुं शक्नुवन्ति। तैः पौनःपुन्येन भारतसर्वकारस्य मौलिक-अधिकारान् प्रति अवधानम् आकर्षितम् अपि च ते एतस्मिन् तथ्ये बलाघातं कृतवन्तः यत् सर्वकारः संविधानस्य पालनं कुर्यात् अपि च तेभ्यः न्यायं दद्यात्।

तथैव मुस्लिमाः अन्ये अल्पसङ्ख्यकसमुदायाः अपि संविधाने प्रदत्त-मौलिक-अधिकाराणाम् आश्रयं स्वीकृतवन्तः सन्ति। ते धार्मिक-सांस्कृतिक-शैक्षणिक-अधिकाराणां स्वतन्त्रतायाः अधिकारार्थं बलाघातं कृतवन्तः। यत्र पर्यन्तं सांस्कृतिकानां शैक्षणिकाधिकाराणां च प्रश्नः अस्ति, मुस्लिमाः पारसी इत्यादयः च सांस्कृतिक-धार्मिक-समूहाः स्वसंस्कृतेः सुरक्षायाः अधिकारं प्राप्तवन्तः सन्ति। अनेन प्रकारेण विभिन्न-प्रकारकाणां सांस्कृतिक-अधिकाराणां व्यवस्थां कृत्वा संविधानेन तथाविधानां समूहानां कृते सांस्कृतिक-न्यायप्रदानस्य प्रयासः कृतः। एतस्य उद्देश्यः अयम् अस्ति यत् एतेषां समूहानां संस्कृतौ न तु बहुसङ्ख्यक-समुदायस्य संस्कृतेः प्रभुत्वं स्यात् न च सा नष्टा स्यात्।

उपान्तस्थानां वर्गाणां कृते अधिनियमाः

यथा भवन्तः पठितवन्तः आसन्, सर्वकारः स्वस्य नागराणां सुरक्षार्थम् अधिनियमान् निर्माति। परन्तु सर्वकारः केवलम् अनेन प्रकारेण एव क्रियान्वयनं न करोति। अस्माकं देशे उपान्तस्थानां वर्गाणां कृते विशिष्टाः अधिनियमाः नीतयः च निर्मिताः सन्ति। बह्व्यः नीतयः अथवा योजनाः कस्यापि समितेः परामर्शानाम् अथवा सर्वेक्षणादीनां परिणामेषु आधारिता भवन्ति। सर्वकारः एतादृशीः नीतीः प्रोत्साहयति, यतो हि विशेष्टेभ्यः वर्गेभ्यः उचिताः अवसराः दीयेरन्।

सामाजिक-न्यायस्य प्रोत्साहनम्

संविधानस्य क्रियान्वयनार्थं राज्यानि केन्द्रसर्वकाराः च जनजातीय-बहुल-क्षेत्रेषु अथवा दलित-बहुल-जनसङ्ख्यकेषु क्षेत्रेषु विशेषाः योजनाः चालयन्ति। उदाहरणार्थम् – केषुचित् स्थानेषु दलितानाम् आदिवासिनाम् च कृते सर्वकारस्य पक्षतः मुक्तरूपेण अथवा न्यून-मात्रासु च छात्रावासस्य सुविधा प्रदत्ता अस्ति तस्मात् च ते शिक्षासम्बन्धीः सुविधाः प्राप्नुयुः यत् च शक्यम् अस्ति यत् तेषां स्वक्षेत्रेषु उपलब्धाः न भवेयुः।

कासाञ्चित् आवश्यक-सुविधानाम् उपलब्धतायाः प्रदानं स्यात् एतत् अतिरिच्य सर्वकारः अधिनियमानाम् अपि प्रयोगं करोति

यस्मात् च व्यवस्थायां निहिताम् असमानतां समापयितुं दृढा-प्रयासाः भवेयुः। आरक्षणस्य व्यवस्था एतादृशः एव एकः महत्त्वपूर्णः अधिनियमः अथवा नीतिः अस्ति। एषः महत्त्वपूर्णः विषयः अस्ति परन्तु सह एव बहु-विवादास्पदम् अपि वर्तते । शिक्षासंस्थानेषु सर्वकारीय-वृत्तिषु च, आदिवासिनां कृते दलितानां च कृते पृथक्-रूपेण आरक्षित-स्थानानाम् अधिनियमः एकस्मिन् महत्त्वपूर्णे तर्के आधारितम् अस्ति । एतस्य कारणम् इदम् अस्ति यत् अस्माकं समाजे केषाञ्चित् समूहानां कृते शताधिक-वर्षाणि यावत् पठन-पाठनस्य अन्येषां कौशलानां च अर्जनस्य अवसरः नासीत्। ते एताभ्यः सुविधाभ्यः च वञ्चिताः आसन् । यत्र एतादृशी स्थितिः भवति तत्र लोकतान्त्रिक-सर्वकारेण एतेषां समूहानां साहाय्यार्थं केचन दृढप्रयासाः करणीयाः भवन्ति।

आरक्षण-नीतिः केन प्रकारेण कार्यं करोति ? देशस्य सर्वेषां राज्यसर्वकाराणां पार्श्वे अनुसूचित-जातीनाम् अथवा दलितानाम् अनुसूचित-जातीनाम् अन्यासां परित्यक्तानां च स्व-स्व-सूच्यः सन्ति । तथाविधा एव एका सूची केन्द्रसर्वकारस्य पार्श्वे अपि भवति । ये विद्यार्थिनः शैक्षणिक-संस्थानेषु आवेदनार्थम् अथवा ये अभ्यर्थिनः सर्वकारीय-वृत्त्यर्थम् आवेदनं कुर्वन्ति। तैः जातेः जनजातेः च प्रमाणपत्र-रूपेण स्वजातेः अथवा जनजातेः प्रमाणं दातव्यं भवति । यदि कश्चित् विशिष्ट-दलित-जातिः अथवा जनजातिः सर्वकारीय-सूच्याम् अस्ति तदा तस्य जातेः अथवा जनजातेः प्रत्याशी आरक्षणस्य लाभं स्वीकर्तुं शक्नोति।

महाविद्यालयेषु विशेषरूपेण चिकित्सकीय-महाविद्यालयेषु अपि च व्यवसायिक-संस्थानेषु प्रवेशार्थं सर्वकारेण "अन्तिमसूची" अथवा न्यूनतम-अङ्कसूची निर्धारिता अस्ति। एतस्य अर्थः अस्ति यत् एतेषु संस्थानेषु सर्वे दलिताः आदिवासि-प्रत्याशिनः च न प्रवेष्टुं शक्नुवन्ति। एतेषु संस्थानेषु ते एव दलिताः अथवा आदिवासि-विद्यार्थिनः प्रवेष्टुम् अर्हन्ति यैः परीक्षायां सम्यक् अङ्काः प्राप्ताः । अपि च यैः न्यूनतम-अङ्कसीमातः अधिकाः अङ्काः प्राप्ताः । सर्वकारः एतेभ्यः विद्यार्थिभ्यः विशिष्टां छात्रवृत्तिम् अपि ददाति । नवमकक्षायाः राजनैतिक-विज्ञानस्य पुस्तके भवन्तः अन्यपरित्यक्त-वर्गाणां कृते आरक्षणस्य व्यवस्थायाः विषये इतोऽपि विस्तरेण ज्ञास्यन्ति।

भवतां मतानुसारं दलितानाम् आदिवासिनां च कृते सामाजिक-न्यायं प्रदातुम् आरक्षणम् एतावत् महत्त्वपूर्णं किमर्थम् अस्ति ? एतस्य एकं कारणं वदन्तु।

योजनानां सूची	एषा योजना कस्मिन् विषये अस्ति ?	भवतां मतानुसारम् एतेन सामाजिक-न्यायः कथं वर्धिष्यते ?
विद्यार्थिनां कृते छात्रवृत्तेः व्यवस्था		
विशेष-आरक्षकालयानां घटनम्		
सर्वकारीय-विद्यालयेषु बालिकानां कृते विशिष्टाः योजनाः		

भाषायाः स्वपुस्तके भवन्तः कबीरस्य पद्यानि पठितवन्तः स्युः। कबीरः पञ्चदश-शताब्द्याः कविः आसीत्। सः तन्तुवायस्य व्यवसायं करोति स्म। कबीरः भक्तिपरम्परा-सम्बद्धः आसीत्। कबीरदासस्य कविता परमसत्तां प्रति तस्य प्रेम दर्शयति स्म। तस्य इदं प्रेम, पण्डित-पुरोहितानां नियन्त्रणात् मुक्तम् आसीत्। तस्य कवितायां प्रभुत्वसम्पन्न-जनानाम् आलोचना दृश्यते। कबीरदासः एतादृशानां जनेषुपुनः पुनः प्रहारं कृतवान् ये स्वधार्मिक-जातीय-प्रसिद्ध्यर्थं च अन्यान् जनान् स्वस्य परम्परासु परतन्त्री-कुर्वन्ति। कबीरदासस्य दृष्टौ प्रत्येकं जनस्य पार्श्वे आध्यात्मिक-मुक्तिं प्राप्तुं क्षमता वर्तते ते स्वानुभवैः अन्तःस्थितं गहनं ज्ञानं प्राप्तुं शक्नुवन्ति। कबीरदासस्य पद्यानि श्रमस्य महत्तां शक्तिशालि-विचारान् च सर्वेषां पुरतः आनयन्ति। कबीरदासः एकस्य साधारणस्य कुम्भकारस्य, तन्तुवायस्य, जलं नयन्त्याः स्त्रियः, एतेषां श्रमाणां च सम्मानं करोति। तस्य पद्येषु श्रमः एव सम्पूर्णस्य ब्रह्माण्डस्य अवबोधनाय एकः आधारः अस्ति। तस्य प्रत्यक्षं साहसपूर्णम् आह्वानं च अद्यापि जनान् प्रेरयति। उत्तर-प्रदेशे राजस्थाने पञ्जाब-प्रान्ते मध्यप्रदेशे विहारे गुजरे च दलिताः उपान्तस्थ-समूहाः सामाजिक-भेद-भाव-ग्रस्ताः घृणिताः च अद्यापि कबीरदासस्य पद्यानि गायन्ति।

दलितानाम् आदिवासिनां च अधिकाराणां रक्षणम्

उपान्तस्थ-समुदायान् भेदभावात् शोषणात् च त्रातुं नीतीनाम् अतिरिक्तम् अस्माकं देशे अनेके अधिनियमाः अपि निर्मिताः सन्ति। आगच्छन्तु अत्र यथार्थ-घटना-आधारितम् एकं व्यक्तित्व-अध्ययनं कृत्वा जानीमः यत् स्वस्य रक्षार्थं दलिताः एतेषाम् अधिनियमानां प्रयोगं कथं कुर्वन्ति।

जकमालगुर-ग्रामस्य जनाः एकस्य महतः उत्सवस्य सज्जायां संलग्नाः सन्ति। अत्र प्रत्येकं पञ्चवर्षाभ्यन्तरे एकदा स्थानीय-देवतायाः पूजा क्रियते। पञ्चदिनात्मके अस्मिन् उत्सवे समीपस्थेभ्यः ग्रामेभ्यः विंशतिः अर्चकाः आगच्छन्ति अत्र सम्मिलिताः च भवन्ति। अस्य कार्यक्रमस्य आदौ दलित-समुदायस्य एकः जनः सर्वेषाम् अर्चकानां पादौ प्रक्षालयति तेन प्रक्षालित-जलेन च स्नाति। जकमालगुर-ग्रामे एतत् कार्यं रत्नस्य परिवारस्य जनाः कुर्वन्ति। रत्नात् प्राक् तस्य पिता-पितामहादयः च एतत् कार्यं कुर्वन्ति स्म। ते कदाचित् अपि मन्दिरं न प्रवेशिताः परन्तु पादप्रक्षालनस्य एषा परम्परा तेषां कृते सम्मान-स्वरूपा इति दृश्यते स्म। अधुना एतस्मिन् उत्सवे रत्नस्य पर्यायः आसीत्। रत्नमः विंशति-वर्षीयः आसीत् अपि च समीपस्थे एकस्मिन् महाविद्यालये पठति स्म। सः एतस्याः परम्परायाः निर्वहणम् अस्वीकृतवान्।

सः उक्तवान् यत् सः एतस्मिन् संस्कारे न विश्वसिति अपि च तस्य पूर्वजाः दलितकारणात् एतत् कर्तुं बाध्याः क्रियन्ते स्म। रत्नस्य अस्वीकरणात् न केवलं ग्रामस्य प्रभावशालिन्यः जातयः अपितु तस्य स्वकीयस्य समुदायस्य अनेके परिवाराः अपि रुष्टाः आसन्। उच्च-जातीयाः जनाः एतद् दृष्ट्वा आश्चर्यचकिताः आसन् यत् अल्पवयस्कः एकः युवकः तेषाम् आदेशस्य पालनं न करोति। ते अनुभवन्ति स्म यत् पठन-लेखनादि करणात् सः अस्माकं कथनं न पालयति तस्य मनः दुष्टं जातम् अपि च अधुना आत्मानम् सवर्ण-जातीयैः समम् अनुभवति।

रत्नस्य सजातीयाः जनाः अपि भयभीताः आसन् यत् ते कदाचित् सवर्ण-जातीयानां क्रोधस्य पात्रभूताः न भवेयुः। तेषु बहवः सवर्णानां क्षेत्रेषु कर्मकराः आसन्। यदि प्रभुत्वशालि-जातीयाः तेभ्यः कार्याणि न यच्छेयुः तदा ते किं खादिष्यन्ति ? तेषां जीवनं कथं चलिष्यति ? सवर्ण-जातीयैः एतद् अपि उद्घोषितं यत् यदि दलिताः नतमस्तकाः न भविष्यन्ति तदा स्थानीय-देवता तेभ्यः शापं दास्यति। रत्नस्य कथनम् एतत् आसीत् यत् अद्यावधिः एकः अपि दलितः मन्दिरं न प्रविष्टवान् अस्ति अतः देवता तेभ्यः क्रोत्स्यति, इति भवितुं न शक्नोति।

प्रभुत्वशालि-जातीयाः रत्नं दण्डयितुं सङ्कलनं कृतवन्तः । ते स्वकीयं समुदायम् आदिष्टवन्तः यत् ते रत्नस्य तस्य परिवारस्य जनानां च बहिष्कारं कुर्युः । सर्वे आदिष्टाः यत् कोऽपि तस्य परिवारेण सह कथञ्चित् अपि सम्पर्कं न कुर्युः । एकस्मिन् दिने केचन जनाः सहसा आगत्य रत्नस्य पर्णकुटीरं ज्वालितवन्तः । रत्नमः कथञ्चित् स्वमात्रा सह ततः जीवितः पलायितः । तेन अनुसूचित-जाति-अनुसूचित-जनजाति-अत्याचार-निवारण-अधिनियमस्य १९८९ इत्यस्य अन्तर्गतं स्थानीये आरक्षकालये प्राथमिकी कृता । अन्ये दलितपरिवाराः तस्मिन् काले अपि तस्य सहयोगार्थं न आगतवन्तः । ते भयभीताः आसन् । ते अनुभवन्ति स्म यत् यदि ते एतस्याः घटनायाः विरोधं करिष्यन्ति तदा ते अपि रत्नस्य इव दण्डयिष्यन्ते । स्थानीयैः संचारमाध्यमैः एतस्यां घटनायां अधिकम् अवधानं प्रदत्तम् । बहुभिः पत्रकारैः ग्रामस्य यात्रा कृता । रत्नम्, ते दलित-प्रतिरोध-प्रतीक-रूपेण प्रस्तुतवन्तः । अन्ततः तत्रत्या विवादास्पद-परम्परा निरस्तीकृता परन्तु तस्य परिवारः ग्रामं त्यक्त्वा गतवान् यतो हि ग्रामस्य सवर्णाः तस्य बहिष्कारं कृतवन्तः ।

किं भवन्तः इत्थम् अनुभवन्ति यत् रत्न परम्परागत-रीति-पालनार्थं यथा बाध्यः क्रियते स्म सः तस्य मौलिक-अधिकाराणां हननम् आसीत् ।

भवन्तः इत्थम् किमर्थम् अनुभवन्ति यत् दलित-पारिवारीयाः प्रभुत्वसम्पन्न-जातीयानां कोपस्य आशङ्कया भयभीताः आसन् ?

अनुसूचित-जातिः अनुसूचित-जनजातिः च (अत्याचार-निवारक-अधिनियमः , १९८९)

रत्नमः स्वग्रामे उच्च-जातीयैः क्रियमाणस्य भेदभावस्य हिंसायाः च विरोधं कर्तुम् अनुसूचित-जातिः अनुसूचित-जनजाति-अत्याचार-निवारक-अधिनियमस्य अन्तर्गतं सर्वकाराय दूषण-पत्रं प्रदत्तवान् अधिनियमस्य च आश्रयं स्वीकृतवान् । अयम् अधिनियमः १९८९ तमे वर्षे दलितानाम् अपि च अन्येषां समुदायानां अभ्यर्थनावशात् निर्मितम् आसीत् । तस्मिन् काले एतस्य निर्माणार्थं सर्वकारे महान् प्रभावः पतितः आसीत् । जनाः सर्वकारम् उक्तवन्तः यत् दलितैः सह आदिवासिभिः सह च यः अनुदिनं दुर्व्यवहारः भवति अपमानः च भवति तस्मात् अपमानात् तान् निवारयितुं सर्वकारः दृढं प्रयासं कुर्यात् । यद्यपि एतादृशः व्यवहारः चिरकालारभ्य भवति स्म परन्तु सप्ततितमस्य दशकस्य अन्ते अपि च अशीतितमे दशके एषा समस्या हिंसकं रूपं ग्रहितुम् आरब्धवती । तस्मिन् काले दक्षिणभारतस्य बहुषु क्षेत्रेषु स्वाधिकाराणां कृते बहूनि आग्रहि-दलित-सङ्घटनानि प्रत्यक्षाणि जातानि अपि च ते स्वाधिकाराणां कृते प्रबलं सङ्घर्षं कृतवन्तः ते तथाकथित-जातीय-दायित्वानां निर्वाहं कर्तुं सज्जाः न आसन् । ते समानतायाः अधिकारम् इच्छन्ति स्म । रत्नस्य इव, ते अपि दलितानाम् अपमानकर्त्रीणां शोषण-कर्त्रीणां च परम्पराणां निर्वहणं न स्वीकृतवन्तः । एतस्मात् कारणात् उच्च-जातीयाः जनाः साक्षात् तेषां हिंसां कर्तुं प्रारब्धवन्तः । सर्वकारः एतं विषयम् अवगच्छेत् एतदर्थं दलित-सङ्घटनैः व्यापक-अभियानानि चालितानि यत् अस्पृश्यता अधुना अपि चलति । ते एतदर्थं बल-प्रदानं कृतवन्तः यत् नूतनेषु अधिनियमेषु दलितैः सह जायमानानां विभिन्नानां हिंसानां सूची भवेत् अपि च एतादृशानाम् अपराधिनां कृते दण्डस्य दृढं प्रावधानं स्यात् ।

पंडित देखहु मन में जानी।
कहु धौं छूति कहाँ से उपजी, तबहिं छूति तुम मानी॥

एकहि पाट सकल बैठाए, छूति लेत धौं काकी।
छूतिहि जेवन छूतिहि अँचवन, छूतिहि जग उपजाया।
कहैं कबीर ते छूति विवरजित, जाके संग न माया।

सन्दर्भः – अस्मिन् पद्ये कबीर-दासः उक्तवान् यत् प्राणिनः स्थितित्रयं भवति – जन्म जीवनं मरणं च। स्थितित्रये सर्वे प्राणिनः समानरूपेण तिष्ठन्ति अपि च त्रयाणां मूले अशुचिता वर्तते। तर्हि पुनः भेदभावः कीदृशः ?

कबीरदासः कथयति यत् हे पण्डित! मनसि सम्यक्-प्रकारेण विचार्य पश्यतु अपि च वदतु यत् अस्पृश्यता किम् अस्ति ? अपि च कुतः उत्पद्यते ? त्वम् अविचार्य अस्पृश्यता-नाम्नीम् एकां भावनां कल्पितवान् असि।

प्रभुः एकस्याम् एव पृथिवी-नाम्न्याम् उत्पीठिकियां सर्वान् उपवेशितवान् अस्ति। तर्हि भवान् पुनः कम् अस्पृश्यम् इति कथयिष्यति ? अन्नं जलं च यस्य भोजनं पानं च क्रियते तत् सर्वं अशुचिना संयुक्तम् अस्ति –एतस्याः अस्पृश्यतायाः एव सर्वे उत्पन्नाः सन्ति तर्हि पुनः एतस्याः कः मुक्तः अस्ति ? अतः अस्पृश्यतायाः भेदभावः निरर्थकः अस्ति। कबीरदासः कथयति यत् वास्तविकतायाम् अस्पृश्यतातः ते जनाः एव मुक्ताः सन्ति येषु मायायाः प्रभावः नास्ति।

स्रोतः - (सं,) जयदेव-सिहः वासुदेव-सिंहः च सबद (कबीर-वाङ्मयः खण्ड २) विश्वविद्यालय-प्रकाशनम्, वाराणसी,१९९८,पृष्ठः,२०७-२०८.

कबीरः अस्पृश्यता-शब्दस्य अत्र एकस्मिन् नूतने अर्थे प्रयोगं करोति। तस्य मतम् अस्ति यत् अस्पृश्यता एव ज्ञानस्य सर्वोच्च-स्तरः अस्ति –एतस्य अर्थः अस्ति यत् सः जनः सङ्कुचितेभ्यः विभाजकेभ्यः च विचारेभ्यः पूर्णतः मुक्तः अस्ति। परिणामतः कबीरदासः अस्पृश्यतायाः विचारं निरस्तीकृत्य अस्पृश्यान् निम्नतम-अवस्थायाः स्थाने उच्चतम-अवस्थायां स्थापयन्ति।

अनेन एव प्रकारेण १९७०, १९८० तम-दशकयोः आदिवासिनः अपि परस्परं बृहद्-रूपेण सङ्घटनं कृतवन्तः। ते न केवलं समानता-प्राप्त्यै उद्घोषं कृतवन्तः अपितु स्वभूमिं संसाधनानि च प्राप्तुम् आन्दोलनम् अपि कृतवन्तः। एते आदिवासिनः अपि प्रभुत्वसम्पन्न-सामाजिक-समूहानां कोपं सोढवन्तः,अपि च प्रभुत्वशालिजनैः तेषां हिंसा कृता।

एतद् एव कारणम् अस्ति यत् एतस्मिन् अधिनियमे अपराधानां काचिद् बृहत्तरा सूची प्रदत्ता अस्ति। एतस्यां केचन अपराधाः तु तथा घोराः सन्ति यत् तेषां विषये चिन्तिते सति एव हृदयं विदीर्णं भवति। एतस्मिन् अधिनियमे न केवलं भयानकानाम् अपराधानाम् उल्लेखः कृतः अस्ति अपितु एषः अधिनियमः एतत् तथ्यम् अपि सङ्केतयति यत् साधारणाः मनुष्याः अपि कीदृशानि जघन्य-कृत्यानि कर्तुं शक्नुवन्ति। अनेन प्रकारेण एतादृशाः अधिनियमाः अस्माकं चिन्तन-प्रक्रियाः कार्य-पद्धतीः च प्रभावयन्ति दोषिणः च दण्डयन्ति।

एतस्मिन् अधिनियमे अनेक-स्तरीयानाम् अपराधानां मध्ये अन्तरं स्पष्टं कृतम् अस्ति। प्रथमम् एतस्मिन् शारीरिक-रूपेण भयानकानां नैतिकरूपेण च निन्दनीयानाम् अपमानानां स्वरूपस्य विषयसूची प्रदत्ता अस्ति। एतस्याः उद्देश्यं तथाविधेभ्यः जनेभ्यः दण्डदापनम् अस्ति ये (१) अनुसूचित-जातीयम् अथवा अनुसूचित-जनजातीयं कमपि जनं किमपि अखाद्यं वस्तु अथवा अपेय-पदार्थं भोक्तुं पातुं वा बाध्यं कुर्वन्ति, (२) अनुसूचित-जातीयम् अथवा अनुसूचित-जनजातीयं कम् अपि जनं नग्नं कुर्वन्ति अथवा तं नग्नीकृत्य भ्रामयन्ति अथवा तस्य मुखे अथवा शरीरे वर्णं लेपयन्ति अपि च एतादृशं कृत्यं कुर्वन्ति यत् मानवीय-प्रतिष्ठायाः अनुरूपं नास्ति।

द्वितीयम्, एतस्मिन् अधिनियमे तथाविधानां कृत्यानाम् अपि सूची वर्तते येषां माध्यमेन दलिताः आदिवासिनः च तेभ्यः सामान्य-संसाधनेभ्यः वञ्चिताः क्रियन्ते अथवा तैः बद्ध-कर्मकरैः इव कार्यं कार्यते। परिणामतः एतस्मिन् अधिनियमे प्रावधानम् अस्ति यत् यदि कश्चित् अपि जनः अनुसूचित-जातेः अथवा अनुसूचित-जनजातेः कस्यापि जनस्य कृते या आवण्टित-भूमि वर्तते तस्य भूमौ कश्चित् स्वामित्वं स्थापयति अथवा तत्र कृषि-कार्यं करोति अथवा स्व-नाम्नि स्थानान्तरितां करोति तदा सः दण्ड-भाग् भविष्यति।

एकस्मिन् अन्यस्मिन् स्तरे अपि एषः अधिनियमः एतस्य विषयस्य कृते अपि मान्यतां ददाति यत् दलित-आदिवासि-महिलाः आश्रित्य ये अपराधाः भविष्यन्ति ते अपि विशिष्ट-अपराध-श्रेण्यां परिगणिताः भविष्यन्ति अतः एतादृशानां जनानां कृते दण्दव्यवस्था कृता अस्ति। (९) ये अनुसूचित-जातीयाम् अनुसूचित-जनजातीयां च महिलाम् अपमानितुम् आक्रमन्ते अथवा तया सह बलात्कारं कुर्वन्ति; ते अपि दण्डिताः भविष्यन्ति।

किं भवन्तः १९८९ तमे वर्षे जातस्य अधिनियमस्य द्वयोः प्रावधानयोः उल्लेखं कर्तुं शक्नुवन्ति ?

शब्द-सङ्कलनं पश्यन्तु स्वशब्देषु च लिखन्तु यत् "नैतिक-रूपेण निन्दनीयः" इति पदस्य भवन्तः किम् अभिप्रायम् अवगच्छन्ति।

हस्ताभ्यां विष्ठायाः उत्थापनस्य कुप्रथा

बहवः जनाः सम्मार्जन्या लौहपात्रेण कण्डोलैः च पशूनां जनानां च मल-मूत्रादीनि अपाकुर्वन्ति। ते जलरहितेभ्यः शौचालयेभ्यः मलमूत्रादिकम् उत्थाप्य दूरस्थेषु स्थानेषु क्षिप्त्वा आगच्छन्ति । हस्ताभ्यां मलस्य उत्थापकाः परम्परया एतत् एव कार्यं कुर्वन्ति। एतत् कार्यं प्रायशः दलित-महिलाः बालिकाः च कुर्वन्ति। आन्ध्रप्रदेशस्थस्य सक्रिय-स्वच्छता-कर्मचारि-आन्दोलनानुसारं सम्पूर्णे देशे दलित-समुदायस्य प्रायशः १३ लक्ष-जनाः एतत् कार्यं कुर्वन्ति। शिरसा मल-वोढृणां मध्ये कार्यशीलस्य एतस्य सङ्घटनस्य कथनम् अस्ति यत् एते जनाः षण्णवति-लक्षेषु निज-सामुदायिक-शुष्क-शौचालयानां स्वच्छतां कुर्वन्ति।

शिरसा मलस्य वोढारः अत्यधिकासु अमानवीयासु परिस्थितिषु कार्यं कुर्वन्ति। एतस्मात् कार्यात् तेषां स्वास्थ्यस्य सदैव हानेः भयं भवति। ते निरन्तरं तथाविधस्य सङ्क्रमणस्य हानौ तिष्ठन्ति यस्मात् तेषां श्वसनतन्त्रे चक्षुषोः त्वचि पाचनतन्त्रे च प्रभावः भवितुं शक्नोति। एतस्य कार्यस्य वेतन-रूपेण ते अत्यल्पं वेतनं लभन्ते। नगरपालिकासु कार्यकर्तृणां दैनिकं वेतनं त्रिंशत्-चत्वारिंशत् च रूप्यकाणि भवन्ति परन्तु निज-गृहेषु कार्यकर्तृभ्यः ततोऽपि न्यूनं धनं दीयते।

यथा भवन्तः एतस्मिन् पुस्तके पठितवन्तः ,भारतीय-संविधाने अस्पृश्यतायाः प्रथा समाप्तीकृता । पुनरपि हस्ताभ्यां मलस्य उत्थापकान् बहुषु स्थानेषु अस्पृश्यान् इति मन्यन्ते । गुर्जर-प्रान्तस्य भङ्गिनः आन्ध्रप्रदेशस्य पाखिनः तमिलनाडुराज्यस्य च सिक्कलयाराः एतस्यां श्रेण्याम् एव गण्यन्ते। सामान्यतः ते ग्रामात् बहिः पृथक्-समूहेषु वसितुं बाध्याः सन्ति। ते मन्दिरं सार्वजनिक-जल-स्रोतांसि च न गन्तुं शक्नुवन्ति।

ऑफ मैन्युअल स्केवेंजर्स एण्ड कंस्ट्रक्शन ऑफ ड्राई लैट्रीन्स (प्रॉहिबिशन) एक्ट, १९९३ तमे वर्षे सर्वकारः एम्प्लॉयमेण्ट् १९९३ तमे वर्षे पारितम्। अयम् अधिनियमः शिरसि मलस्य उत्थापकानां कार्ये नियोजने, शुष्क-शौचालयानां निर्माणे च प्रतिबन्धं करोति । २००३ तमे वर्षे स्वच्छता-कर्मकर-आन्दोलनेन तथा च त्रयोदशैः अन्यैः सङ्घटनैः जनैः च यस्मिन् सप्त-जनाः मलस्य वोढारः आसन् एतैः सर्वैः सर्वोच्च-न्यायालये एका जनहितयाचिका नियोजिता आसीत्। याचिका-कर्तृणां कथनम् आसीत् यत् शिरसा मल-वहनस्य प्रथा न केवलम् अद्यापि चलति अपितु रेलवे-सदृश-सर्वकारीयेषु उपक्रमेषु बृहत्-स्तरे प्रचलति। याचिका-कर्तारः स्वकीयानां मौलिक-अधिकाराणां क्रियान्वयनाय आग्रहं कृतवन्तः। एतस्य प्रत्युत्तरे न्यायालयः निष्कर्षं दत्तवान् यत् १९९३ तमे वर्षे पारित-अधिनियमानन्तरं सम्पूर्णे देशे शिरसा मलस्य वोढृणां सङ्ख्या वर्धिताः । न्यायालयः केन्द्र-राज्य-सर्वकारयोः प्रत्येकं विभागं मन्त्रालयं च आदिष्टवान् यत् ते षण्मासाभ्यन्तरे एतस्याः सूचनायाः सत्यतां जानीयुः यदि शिरसा मल-वहनस्य प्रथा अधुना अपि प्रचलति इति सत्यम् अस्ति तर्हि सम्बन्धित-सर्वकारीय-विभागैः तथाविधानां जनानां मुक्त्यर्थं पुनर्वासार्थं च एकः समयबद्धः कार्यक्रमः सज्जीकरणीयः।

हस्ताभ्यां मलम् उत्थापयन्ती काचित् स्वच्छता-कर्मकरी

स्वच्छता-कर्मचारि-आन्दोलनस्य कार्यकर्तारः एकं शुष्क-शौचालयं निपातयन्ति।

शिरसा मल-वहनेन भवन्तः किम् अवगच्छन्ति ?

चतुर्दश- पृष्ठे प्रदत्त-मौलिकाधिकाराणां सूचीं पुनः पठन्तु तथा च तथाविधयोः द्वयोः अधिकारयोः उल्लेखं कुर्वन्तु ययोः एतया प्रथया उल्लङ्घनं भवति।

स्वच्छता-कर्मचारि-आन्दोलनं २००३ तमे वर्षे जनहितयाचिकां किमर्थं नियोजितवान्? स्वस्यां याचिकायां ते कस्मिन् विषये आपत्तिं कृतवन्तः ?

२००५ तमे वर्षे एतस्यां याचिकायां विचारं कृत्वा तदनन्तरं सर्वोच्च-न्यायालयेन किं कृतम् ?

केन्द्रसर्वकारः सद्य एव अनुसूचित-जनजातिः अथ च अन्यपरम्परागत-वनवासी अर्थात् वनाधिकार-मान्यता-अधिनियमः २००६ इति पारितः कृतः अस्ति। अस्य अधिनियमस्य प्रस्तावनायाम् उक्तम् अस्ति यत् एषः अधिनियमः भूमौ अन्येषु च संसाधनेषु वन्यसमुदायस्य अधिकाराणां कृते मान्यताम् अप्रदानस्य कारणात्, तैः सह जातम् ऐतिहासिकम् अन्यायं दूरीकर्तुं पारितं कृतम् । एतस्मिन् अधिनियमे वन्यसमुदायान् गृहस्य पार्श्वे एव भूमिः, कृषियोग्यभूमिः, चारण-योग्या-भूमिः, काष्ठ-इतर-वन-उत्पादेषु तेषाम् अधिकाराणां कृते मान्यता दत्ता अस्ति । अस्मिन् अधिनियमे इदम् अपि उक्तम् अस्ति यत् वनं, जैव-विविधता-संरक्षणं च वनवासिनाम् अधिकारेषु परिगण्यते ।

आदिवासिनाम् अभ्यर्थनाः तथा च १९८९ तम-वर्षस्य अधिनियमः

१९८९ तम-वर्षस्य अधिनियमः एकस्मात् इतर-कारणात् अपि महत्वपूर्णः अस्ति । आदिवासि-कार्यकर्तारः स्व-परम्परागत-भूमौ स्वस्य अधिकारस्य स्वतन्त्रतार्थं एतस्य अधिनियमस्य आश्रयं स्वीकुर्वन्ति। यथा भवन्तः गताध्याये पठितवन्तः आसन् , स्वभूमेः बलात् अधिग्रहणात् विस्थापनात् च आदिवासिनः बहु-कष्टम् अनुभवन्ति । आदिवासि-कार्यकर्तॄणां कथनम् अस्ति यत् ये जनाः बलपूर्वकं तेषां भूमिम् अधिगृहीतवन्तः । ते अस्य अधिनियमस्य अनुसारं दण्डनीयाः । ते कार्यकर्तारः उक्तवन्तः यत् एषः अधिनियमः अपि जनजातीय-समुदायेभ्यः केवलं तम् एव लाभं ददाति येषां विषये संविधाने आश्वासनं दत्तम् आसीत्। तेषां कार्यकर्तॄणां कथनम् आसीत् यत् संवैधानिक-रूपेण आदिवासिनां भूमिं कम् अपि आदिवासि-इतर-जनं न विक्रेतुं शक्यते । यत्र एतादृशम् अभूत् तत्र संविधानस्य गरिमाणं रक्षितुं तेभ्यः सा भूमिः पुनः दातव्या ।

आदिवासि-कार्यकर्तुः सी.के. जानू-महोदयस्य आरोपः अस्ति यत् आदिवासिनां संवैधानिक-अधिनियमानाम् उल्लङ्घन-कर्तृषु विभिन्न-राज्य-सर्वकाराः अपि सहभागितां कृतवन्तः । एते एव सर्वकाराः सन्ति ये काष्ठानां वाणिज्य-कर्गद-उद्योगादीनां व्याजैः आदिवासि-इतर- प्रवेशयितॄणां कृते जनजातीय-भूमीनां दोहनाय आदिवासिनः तेषां परम्परागत-वनेभ्यः उत्पाटनस्य स्वतन्त्रतां ददति । एतत् अतिरिच्य वनानि आरक्षितानि अथवा एतानि अभयारण्यानि घोषयित्वा अपि आदिवासि-जनाः ततः उत्पाट्यन्ते। सुश्री-जानू-महोदयायाः कथनम् अस्ति यत् ये आदिवासिनः पूर्वम् एव ततः बहिष्कृताः सन्ति अपि च ये अधुना पुनः प्रत्यागन्तुं न शक्नुवन्ति तेषाम् अपि क्षति-पूर्तिः स्यात्। एतस्य अयम् अर्थः अस्ति यत् सर्वकारः एतादृशीनां योजनानां निर्माणं कुर्यात् याभिः ते नूतनेषु स्थानेषु वासं कर्तुं शक्नुयुः अपि च तत्र कार्ये संलग्नाः भवेयुः । यदि सर्वकारः आदिवासिभ्यः अपहृतायां भूमौ औद्योगिकानाम् अन्यासां च परियोजनानां निर्माणाय आधिक्येन धनं व्ययीकर्तुं शक्नोति तर्हि एतेषां विस्थापितानां पुनर्वासाय अल्पम् अपि धनं व्ययीकर्तुं किमर्थं सङ्कोचं करोति ।

निष्कर्षः

कस्यापि अधिकारस्य अधिनियमस्य नीतेः च कर्गदे मुद्रण-मात्र-करणस्य अयम् अर्थः न भवति यत् सः अधिकारः अधिनियमः नीतिः च वास्तविकतायां क्रियान्वयितः । एतानि प्रावधानानि क्रियान्वयितुं जनैः नैरन्तर्येण प्रयासः करणीयः भवति । समानतायाः सम्मानस्य अस्मितायाः च इच्छा प्रायशः सर्वेषां भवति एतत् किञ्चित् नूतनं तथ्यं नास्ति । एतत् तथ्यम् अस्माकं सम्पूर्णे इतिहासे विभिन्न-रूपेषु दृश्यते । अनेन एव प्रकारेण लोकतान्त्रिक-समाजे अपि सङ्घर्षस्य लेखनस्य वाणिज्यकरणस्य साङ्घटनिकतायाः प्रक्रियाः नैरन्तर्येण भवेयुः ।

अभ्यासः

1. तथाविधौ द्वौ मौलिक-अधिकारौ ज्ञापयतु ययोः दलित-समुदायः प्रतिष्ठापूर्ण-समतापरक-व्यवहारयोः बलं दातुं प्रयोगं कर्तुं शक्नोति। एतस्य प्रश्नस्य उत्तरं दातुं चतुर्दशे पृष्ठे प्रदत्तान् मौलिक-अधिकारान् पुनः पठन्तु।

2. रत्नम-महोदयस्य कथां तथा च १९८९ इत्यस्य अनुसूचित-जातेः तथा च अनुसूचित-जनजातेः अत्याचार-निवारण-अधिनियमस्य प्रावधानानि पुनः पठन्तु। अधुना एकं कारणं ज्ञापयतु यत् रत्नम-महोदयः एतस्य अधिनियमस्य अन्तर्गतं दूषणं किमर्थं नियोजितवान्।

3. सी.के.जानू-महोदया अन्ये च आदिवासि-कार्यकर्तारः एवं किमर्थम् अनुभवन्ति यत् आदिवासिनः अपि स्वपरम्परागत-संसाधनानाम् अपहरण-विरोधे एतस्य १९८९ तमे वर्षे जातस्य अधिनियमस्य प्रयोगं कर्तुं शक्नुवन्ति ? एतस्य अधिनियमस्य प्रावधानेषु एतादृशं किं विशिष्टम् अस्ति यत् तेषां मान्यताः पुष्टीकरोति ?

4. अस्मिन् घट्टे प्रदत्त-कविताः गीतानि च एतस्य तथ्यस्य उदाहरणानि सन्ति यत् विभिन्न-जनाः समुदायाः च स्व-विचारान् स्व-क्रोधं दुःखानि च कथं प्रकटयन्ति। स्वकक्षायाम् एते द्वे कार्ये कुर्वन्ति –

   (क.) काञ्चित् कविताम् अन्वेषयतु यस्यां कस्यचित् सामाजिकस्य विषयस्य चर्चा कृता स्यात्। तां स्व-सहपाठिनां पुरतः प्रस्तुवन्तु। द्वे अथवा ततः अधिकाः कविताः स्वीकृत्य लघु-समूहेषु विभक्ताः भवन्तु तथा च तासु कवितासु चर्चां कुर्वन्तु। तत्र पश्यन्तु यत् कविः किं कथयितुं प्रयासं कृतवान्।

   (ख.) स्वक्षेत्रे कस्यचित् एकस्य उपान्तस्थस्य समुदायस्य परिज्ञानं कुर्वन्तु। चिन्तयन्तु यत् भवन्तः तस्य समुदायस्य सदस्याः सन्ति। अधुना एतस्य समुदायस्य सदस्य-रूपेण स्वभावनाः व्यक्तीकर्तुं काञ्चित् कविताम् अथवा गीतं लिखन्तु चित्रं च निर्मान्तु।

शब्द-सङ्कलनम्

आग्रही – या व्यक्तिः अथवा यः समूहः प्रभाव-शालि-रूपेण स्वकथनम् उपस्थापयति सः आग्रही इति उच्यते।

बहिष्कारः – एतस्यः अर्थः कस्य अपि जनस्य समूहस्य च निष्कासनम् अथवा प्रतिबन्धनम् इति भवति।

नैतिकरूपेण निन्दनीयः – एतानि तद्विधानि कृत्यानि भवन्ति यानि सभ्यतायाः प्रतिष्ठायाः सर्वेषाम् अधिनियमानां च विरोधे सन्ति। एतस्य शब्दस्य प्रयोगः सामान्यतः तद्विधानां घृणितानाम् अपमानजनक-कृत्यानां कृते क्रियते यानि समाज-द्वारा स्वीकृत-मूल्यानां विरोधे भवन्ति।

नीतिः – काचित् तद्विधा घोषित-कार्य-दिशा या भविष्यत्-कालस्य मार्गम् आविष्करोति लक्ष्यं निर्धारयति स्वीकृत-सिद्धान्तानां दिशानिर्देशानां च व्याख्यां करोति। अस्मिन् अध्याये वयं सर्वकारीय-नीतीनाम् उल्लेखं कृतवन्तः परन्तु विद्यालयानां कम्पनी-संस्थादीनाम् अपि स्वकीयाः नीतयः भवन्ति।

॥ इति अष्टमोऽध्यायः ॥

पञ्चमः घट्टः

शिक्षकाणां कृते

एतस्मिन् घट्टे सार्वजनिक-सौविध्य-प्रदानाय विपणीनाम्, उद्योग-गृहाणां तथा च जनानां कार्यस्थितीनां सन्दर्भे अधिनियमान् क्रियान्वयने सर्वकारस्य भूमिकायाः विषये चर्चा कृता अस्ति। एतस्याः चर्चायाः उद्देश्यम् अस्ति यत् विद्यार्थिनः एतस्मिन् विषये अवबोधनीयाः यत् सर्वकारस्य इयं भूमिका मौलिक-अधिकाराणां विषयेण कथं सम्बद्धा अस्ति। मौलिक-अधिकारैः सह इयं सम्बद्धता एव गताध्यायेषु चर्चित-विषयैः सह एतं विषयम् अपि सम्बद्धं करोति। षष्ठ-कक्षायाः सप्तम-कक्षायाः च पाठ्यपुस्तकेषु आजीविका-विषये आपणानां विपणिनां विषये च जातां चर्चां दशम-अध्यायस्य सन्दर्भे प्रयोगं कर्तुं शक्यते।

नवमे अध्याये सुविधाजनसुविधानां विषये चर्चा कृता अस्ति। अत्र जलम् एकं मुख्य-उदाहरण-रूपेण प्रयुक्तम् अस्ति। एतत् महत्त्वपूर्णं तथ्यम् अस्ति यत् विद्यार्थिनः एतं विषये सम्यक्-प्रकारेण जानीयुः यत् जन-सुविधानां कः अर्थः भवति अपि च एताः सुविधाः दातुम् एतासां सुविधानां दायित्वं प्रतिबद्धतां च निर्वोढुं सर्वकारस्य महत्त्वपूर्ण-भूमिकायाः आवश्यकता किमर्थं भवति। जलस्य सर्वत्र समानरूपेण उपलब्धता, तस्य च अनर्घ-मूल्येन उपलब्धता, गुणवत्ता-विषये चिन्तनं, जनसुविधा-सम्बद्ध-विषयेषु महत्त्वपूर्णम् अस्ति। कक्षायाः अन्तः जायमानासु चर्चासु जनसुविधानां विषये सर्वकारस्य भूमिकां, वर्तमानम् असमान-वितरणं च परस्परम् अन्योऽन्येभ्यः पृथक् कुर्मः चेत् सम्यग् भविष्यति। एतस्य अभिप्रायः अस्ति यत् जनाः पृथक् पृथक् मात्रायां जलं लभन्ते चेत् एतस्य आधारेण इदं निर्णयः सम्यक् न स्यात् यत् सर्वकारः जन-सुविधाः प्रदातुं सक्षमः नास्ति।

दशमे अध्याये आर्थिक-गतिविधीनां नियमने सर्वकारस्य केन्द्रीय-भूमिकायाः विषये चर्चा कृता अस्ति। एवं स्थूल-रूपेण अधिनियमैः कृतम् अस्ति।अस्मिन् अध्याये वर्तमानानाम् अधिनियमानां क्रियान्वयनार्थं विपण्यां च कर्मकराणाम् उपभोक्तृणाम् उत्पादकानाम् अधिकार-रक्षार्थं नूतनानाम् अधिनियमानां निर्माण-महत्त्वस्य विषये बहु बलं प्रदत्तम् अस्ति। एषु अधिनियमेषु भोपाल-गैस-त्रासदा इति घटना अधिनियमानाम् अनवधानतायाः उदाहरण-रूपेण प्रस्तुता अस्ति। सम्भवतः बहवः विद्यार्थिनः एतस्याः दुर्घटनायाः विषये न पठितवन्तः स्युः। एतत् सम्यक् भविष्यति यत् विद्यार्थिनः एतस्याः घटनायाः विषये अनुसन्धानं कर्तुं प्रेरणीया तथा च एकां भित्ति-पत्रिकां (वॉल-पेपर) सज्जीकर्तुम् अथवा एकां लघु-नाटिकां सज्जीकर्तुं तेषां सहायता करणीया। पुस्तकस्य अन्त-भागे येषां जालपुटानाम् उल्लेखः कृतः अस्ति , ततः भवन्तः अतिरिक्त-सन्दर्भ-सामग्रीम् एकत्री-कर्तुं शक्नुवन्ति। भोपाल-गैस-त्रासदा इति काचित् ऐतिहासिकी घटना आसीत्। एतया घटनया पर्यावरण-विषयाः आर्थिक-अधिनियमैः गभीर-रूपेण योजिताः। कर्मकरान् सामान्य-जनान् च प्रति उद्योग-जगतः सर्वकारस्य च उत्तरदायित्वस्य विचारः अस्य अध्यायस्य केन्द्रभूतं तत्त्वम् अस्ति।

नवमः अध्यायः

जन-सुविधाः

अमू कुमारः च चेन्नई-नगरे एकस्मिन् याने यात्रां कुरुतः । नगरस्य विभिन्नेषु क्षेत्रेषु भ्रमन्तः ते जनसुविधाः पश्यन्तः सन्ति ....

अन्नानगरम्

रामगोपालः

सैदापेटः

पद्मा

मडिपाक्कमः



शिवा

मैलापुरम्

सुब्रमण्यनः

१. भवन्तः उपर्युल्लिखितं स्थितिचतुष्टयं दृष्टवन्तः । अधुना वदन्तु यत् चेन्नई-मध्ये जलस्य स्थितिः कथम् अस्ति ?

२. उपर्युक्त-वर्णने गृह-सम्बद्ध-प्रयोगस्य विभिन्नानि स्रोतांसि चिन्वन्तु ।

३. भवतां मते सुब्रह्मण्यस्य पद्मायाः च अनुभवेषु का समानता वर्तते किं च वैभिन्न्यम् अस्ति ।

४. स्व-क्षेत्रस्य जलापूर्तेः स्थितेः वर्णनं कुर्वन्तः एकम् अनुच्छेदं लिखन्तु ।

५. देशस्य अधिकतरेषु स्थानेषु ग्रीष्म-काले बिन्दु बिन्दुपरिमितं जलं कथम् आगच्छति ? ज्ञायताम् ।

कक्षायां चर्चार्थम् –

किं चेन्नई-नगरे सर्वे जनाः जल-सङ्कटेन त्रस्ताः सन्ति ? किं भवन्तः बोधयितुं शक्नुवन्ति यत् विभिन्नानां जनाः पृथक् पृथक् मात्रायां जलं किमर्थं लभन्ते ? कारणद्वयं वदन्तु ।

चैन्नै-नगरस्य जनाः तत्रत्या जल-व्यवस्था च

श्रीरामगोपाल-प्रभृतयः जनाः विशिष्टाः सर्वकारीय-अधिकारिणः चैन्नै-इत्यस्य अन्ना-नगरे वसन्ति । अत्यधिक-जल-सेचन-कारणात् जातानि हरीतिमा-पूर्णानि उद्यानानि एतस्य नगरस्य आकर्षणं वर्धयन्ति । अत्रत्येषु नलेषु चतुर्विंशति-होरा-पर्यन्तं जलम् उपलब्धं भवति । यदा जलापूर्तिः न्यूना भवति तदा श्रीरामगोपालः नगरस्य जल-निगम-विभागे परिचितेन एकेन वरिष्ठेन अधिकारिणा सह वार्तां करोति वार्तानन्तरं तस्य कृते झटिति जलस्य एकस्य जलवाहनस्य व्यवस्था भवति ।

नगरस्य अधिकतरैः क्षेत्रैः इव मैलापुर-स्थाने सुब्रह्मण्यन-महोदयस्य विभागे अपि जलस्य न्यूनता वर्तते । अत्र नगरपालिका द्वयोः दिनयोः एकं वारं जलस्य उपलब्धतां कारयति । केषाञ्चित् जनानां जल-आवश्यकतायाः पूर्तिः भूमिकूपात् भवति । परन्तु भूमिकूपस्य जलं क्षारं भवति । जनाः तस्य जलस्य शौचालयस्य स्वच्छतायाः च कृते एव प्रयोगं कुर्वन्ति । अन्येषां कार्याणां कृते जलवाहनात् जलं क्रीणन्ति । सुब्रह्मण्यनः जलवाहनेभ्यः जलं क्रेतुं प्रतिमासं ५००-६०० वा रूप्यकाणि व्ययीकरोति । पेय-जलस्य शुद्ध्यर्थं जनैः गृहेषु एव जल-शोधक-संयन्त्राणि स्थापितानि सन्ति ।

मडीपाक्कमस्य एकस्मिन् गृहे शिवः प्रथमे तले भाटक-प्रकोष्ठे निवसति । सः चतुर्षु दिनेषु एकदा जलं प्राप्नोति । जलस्य न्यूनतायाः कारणात् सः स्वपरिवारं चैन्नैनगरं प्रति न आनेतुं शक्नोति । जलं पातुं शिवः विपणितः जलस्य कूपीः क्रीणाति ।

पद्मा गृह्य-कर्मकरी अस्ति । सा सैदापेट-स्थाने कार्यं करोति अपि च तत्समीपस्थे एव एकस्मिन् ग्राम्य-घोषे निवसति । तस्याः पर्ण-कुटीरस्य मासिकं भाटकं ६५० रूप्यकाणि सन्ति । तस्याः पर्णकुटीरे न तु शौचालयः अस्ति न च तत्र जलस्य किञ्चित् अन्यत् जलस्य स्रोतः अस्ति । एवम्प्रकारेण त्रिंशत्-पर्णकुटीराणां कृते एकस्मिन् कोणे एव तत्र एकः जलस्य नलः अस्ति । एतस्मिन् नले प्रतिदिनं २० निमेष-कालावधिं यावत् एकस्मात् भूमिकूपात् जलम् आगच्छति । एतस्मात् कारणात् प्रत्येकं परिवारः अधिकाधिकं द्रोणीत्रयं जलं पूरयितुम् अवसरं प्राप्नोति । जनाः एतस्य एव जलस्य स्नातुं स्वच्छीकर्तुं पातुं च प्रयोगं कुर्वन्ति । ग्रीष्मकाले जलस्य एतावती न्यूनता भवति यत् बहवः परिवाराः जलम् एव न प्राप्नुवन्ति । ते जलवाहनानां चिरकालं यावत् प्रतीक्षां कर्तुं बाध्याः भवन्ति ।

जीवनस्य अधिकाररूपेण जलम्

जीवनस्य स्वास्थ्यस्य च कृते जलम् अत्यावश्यकम् अस्ति । न केवलं जलम् अस्माकं दैनन्दिनीम् आवश्यकतां पूरयितुम् आवश्यकम् अस्ति अपितु इदं पातुं योग्यं स्वच्छं जलं दूषित-जलकारणात् जायमानान् रोगान् अपि नियन्त्रयितुं शक्नोति । भारतस्य स्थितिः इयम् अस्ति यत् येषु देशेषु अतिसार-विषूचिका-प्रभृतीनां रोगाणां प्रसङ्गाः अधिकतराः दृष्टिगोचराः भवन्ति तेषु भारतस्य स्थानं मूर्धन्यं भवति । जल-सम्बद्ध-रोगाणां कारणात् प्रतिदिनं १६०० इत्यस्मात् अपि अधिकाः भारतीयाः मृत्युमुखं प्रविशन्ति । तेषु म्रियमाणेषु जनेषु अधिकतराः पञ्चवर्षेभ्यः अपि न्यून-वयसः शिशवः भवन्ति । यदि जनानां कृते पेयजलं सरलतया उपलब्धं स्यात् तदा दूषित-जल-पानात् भूयमानं मरणं निरोद्धुं शक्यते ।



भारतीय-संविधानस्य २१ अनुच्छेदस्य अन्तर्गतं जलस्य अधिकारः जीवनस्य अधिकारस्य भागरूपं स्वीकृतम् अस्ति । एतस्य अयम् अभिप्रायः वर्तते यत् प्रत्येकं जनस्य एषः अधिकारः अस्ति सः कामं, निर्धनः स्यात् अथवा धनिकः स्यात् तस्मै अल्पेन मूल्येन दैनन्दिनीनाम् आवश्यकतानां पूर्त्यर्थं पर्याप्तमात्रायां जलं लभेत । कथनस्य अयम् अभिप्रायः अस्ति यत् जलस्य सार्वभौमिकी प्राप्तिः स्यात् । अन्येषु शब्देषु सर्वे जनाः जलं प्राप्नुयुः ।

उच्चनयायालयैः सर्वोच्च-न्यायालयैः च बहुषु अभियोगेषु इदम् उक्तम् अस्ति यत् सुरक्षितस्य पेयजलस्य अधिकारः अपि मौलिकेषु अधिकारेषु अन्यतमः अधिकारः अस्ति । केभ्यश्चित् दिनेभ्यः पूर्वं २००७ तमे वर्षे आन्ध्रप्रदेशस्य उच्चनयायालयेन प्रदूषितजलस्य सम्बन्धित-प्रश्ने महबूब-नगर-जनपदस्य केनचित् कृषकेण लिखित-पत्रस्य आधारे प्रचलित-चर्चायां एतस्य विषयस्य पुनः आवृतिः कृता अस्ति । पत्र-प्रेषकस्य कृषकस्य अभियोगः आसीत् यत् एकः वस्त्र–निर्मातृ-समवायः (कम्पनी) इति ग्रामस्य समीपे स्थितायाम् एकस्यां जलधारायां विषाक्तानि रसायनानि त्यजति । तस्मात् कारणात् भूमिगत-जलं दूषितं जातं यत् जलं च सेचनस्य पेयजलस्य च स्रोतः वर्तते । एतस्य अभियोगस्य आधारे न्यायाधीशैः महमूदनगरस्य जिलाधीशः आदिष्टः यत् सः ग्रामस्य प्रत्येकं जनाय प्रतिदिनं २५ लीटर-परिमितं जलम् उपलब्धं कारयेत् ।

> "... जलाधिकारस्य अर्थः अस्ति यत् प्रत्येकं जनाय व्यक्तिगत-प्रयोगाय गृह्य-प्रयोगाय च पर्याप्तमात्रायां सुरक्षितं स्वीकार्यं भौतिकरूपेण अल्पमूल्येन जलस्य प्राप्तिः तस्य जलस्य उपलब्धता च स्यात्"।
>
> संयुक्त-राष्ट्रम्-२००२

जनसुविधाः

जलम् इव काश्चन अन्याः सुविधाः अपि सन्ति यासाम् उपलब्धता प्रत्येकं जनस्य कृते भवेत् । गतवर्षे भवद्भिः स्वास्थ्यं स्वच्छता च इति द्वयोः सुविधयोः विषये पठितम् आसीत् । तथैव विद्युत्-सार्वजनिक-परिवहन-विद्यालय-महाविद्यालयाः अपि अनिवार्याः सुविधाः सन्ति । एताः सुविधाः एव जनसुविधा इति नाम्ना ज्ञायन्ते ।

भारतीयसंविधानं षट्तः चतुर्दशवर्षीयाणां बालकानां कृते शिक्षायाः अधिकारस्य प्रतिभूतिं प्रददाति । एतस्य अधिकारस्य महत्त्वपूर्णः बिन्दुः अयम् अस्ति यत् सर्वेषां बालकानां कृते शिक्षायाः उपलब्धता स्यात् । परन्तु शिक्षाविषये अध्येतॄणां कार्यकर्तॄणां शोधार्थिनाम् यत् अध्ययनम् अस्ति तस्य अध्ययनस्य निष्कर्षरूपेण इदं तथ्यं पुरः आगतः यत् भारते विद्यालयीय-शिक्षायां सर्वकालात् एव महती असमानता भवति ।

सर्वकारः सम्पूर्णायाः जनसङ्ख्यायाः कृते समुचित-स्वास्थ्य-सुविधानां व्यवस्था-करणे प्रमुखां भूमिकां निर्वहति । पक्षाघातप्रभृति-रोगाणाम् उन्मूलनम् अपि तथाविधानां योजनानाम् अन्तर्गतम् आगच्छति । एतस्मिन् चित्रे एकस्मैः लघुशिशवे पोलियो इति रोगस्य शमनार्थम् ओषधेः बिन्दवः दीयन्ते ।

कस्याश्चित् जनसुविधायाः एका महत्त्वपूर्णा विशेषता इयं भवति यत् एकदा तस्याः सुविधायाः यदि निर्माणं जातं तदा तस्याः सुविधायाः उपयोगं बहवः जनाः कर्तुं शक्नुवन्ति । परिणामतः यदि ग्रामे एकः विद्यालयः निर्मितः स्यात् तर्हि तस्य विद्यालयस्य माध्यमेन सर्वे बालकाः शिक्षां प्राप्नुवन्ति । एवम् एव प्रकारेण कस्मिंश्चित् क्षेत्रे विद्युतः आपूर्तिः बहूनां जनानां कृते लाभप्रदा भवितुं शक्नोति । कृषकाः स्वक्षेत्राणि सेचनार्थं नलकूपान् चालयितुं शक्नुवन्ति । जनाः विद्युत्-चलित-कार्यशालानां सञ्चालनं कर्तुं शक्नुवन्ति । विद्यार्थिनः पठने लेखने च सारल्यम् अनुभवन्ति केनापि प्रकारेण ग्रामस्य अधिकतराः जनाः लाभान्विताः भवन्ति ।

सर्वकारस्य भूमिका

यतो हि जनसुविधाः एतावत्यः महत्त्वपूर्णाः सन्ति अतः तासां सर्वासां सुविधानां उपलब्धिः सर्वेषां कृते भवेत् एतस्य दायित्वस्य निर्वहणार्थं कस्यश्चित् नियुक्तिः अपि अवश्यमेव स्यात् । आम्, एतत् दायित्वं सर्वकारस्य वर्तते । सर्वकारस्य बहूनि महत्त्वपूर्णानि दायित्वानि सन्ति तेषु इदम् अपि दायित्वं सर्वकारस्य अस्ति यत् सः सर्वेषां जनानां कृते एवंविधानां जनसुविधानाम् उपलब्धिं कारयेत् । आगच्छन्तु, एतत् तथ्यम् अवगच्छामः यत् एतस्य दायित्वस्य निर्वहणस्य भारः केवलं सर्वकारेण एव किमर्थं वोढव्यः अस्ति ।

वयं दृष्टवन्तः यत् निज-सम-व्यवसायि-सङ्घाः लाभांशार्थं कार्यं कुर्वन्ति । सप्तमकक्षायाः पुस्तके "विपण्याम् एकं युतकम्" इति अध्यायं पठित्वा भवन्तः एतत् ज्ञातवन्तः स्युः । अधिकतमासु जनसुविधासु लाभांशस्य सम्भावना न भवति । उदाहरणार्थं नालिकानां स्वच्छता-करणेन अथवा सन्निपात-ज्वर-रोधि-अभियान-चालनेन कश्चित् समव्यवसायि-सङ्घः कं लाभांशं प्राप्तुं शक्नोति ? परिणामतः कश्चित् अपि निज-समवायः एवंविधेषु कार्येषु रुचिं न विधास्यति ।

परन्तु विद्यालय-चिकित्सालय-प्रभृतिषु जनसुविधासु निजसमवायाः रुचिं स्वीकर्तुं शक्नुवन्ति । अस्माकं पार्श्वे एतस्य आशयस्य बहूनि उदाहरणानि सन्ति । यदि भवन्तः नगरे निवसन्ति तर्हि भवन्तः बहुषु स्थानेषु जलवाहनैः अथवा बद्ध-मुख-कूपीनां माध्यमेन जलस्य आपूर्तिं कुर्वतः समवायान् दृष्टवन्तः स्युः । एतासु स्थितिषु निजसमवायाः जनसुविधाः तु यच्छन्ति परन्तु तेषां मूल्यम् एतावत् अधिकं भवति यत् अल्पीयांसः जनाः एव तेषां सुविधानां कृते धनं व्ययीकर्तुं शक्नुवन्ति । एवंविधाः सुविधाः न्यूनमूल्येन सर्वेषां जनानां कृते उपलब्धाः न भवन्ति । यावन्तं धन-व्ययं जनाः करिष्यन्ति तदनुसारम् एव जनाः सुविधाः प्राप्स्यन्ति, यदि एषः सामान्यः नियमः स्यात् तदा अत्यधिकं काठिन्यं भविष्यति । एतस्य अयं परिणामः भविष्यति यत् ये जनाः एतासां सुविधानां कृते धनव्ययं न कर्तुं शक्ष्यन्ति, ते जनाः कदापि सम्मानयुक्तं जीवनं न प्राप्स्यन्ति ते तु वञ्चिताः एव स्थास्यन्ति ।

अयं कश्चित् शोभनः विकल्पः नास्ति। जनसुविधानां सम्बन्धः जनानां मूलभूताभिः सुविधाभिः सह भवति। कस्यापि आधुनिकस्य समाजस्य कृते इदम् आवश्यकं भवति यत् तत्र एतासां सुविधानां व्यवस्था स्यात् यस्मात् च जनानां मूलभूत-सुविधानाम् आवश्यकताः पूर्तिं गच्छेयुः। संविधाने जीवनस्य अधिकारविषये यत् आश्वासनं प्रदत्तम् अस्ति तद् देशस्य सर्वेषां जनानां कृते प्राप्तम् अस्ति। अतः जनसुविधानां प्रदानस्य दायित्वं प्रमुखतः सर्वकारस्य एव स्यात्।

सर्वकारः जनसुविधानां कृते धनं कुतः प्राप्नोति ?

भवन्तः प्रतिवर्षं श्रुतवन्तः स्युः यत् सर्वकारः संसदि धनविवरण-पत्रं प्रस्तुतवान्। धन-व्यय-पत्र-माध्यमेन सर्वकारः स्वस्य हानि-लाभयोः विवरणं प्रस्तौति। एतस्मिन् सर्वकारः गतवर्षस्य व्ययानां गणना-सङ्ख्यान-पञ्जिकाम् अपि प्रस्तौति अपि च अग्रिमे वर्षे याः नूतनाः योजनाः प्रचलिष्यन्ति तासु योजनासु यः व्ययः भविष्यति तस्य व्ययस्य विवरणम् अपि सर्वेषां पुरतः उपस्थापयति।

वार्षिक-विवरण-पत्रे एतस्य तथ्यस्य अपि उद्घोषणं करणीयं भवति यत् अग्रिमस्य वर्षस्य योजनानां कृते धनस्य व्यवस्था कुतः करिष्यते। जनतायाः यद् धनं कररूपेण लभ्यते तद् एव धनं सर्वकारस्य आयस्य मुख्यं स्रोतः अस्ति। जनतातः करग्रहणस्य तस्य च सार्वजनिकेषु कार्यक्रमेषु व्ययीकरणस्य सर्वकारः पूर्णतः अधिकारः अस्ति। उदाहरणार्थं पश्यामः यत् जल-आपूर्त्यर्थं जलस्य भूमितः निष्कासनार्थं जलस्य दूरं यावत् नयनार्थं नालिकानां विस्तारार्थं जलस्य शोधनार्थम् अशुद्धस्य जलस्य निष्कासनार्थं च सर्वकारः धनं व्ययीकरोति। प्रायः कराणां माध्यमेन अपि च जलस्य मूल्यं स्वीकृत्य सर्वकारः एतेषां कार्यक्रमाणां सञ्चालनं करोति। जलस्य मूल्यं तथा निर्धारीक्रियते यत् अधिकतराः जनाः प्रतिदिनं कस्याञ्चित् निश्चित-मात्रायां जलस्य व्ययं सोढुं शक्नुयुः।

केन्द्रीयसर्वकारः येषु धनं व्ययीकरोति



* कृषिः,उद्योगः विद्युत्,परिवहनं, विज्ञानं, प्रोद्यौगिकी इत्यादयः च सम्मिलिताः सन्ति।

** शिक्षा,स्वास्थ्यं, ग्रामीण-विकासः इत्यादयः सम्मिलिताः सन्ति।

*** राज्यानि एतस्य धनस्य उपयोगं केषुचित् अन्येषु सामाजिकेषु कार्यक्रमेषु अन्यासु आर्थिकीषु सेवासु च कुर्वन्ति।

**** केन्द्रीयसर्वकारः पर्यावरणस्य वनसंरक्षणस्य च कृते भू-विज्ञानस्य उपरि वैदेशिकेषु विषयेषु च अन्यासु च एतादृशीसु योजनासु च धनव्ययीकरोति।

अमू - दृष्टं भवता, सैदापेटस्य राजमार्गाः कथं नतोन्नताः आसन् ? राजमार्गेषु यातायात-सङ्केत-दीपाः अपि न आसन्। न जाने रात्रौ तत्र कीदृशी दशा स्यात्।

कुमारः – कस्मिंश्चित् पर्णकुटी-ग्रामे भवती अन्यां काम् अपेक्षां करिष्यति !

अमू – पर्णकुटी-ग्रामाः एतादृशाः किमर्थं भवन्ति ? किं तत्र जनसुविधाः न स्युः ?

कुमार- मम चिन्तनानुसारं जनसुविधाः तेषां जनानां कृते भवन्ति ये जनाः नगरेषु उत्तमेषु गृहेषु निवसन्ति। ते एव जनाः सन्ति ये सर्वकाराय कर-प्रदानं कुर्वन्ति।

अमू – सर्वकारस्य इदं दायित्वम् अस्ति यत् केवलं धनाढ्यानाम् आवासाः सन्ति तत्र एव उत्तमतया जनसुविधानि न प्रदेयानि अपितु सर्वेषां सामान्यानां विशेषाणां च जनानां कृते अपि एतानि सर्वाः जनसुविधाः दातव्याः। भवान् इत्थं किमर्थं वदति ? किं सामान्येषु आवासेषु निवसन्तः जनाः अस्य देशस्य नागरिकाः न सन्ति ? तेषाम् अपि च केचन अधिकाराः सन्ति।

कुमारः सक्रोधम् - परन्तु तथा कृते सति तु सर्वकारः निर्धनः भविष्यति।

अमू – यत् किमपि भवतु, सर्वकारेण सर्वेषां विकासार्थं कश्चित् मार्गः तु नूनम् आविष्करणीयः एव भविष्यति। किं भवान् कल्पनां कर्तुं शक्नोति यत् जलं विना विद्युतं विना राजमार्गं विना च निर्धनानाम् आवासानां कथं दुर्दशा स्यात् तेषां जीवनं च कियत् काठिन्यपूर्णं स्यात् ?

कुमार- अरे ...!

अमू –अस्माकं संविधाने बह्व्यः जनसुविधाः जीवनस्य अधिकारस्य भागरूपे स्वीकृताः सन्ति। सर्वकारः एतत् तथ्यं सर्वदा मनसि धारयेत् यत् एतेषाम् अधिकाराणाम् अवहेलनं न स्यात् यस्मात् च प्रत्येकं जनः सम्मानपूर्वकं जीवनं यापयेत्।

भवन्तः कस्य विचारेण सन्तुष्टाः सन्ति ?

१.**जनसुविधाः काः भवन्ति ?** जनसुविधानां सर्वेषां जनानां कृते प्राप्तिः स्यात् इति एतस्य कार्यस्य दायित्वं सर्वकारस्य एव किमर्थं भवितव्यम् ?

२. केषाञ्चित् जनसुविधानां प्राप्तिः सर्वेषां कृते भवेत् तन्निमित्तं सर्वकारः केषाञ्चित् निज-समवायानाम् अपि साहाय्यं स्वीकर्तुं शक्नोति । उदाहरणार्थं राजमार्ग-निर्माणस्य अनुबन्धाः निजसमवायेभ्यः दीयते अथवा अनुबन्धकर्तृणां जनानां पार्श्वे भवति । देहलीराज्ये विद्युतः वितरणस्य कार्यं द्वयोः निजसमवाययोः वर्तते । परन्तु सर्वकारेण एतेषां समवायानां नैरन्तर्येण निरीक्षणं करणीयम्, एतस्य विषयस्य च अपि सुनिश्चितीकरणं स्यात् यत् ते समवायाः जनसौविध्यानि न्यूनमूल्येन सर्वेषां जनानां कृते यथाकालं प्रापयेयुः । एतस्मिन् कार्ये ते अल्पम् अपि आलस्यं न कुर्युः ।

भवन्तः एतत् किमर्थम् अनुभवन्ति यत् जनसुविधानां दायित्वं सर्वकारस्य एव कार्यम् अस्ति तस्य एव एतेषां दायित्वं स्यात्, परन्तु सः एतानि कार्याणि निजसमूहानां माध्यमेन अपि कारयितुं शक्नोति ?

३ स्वस्य गृहस्य जलस्य भाटक-पत्रं पश्यन्तु अपि च जानन्तु यत् भवतां क्षेत्रे नगर-पालिकायाः जलस्य न्यूनतमं मूल्यं किम् अस्ति । यदि भवन्तः अधिकतया जलस्य प्रयोगं कुर्वन्ति तदा किं तस्य जलस्य मूल्यम् (दर-इति) अपि वर्धते ? जलस्य आधिक्येन प्रयोगे कृते सति वर्धितस्य मूल्यस्य अनुसारं जल-मूल्यस्य ग्रहणेन सर्वकारस्य किम् उद्देश्यं अस्ति ?

4. वेतन-भोगिना कर्मचारिणा, निजव्यवसायं कुर्वता, समवायं चालयता अपि च केनापि आपणिकेन जनेन वार्तां कृत्वा जानन्तु यत् जनाः कीदृशान् कीदृशान् करान् अथवा राजस्वानि सर्वकाराय यच्छन्ति । स्वस्य विश्लेषणस्य परिणामान् कक्षायां शिक्षकं दर्शयन्तु अपि च शिक्षकेण सह चर्चयन्तु ।

केन्द्रीयसर्वकारस्य कर-राजस्वस्य विभाजनम्



- व्यक्तिगत-आयकरः
- निगमकरः
- सीमाशुल्कं, केन्द्रीय-उत्पाद-शुल्कम् एवं च सेवाकरः
- अन्यत्

(स्रोतः - केन्द्रीय-वार्षिकं व्ययविवरणम् – २०१० – ११)

समीपस्थेषु स्थानेषु प्राप्तये बसयानानि एव सर्वेषु साधनेषु उत्तमानि महत्त्वपूर्णानि च साधनानि अस्ति । अधिकतराः व्यवसायिकाः जनाः स्व-गन्तव्यानि प्रति बसयानानां माध्यमेन एव प्राप्नुवन्ति । तीव्रनगरीकरणस्य परिमाणेन बृहद्-नगरेषु अपि सार्वजनिक-बस-सेवायाः अवस्थानुगुणं बसयानानि न्यूनानि सन्ति इत्थम् अस्माभिः अनुभूयते । एतेषां बसयानानां न्यूनतां दृष्टिपथे निधाय देहलीसर्वकारेण अन्यमहानगराणां सर्वकारेण च मेट्रो-रेल-परियोजना इति एका महत्वाकाङ्क्षी योजना प्रारब्धा चालिता वा । देहल्यां मेट्रो-रेल-यान-सुविधायाः निर्माणस्य प्रथमे खण्डे सर्वकारीय-वार्षिकव्ययस्य ११००० कोटि इति धनं व्ययीकृतम् । केषाञ्चित् जनानां कथनम् अस्ति यत् यदि सर्वकारः सार्वजनिक-बससेवायाः विस्तारम् तस्य परिष्कारं च अकरिष्यत् तदा एतस्य बृहद्-व्ययस्य आवश्यकता न अभविष्यत् अपि च जनानाम् आवश्यकतायाः पूर्तिः अपि अभविष्यत् । भवन्तः किम् अनुभवन्ति ? चिन्तनं कुर्वन्तु, यत् देशस्य अन्येषां भागानां कृते एतस्याः समस्यायाः किं सामाधानं भवितुं शक्नोति कं समाधानं वयम् अन्वेष्टुं शक्नुमः च ?

चेन्नई-नगरे जलस्य आपूर्तिः : किं तत्र सर्वेषां जनानां कृते जलस्य उपलब्धता भवति ?

एतस्मिन् विषये कश्चित् अपि सन्देहः नास्ति यत् जनसुविधानाम् उपलब्धता सर्वेषां जनानां कृते स्यात् । परन्तु यथार्थतायाम् इत्थं नास्ति । बहुषु स्थानेषु एवंविधानां सुविधानां महान् अभावः वर्तते ।अस्य अध्यायस्य अग्रिमेषु भागेषु भवन्तः जलस्य व्यवस्थायाः विषये पठिष्यन्ति । इयं जनसुविधा अत्यधिकं महत्त्वं विदधाति ।

यथा अस्माभिः अस्य अध्यायस्य प्रारम्भे दृष्टम् आसीत् , चेन्नई-नगरे जलस्य महान् अभावः अस्ति । नगरपालिकया जलस्य या आपूर्तिः क्रियते तया प्रायः नगरस्य अर्धा जनसङ्ख्या एव लाभान्विता भवति । केषुचित् क्षेत्रेषु नियमित-रूपेण जलस्य आपूर्तिः भवति । केषुचित् भागेषु अल्पतरं जलम् आगच्छति । यस्मिन् स्थाने जलस्य भण्डारणं कृतम् अस्ति तत्-समीपस्थेषु क्षेत्रेषु एव आधिक्येन जलस्य आपूर्तिः भवति परन्तु ततः दूरस्थेषु निवासेषु अल्पं जलम् आगच्छति ।

जलापूर्तेः न्यूनतायाः भारः प्रायशः निर्धनैः एव वोढव्यः भवति । यदा मध्यम-वर्गस्य जनानां पुरतः जलस्य सङ्कटम् उपस्थितं भवति तदा मध्यमस्य वर्गस्य जनाः सरलतरेण उपायेन एतस्य सङ्कटस्य समाधानम् अन्वेषयन्ति । ते मध्यम-वर्गीयाः जनाः भूमौ जलकूपं निर्माय अथवा जलापूर्ति-कर्तृभ्यः ट्रकयानेभ्यः जलं क्रीत्वा अथवा जलकूपीः क्रीत्वा स्वकार्यं साधयन्ति । सामान्य-जलस्य उपलब्धताम् अतिरिच्य केचन एव जनाः सुरक्षितं पेयजलं प्राप्नुवन्ति । अस्य सुरक्षितस्य पेयजलस्य आपूर्तिः एतस्मिन् तथ्ये आश्रितम् अस्ति यत् कश्चित् जनः कियतः जलस्य व्ययम् अथवा उपयोगं कर्तुं शक्नोति । अनेन प्रकारेण सम्पन्नस्य समुदायस्य पार्श्वे एव जल-प्राप्तेः अधिकाः विकल्पाः भवन्ति । ते सम्पन्नाः जनाः बद्ध-कूपी-जल-रूपेण, जलशोधक-उपकरणानां माध्यमेन च जलं स्वच्छीकृत्य शुद्धस्य जलस्य उपलब्धतां कर्तुं शक्नुवन्ति । अनेन प्रकारेण शुद्धस्य जलस्य कृते धनं व्ययीकर्तुं ते सम्पन्नाः जनाः सामर्थ्यवन्तः सन्ति अस्मात् कारणात् एव ते जनाः पेयजलं प्राप्नुवन्ति । परन्तु निर्धनाः तद्विधाभ्यः सुविधासुविधाभ्यः वञ्चिताः एव तिष्ठन्ति । परिणामतः इत्थं प्रतिभाति यत् येषां जनानां पार्श्वे आर्थिकं सामर्थ्यम् अस्ति तेषाम् एव जलस्य अधिकारः अस्ति । एषा स्थितिः 'सर्वेषां जनानां कृते स्वच्छस्य पेयजलस्य उपलब्धता' इत्यस्मात् लक्ष्यात् बहु दूरं वर्तते ।

ग्रामीणेषु क्षेत्रेषु मनुष्याणां पशूनां च इति उभयोः कृते जलस्य आवश्यकता भवति । अत्र कूपात् हस्त-कूपात् तडागात् कदाचित् च छदिषु स्थितेभ्यः जलागारेभ्यः अपि जलं लभ्यते । एतेषु स्रोतस्सु अधिकतराः नैजाः सन्ति । नगरस्य अपेक्षया ग्रामीणेषु क्षेत्रेषु सार्वजनिकस्य जलापूर्तेः इतोऽपि अधिकः अभावः अस्ति ।

कृषकेभ्यः जलस्य अपहरणम्

जलस्य न्यूनतया निजसमवायानां कृते लाभांशस्य मार्गाः आविष्कृताः । बहवः निज-समवायाः नगरस्य समीपस्थेभ्यः स्थानेभ्यः जलं क्रीत्वा नगरेषु विक्रीणन्ति । चेन्नई-नगरे मामन्दूर-पालुर- कारुनगिझी-प्रभृतिभ्यः लघुनगरेभ्यः अपि च नगरस्य उत्तरस्यां दिशि स्थितेभ्यः ग्रामेभ्यः जलम् आनीयते । १३००० तः अपि अधिकानि जलापूर्ति-ट्रकयानानि अस्मिन् कार्ये संलग्नानि सन्ति । प्रतिमासं जलस्य व्यापारिणः कृषकेभ्यः प्राग्दत्त-मूल्यं यच्छन्ति यस्मात् च ते कृषकाणां भूमितः जलं निष्कासयितुं शक्नुयुः । अनेन प्रकारेण न केवलं तेषां कृषकाणां कृषि-निमित्तकं जलं परिहृतं भवति अपितु ग्रामाणां कृते जलस्य आपूर्तिः अपि न्यूनतरा जायते । परिणामतः एतेषु सर्वेषु लघु-नगरेषु ग्रामेषु च जलस्य स्तरः अपि न्यूनतरः जायते ।

विकल्पानाम् अन्वेषणम्

चेन्नई-नगरस्य स्थितिः विशिष्टा नास्ति । ग्रीष्म-कालेषु जलस्य एषा न्यूनता देशस्य सर्वेषु नगरेषु प्रायः दृश्यते । नगरपालिकायाः जलापूर्ति-विषयकम् असामर्थ्यं दृष्ट्वा एव निज-समवायाः जलस्य आपूर्तिं कर्तुम् अधिकतरेषु क्षेत्रेषु विस्तारं गच्छन्तः सन्ति । एते समवायाः स्वस्य लाभार्थं जलं विक्रीणन्ति । जलस्य उपयोगे अपि अधुना महान् भेद-भावः दृश्यते । नगरेषु प्रतिदिनं प्रत्येकं जनाय १३५ लीटर-परिमितं जलं दीयते । जलस्य इयं मात्रा प्रायशः सप्त-द्रोणी-समं वर्तते । नगर-जल-आयोगेन इयं मात्रा निर्धारिता अस्ति । परन्तु निर्धन-निवासेषु तत्रत्यानां जनानां कृते इयं मात्रा प्रतिव्यक्ति प्रतिदिनं विंशति-लीटर-परिमितम् अर्थात् (एका-द्रोणी) अपि न दीयते । अपरस्मिन् पक्षे पश्यामः चेत् सुन्दरेषु वसति-गृहेषु निवास-कर्तृणां जनानां कृते प्रतिदिनं प्रतिव्यक्ति १६०० लीटर-परिमितं जलम् अर्थात् द्रोणीनाम् अशीतिः यावत् जलं दीयते ।

चर्चां कर्वन्तु : यदि सर्वकारः जलापूर्तेः दायित्वं न निर्वहेत् तदा किं भवेत् ? किं भवन्तः अनुभवन्ति यत् सर्वकारस्य एषः निर्णयः सम्यक् भविष्यति ?

नगरपालिकायाः माध्यमेन जलापूर्तौ या विफलता भवति सा प्रायः सर्वकारस्य एव विफलता मन्यते । केषाञ्चित् जनानां तर्कः अस्ति यत् सर्वकारः आवश्यकतानुगुणं जलस्य उपलब्धिं कारयितुं समर्थः नास्ति अपि च सर्वकारस्य बहवः नगर-जल-विभागाः आर्थिक-हानि-ग्रस्ताः सन्ति, अतः जलापूर्तेः कार्यं निज-समवायेभ्यः दातव्यम् । ते जनाः अनुभवन्ति यत् निजसमवायाः जलापूर्तेः कार्यं सम्यक्-प्रकारेण कर्तुं शक्नुवन्ति ।

एतस्य तर्कस्य अनुसारं निम्नलिखितेषु तथ्येषु विचारं कुर्वन्तु –

१. आविश्वं जलापूर्तेः दायित्वं सर्वकारस्य एव वर्तते । निज-जलापूर्ति-व्यवस्थायाः उदाहराणि अल्पतराणि सन्ति ।

२. संसारे तद्विधानि बहूनि क्षेत्राणि सन्ति यत्र सार्वजनिक-जलापूर्तेः प्रणाल्याः अनुसारं सर्वे जनाः जलं प्राप्तवन्तः सन्ति । अधः प्रदत्तायां मञ्जूषायां पश्यन्तु) ।

पोर्तो-एलेग्रे इति अस्मिन् सार्वजनिकी जलापूर्तिः

पोर्तो-एलेग्रे इति ब्राजील-देशस्य एकं नगरम् अस्ति । एतस्मिन् नगरे बहवः निर्धनाः जनाः सन्ति , परन्तु अवधातव्यः अंशः अयम् अस्ति यत् संसारस्य अन्येषां नगराणाम् अपेक्षया अत्र शिशु-मृत्यु-स्तरः (दर इति) अल्पतरः वर्तते । अत्रत्येन नगर-जल-विभागेन सर्वेषां जनानां कृते स्वच्छं पेयजलम् उपलब्धं कारितम् अस्ति । शिशु-मृत्यु-स्तरस्य न्यूनतायाम् इदं महत्त्वपूर्णं कारणम् अस्ति । अत्र जलस्य सामान्य-प्रमाणं न्यूनं निर्धारितम् अस्ति । निर्धनैः अन्येषां जनानाम् अपेक्षया केवलं जलस्य अर्धं मूल्यम् एव दातव्यं भवति । जल-विभागेन यः लाभांशः प्राप्यते तस्य उपयोगः जलापूर्ति-प्रणाल्याः इतोऽपि परिष्काराय क्रियते । जल-विभागस्य कार्यं पारदर्शि-रूपेण चलति । विभागः कां योजनां हस्तगतां कुर्यात् एतस्मिन् विषये जनैः मिलित्वा निर्धारीक्रियते । जनसभासु जनता प्रबन्धकानां पक्षान् शृणोति अपि च जलविभागस्य प्राथमिकतानां निर्धारणे मतदान-माध्यमेन निर्णयं करोति ।

३. यत्र जलापूर्तेः दायित्वं निज-समवायेभ्यः प्रदत्तम्, एवंविधेषु केषुचित् विषयेषु जलस्य मूल्यं वृद्धिं गतम् । एतस्मात् कारणात् बहवः जनाः वर्धितस्य जलस्य मूल्यं दातुम् असमर्थाः जाताः । एतस्मात् कारणात् तद्विधेषु नगरेषु जनैः बृहत्-प्रदर्शनानि आन्दोलनानि च कृतानि । बोलीविया इत्यादिषु देशेषु तु महान्तः उपद्रवाः अपि जाताः येषां कारणात् सर्वकारः जलापूर्तेः दायित्वं निज-समवायेभ्यः स्वकीयेषु हस्तेषु ग्रहीतुं बाध्यः जातः ।

४. भारते सर्वकारीयाणां जलीय-विभागानां साफल्यस्य बहूनि उदाहरणानि सन्ति । परन्तु एतानि उदाहरणानि अल्पानि सन्ति अपि च तेषां साफल्यम्, अल्पेषु एव क्षेत्रेषु सीमितं दृश्यते । मुम्बई-महानगरस्य जलापूर्ति-विभागः जलापूर्तौ व्यय-सम्बन्धिताम् आवश्यकतां पूरयितुं जल-शुल्कस्य माध्यमेन पर्याप्तं धनम् अर्जयति । वर्तमान-कालस्य एकस्याः सूचनायाः अनुसारं ज्ञायते यत् हैदराबादस्थं जलविभागस्य क्षेत्रं वर्धितम् अस्ति तस्य च आयः अपि वर्धितः अस्ति । चेन्नई-नगरे जलविभागेन वर्षा-जलस्य सञ्चयार्थं विविधाः योजनाः प्रारब्धाः याभिः योजनाभिः भूमिगत-जलस्य स्तरः वर्धितः स्यात् । तत्र जलस्य वहनार्थं वितरणार्थं च निज-समवायानाम् अपि सेवाः स्वीक्रियन्ते परन्तु जलापूर्तेः कृते जलवाहनानां सङ्ख्या कियती स्यात् एतस्य निर्णयः सर्वकारीयः जलापूर्ति-विभागः एव निर्धारीकरोति अपि च विभागः एव तेषां कृते कार्यं कर्तुम् अनुमतिं ददाति । अतः एतानि जलवाहनानि अनुबन्धितानि इति उच्यन्ते ।

उपरितने भागे आगतेषु मुख्यविचारेषु चर्चां कुर्वन्तु । जलापूर्तौ परिष्कारार्थं भवतां विचारानुसारं किं कर्तुं शक्यते ?

किं भवन्तः अनुभवन्ति यत् जल-विद्युत्-प्रभृतीनां संसाधनानां संरक्षणम् अपि च सार्वजनिकानां परिवहनानां साधनानां च प्राचुर्येण उपयोगः समीचीनतरः वर्तते ?

मुम्बयी-नगरस्य उपनगरीय-रेलवे-व्यवस्था एका उत्तमा सार्वजनिकी प्रणाली अस्ति । अयं संसारस्य सर्वाधिकः सघनः यातायात-मार्गः अस्ति । अनया रेल-व्यवस्थया प्रतिदिनं ६५ लक्षं यात्रिणः एकस्मात् स्थानात् अन्यत् स्थानं प्रति नीयन्ते । ३०० किलोमीटर-परिमितात् अपि अधिकेषु लम्बतरेषु मार्गेषु गमनशीलानां एतेषां स्थानीय-रेल-यानानां माध्यमेन दूरस्थाः जनाः अपि कार्याणि अन्वेष्टुं नगरम् आगच्छन्ति । अवधातव्यः अयम् अंशः वर्तते यत् नगरेषु निवासार्थम् अधिकः धनराशिः व्ययीभवति एतस्मात् कारणात् साधारण-रूपेण परिश्रमशीलाः जनाः नगरे निवस्तुं न शक्नुवन्ति ।

स्वच्छता-सम्बन्धितानां सुविधानां विस्तारः

"अस्माकं कृते शौचालयः !" ते आश्चर्येण उक्तवन्तः ।
"वयं तु मुक्ते स्थाने गत्वा स्वकार्यं साधयामः ।,
" लैट्रीन अर्थात् शौचालयानाम् उपयोगः तु युष्मादृशाः धनाढ्याः जनाः कुर्वन्ति"।
"अस्पृश्यानां दुःख-निवेदनानि स्मरतः महात्म-गान्धिनः वक्तव्यम्"
राजकोट-स्वच्छता-समितिः, १८९६.

स्वच्छं पेयजलम् अतिरिच्य इदम् अपि आवश्यकम् अस्ति यत् जलात् ये रोगाः उत्पद्यन्ते तेषां रोगाणां वारणार्थं स्वच्छतायाः विषये अपि अवधानं स्यात् । भारते स्वच्छता-सुविधानां क्षेत्रं तु जलापूर्तेः क्षेत्राद् अपि लघु अस्ति । २००१ तम-वर्षस्य सर्वकारीय-गणना-द्वारा ज्ञायते यत् भारतस्य ६८ प्रतिशतं जनानां पार्श्वे पेयजलस्य सुविधा उपलब्धा नास्ति परन्तु स्वच्छता-सुविधाः अर्थात् गृहेषु शौचालय-सुविधाः ३६ प्रतिशतं जनानां पार्श्वे एव उपलब्धाः सन्ति । अत्र अपि ग्रामीण-क्षेत्राणां नगर-क्षेत्राणां च निर्धनानां स्थितिः दुर्बलतरा दृश्यते ।

असर्वकारीयं सङ्घटनं "सुलभ-इन्टर-नेशनल –इति गत-त्रिभ्यः दशकेभ्यः निम्न-जाति-वर्गाणां निम्न-आय-वर्गाणां च जनानां पुरतः वर्तमान-स्वच्छतायाः अभावस्य या समस्या वर्तते तां समस्याम् अपाकर्तुम् एतत् उपर्युक्तं सङ्घटनं प्रयासरतम् अस्ति । एतेन सङ्घटनेन ७५,००० इति सङ्ख्यातः अपि अधिकाः सार्वजनिकाः शौचालयाः निर्मिताः । अनेन सङ्घटनेन १२,००,००० इति सङ्ख्यकाः निज-शौचालयाः अपि निर्मिताः सन्ति यस्मात् कारणात् एका कोटिः जनाः एताभिः सुविधाभिः लाभान्विताः भवन्ति । सुलभ इत्यस्य सुविधानां ये जनाः उपयोगं कुर्वन्ति तेषु अधिकतराः निर्धनाः परिश्रमिणः अर्थात् कर्मकर-वर्गस्य जनाः भवन्ति ।

सुलभ इति सङ्घटनेन सर्वकारीयेण धनेन शौचालय-प्रकल्पानां निर्माणार्थं नगरपालिकाभिः अन्यैः स्थानीयैः निकायैः सह अपि अनुबन्धाः कृताः सन्ति । स्थानीयाः विभागाः एतेषां सेवाकार्याणां स्थापनार्थं भूमेः धनस्य च धनस्य च प्रावधानं कुर्वन्ति, परन्तु तस्य शौचालस्य संरक्षणस्य कृते यः धनराशिः अपेक्षितः भवति सः कदाचित् प्रयोक्तृभ्यः प्राप्त-धनेन पूर्तिं नीयते (नगरेषु शौचालयानां प्रयोगे कृते सति प्रतिजनम् एकं रूप्यकं शुल्क-रूपेण स्वीक्रियते) ।

अग्रिमे काले यदा भवन्तः यदा सुलभ-शौचालयं द्रक्ष्यन्ति तदा एतत् भवितुं शक्नोति यत् भवन्तः यत् ज्ञातुम् इच्छेयुः यत् एते शौचालयाः कीदृशाः भवन्ति ।

किं भवन्तः अनुभवन्ति यत् समुचितानां स्वच्छता-सौविध्यानाम् अभावेन जनानां जीवनं प्रभावितं भवति ? कथम् ?

भवन्तः इत्थं किमर्थम् अनुभवन्ति यत् अनेन महिलानां बालिकानां गभीरतरः प्रभावः भविष्यति ?

२००१ तम-वर्षस्य जनगणनायाः अनुसारं ४४ प्रतिशतं ग्रामीण-गृहेषु विद्युत् प्राप्तवती अस्ति । एतस्य अभिप्रायः अयम् अस्ति यत् प्रायशः अशीति-लक्षाधिक-सप्त-कोटिः परिवाराः अधुना अपि तमसि एव स्वकीयं जीवनं यापयन्ति ।

निष्कर्षः

जनसुविधानां सम्बन्धः अस्माकम् आधारभूताभिः आवश्यकताभिः सह भवति । भारतीये संविधाने जल-स्वास्थ्य-शिक्षादीनां प्राप्तेः ये अधिकाराः सन्ति ते अधिकाराः भारतीय-संविधानेन जीवनस्य अधिकारस्य भागरूपेण गृहीताः सन्ति । अनेन प्रकारेण सर्वकारस्य अन्यतमं महत्त्वपूर्णं दायित्वम् इदं वर्तते यत् सः प्रत्येकं व्यक्तेः कृते पर्याप्तानां जन-सुविधानाम् उपलब्धिं कारयेत् ।

परन्तु एतस्मिन् विषये सन्तोषप्रदा प्रगतिः न जाता । आपूर्तौ न्यूनता वर्तते वितरणे च महती असमानता दृश्यते । महानगराणां बृहद्-नगराणां च अपेक्षया लघु-नगरेषु ग्रामेषु च एतासां सुविधानां स्थितिः इतोऽपि विकटा वर्तते । सम्पन्न-निवासानाम् अपेक्षया निर्धन-निवासेषु सेवासुविधानां स्थितिः समीचीना नास्ति । एतासां सुविधानां निजीकरण-द्वारा समस्यायाः समाधानं न भविष्यति । कस्मिन् अपि समाधाने एतत् महत्त्वपूर्णं तथ्यं हेयम् इति कृत्वा न स्वीकर्तुं शक्नुमः यत् देशस्य प्रत्येकं जनस्य कृते एतासां सुविधानां प्राप्तेः अधिकारः अस्ति तस्य कृते च एतासां सुविधानां समता-परक-रूपेण प्राप्तिः स्यात् ।

अभ्यासः

१. भवन्तः इत्थं किमर्थम् अनुभवन्ति यत् संसारे निज-जलापूर्तेः उदाहरणानि न्यूनानि सन्ति ?

२. किं भवन्तः अनुभवन्ति यत् चेन्नई-नगरे सर्वेषां कृते जलस्य सुविधा उपलब्धा अस्ति अपि च ते जलस्य व्ययं दातुं समर्थाः सन्ति ? चर्चां कुर्वन्तु ।

३. कृषकैः चेन्नई-नगरस्य जल-व्यापारिणां कृते यत् जलं विक्रीयते तेन स्थानीयेषु जनेषु कः दुष्प्रभावः भवति ? किं भवन्तः अनुभवन्ति यत् स्थानीयाः जनाः भूमिगत-जलस्य दोहनस्य विरोधं कर्तुं शक्नुवन्ति ? किं सर्वकारः एतस्मिन् विषये किमपि कर्तुं शक्नोति ।

४. एवं किमर्थम् अस्ति यत् अधिकतराः निज-चिकित्सालयाः निज-विद्यालयाः च लघु-नगराणां ग्रामीण-क्षेत्राणां अपेक्षया महानगरेषु एव सन्ति ?

५. किं भवन्तः अनुभवन्ति यत् अस्माकं देशे जन-सुविधानां वितरणं पर्याप्त-मात्रया निष्पक्षरूपेण च अस्ति ? स्वस्य तर्कस्य पुष्टीकर्तुम् उदाहरणं यच्छन्तु ।

६. स्वस्य क्षेत्रस्य जल-विद्युत्-आदीः जन-सुविधाः पश्यन्तु । किम् एतासु जनसुविधासु परिष्कारस्य आवश्यकता अस्ति ? भवतां विचारानुसारं किं कर्तव्यं स्यात् ? एतां तालिकां पूरयन्तु ।

	किम् एतत् उपलब्धम् अस्ति ?	**तस्मिन् कथं परिष्कारः स्यात् ?**
जलम्		
विद्युत्		
राजमार्गः		
सार्वजनिकानि परिवहनानि		

७. किं भवतां क्षेत्रस्य सर्वे जनाः उपर्युक्त-जन-सुविधासुविधानां समानरूपेण उपयोगं कुर्वन्ति ? विस्तरेण ज्ञापयन्तु ?

८. जनगणनया सह कासाञ्चित् जनसुविधानां विषये अपि अङ्काः एकत्रीक्रियन्ते । स्वकीयेन शिक्षकेण सह चर्चां कुर्वन्तु यत् जनगणनायाः कार्यं कदा, केन प्रकारेण च क्रियते ।

९. अस्माकं देशे निज-शैक्षणिक-संस्थानानि विद्यालयाः महाविद्यालयाः विश्वविद्यालयाः तकनीकी-व्यवसायिक-प्रशिक्षण-संस्थानानि च अधिक-मात्रया उद्घाट्यन्ते । अपरस्मिन् पक्षे पश्यामः चेत् सर्वकारीय-शिक्षा-संस्थानानां महत्त्वं न्यूनं जायमानम् अस्ति । भवताम् अभिमतानुसारम् एतस्याः घटनायाः कः दुष्प्रभावः भवितुं शक्नोति ? चर्चां कुर्वन्तु ।

शब्द-सङ्कलनम्

स्वच्छता – मानव-मल-मूत्रयोः सुरक्षित-रूपेण नाशार्थं सुविधा । एतस्य मलमूत्रस्य सम्यक्-रूपेण विसर्जनार्थं शौचालयानां निर्माणं क्रियते । दूषितस्य जलस्य स्वच्छतार्थं नलिकानां प्रयोगः क्रियते । सङ्क्रमणात् अस्माकं रक्षणं स्यात् एतदर्थं किम् आवश्यकं भवति ।

सम-व्यवसायिक-समवायाः – कम्पनी इति एका व्यवसायिकी संस्था भवति यस्याः संस्थापना केचन जनाः अथवा सर्वकारः करोति । येषां सम-व्यावसायिक-समवायानां सञ्चालनं स्वामित्वं च निज-समूहानाम् अथवा व्यक्तीनाम् अधिकार-क्षेत्रे भवति सः एव निज-समूहः इति उच्यते । उदाहरणार्थं पश्यामः टाटा-स्टील-इति एकः निज-समूहः अस्ति, परन्तु इण्डियन-आयल-इति समूहस्य सञ्चालनं सर्वकारः करोति ।

सार्वभौमिक-प्राप्तिः – यदा केनचित् मनुष्येण किञ्चित् वस्तु प्राप्यते अपि च सः वस्तुनः कृते व्ययः अपि कर्तुं शक्नोति तदा सा एव सार्वभौमिकी प्राप्तिः इति उच्यते । उदाहरणार्थं पश्यामः गृहे नलिकायां जलम् आयाति तदा परिवारं यावत् जलस्य प्राप्तिः इति भवति अपि च यदि तस्य मूल्यं न्यूनम् अस्ति, अपि च, यदि तस्य मुक्ततया उपलब्धता स्यात् तदा प्रत्येकं जनः तस्य उपयोगं कर्तुं शक्नोति ।

मूलभूत-सुविधाः – भोजन-जल-स्वच्छता-स्वास्थ्य-शिक्षा-सदृश्यः मूलभूताः आवश्यकताः याः सर्वेषां जीवनस्य कृते अत्यावश्यक्यः भवन्ति ।

॥ इति नवमोऽध्यायः ॥

दशमः अध्यायः

अधिनियमः सामाजिक-न्यायः च

किं भवन्तः सप्तम-कक्षायाः "विपण्याम् एकं युतकम्" इति अध्यायं स्मरन्ति ? तत्र वयं दृष्टवन्तः आस्म यत् विपणीनां शृङ्खला केन प्रकारेण कार्पासस्य उत्पादकान् सुपर इति विपण्यां युतकस्य क्रेत्रा केनचित् ग्राहकेण सम्बद्धं करोति । एतस्यां शृङ्खलायाम् अनुक्षणं क्रयः विक्रयः एव चलति स्म ।

कार्पासस्य उत्पादकाः लघु-कृषकाः ईरोड-इत्यस्य तन्तुवायाः अथवा वस्त्र-निर्यातकस्य उद्योगस्य कर्मकराः युतकानाम् उत्पादने प्रत्यक्ष-रूपेण अथवा अप्रत्यक्ष-रूपेण सम्मिलिताः बहवः जनाः विपण्यां शोषणेन ग्रस्यन्ते । तैः सह सम्यक्-व्यवहारः न भवति । विपण्यां प्रत्येकं स्थाने जनानां शोषणस्य संभावना सर्वदा भवति एव, कामं ते कर्मकराः स्युः उपभोक्तारः स्युः उत्पादकाः वा भवेयुः ।

जनानाम् एवंविधात् शोषणात् संरक्षणार्थं सर्वकारः केषाञ्चित् अधिनियमानां निर्माणं करोति । एतेषाम् अधिनियमानां माध्यमेन एतस्य विषयस्य स्थापनस्य प्रयासः क्रियते यत् विपण्याम् अनुचितानां प्रक्रियाणाम् उपायानां च निरोधः स्यात् ।

आगच्छन्तु विपण्याः एकां सामान्यां स्थितिं पश्यामः यस्याम् अधिनियमस्य महत्त्वम् अस्ति। विषयः कर्मकराणां पारिश्रमिकेण सम्बद्धः अस्ति। निज-समूहाः, संविदाकाराः, व्यवसायिनः एते सर्वे आधिक्येन लाभांशस्य अर्जनस्य प्रयासं कुर्वन्ति। लाभांशस्य आङ्काक्षायां ते कर्मकराणां कृते तेषाम् उचितं पारिश्रमिकं न यच्छन्ति। कर्मकरेभ्यः तेषां समुचितस्य पारिश्रमिकस्य अदानम् अधिनियमस्य दृष्ट्या अथवा अधिनियम-प्रक्रियादृष्ट्या अनुचितम् अस्ति। कर्मकराः पारिश्रमिकं न्यून-मात्रया न लभेरन् ते समुचित-मात्रया पारिश्रमिकं लभेरन्। एतदर्थं न्यूनतमस्य वेतनमानस्य विषये एकः अधिनियमः अपि निर्मितः अस्ति। एतस्य अधिनियमस्य अन्तर्गतं कर्मकरस्य कृते यस्य वेतमानस्य निर्धारणं कृतम् अस्ति ततः न्यूनं वेतनं कोऽपि कर्मकराय न दातुं शक्नोति। न्यूनतमे वेतन-माने प्रायः केषाञ्चित् वर्षाणाम् अन्तरालेन वृद्धिः क्रियते।

येन प्रकारेण कर्मकराणां सुरक्षार्थं न्यूनतमस्य वेतनमानस्य अधिनियमः रचितः अस्ति तेन प्रकारेण विपण्याम् अपि उत्पादकानाम् उपभोक्तॄणां च हितानां रक्षार्थम् अपि अधिनियमाः निर्मिताः सन्ति। एतेषाम् अधिनियमानां माध्यमेन कर्मकराणाम् उपभोक्तॄणाम् उत्पादकानाम् एतेषां त्रयाणां वर्गाणां ये सम्बन्धाः सन्ति तेषां सम्बन्धानाम् अथवा व्यवहाराणाम् अनेन प्रकारेण सञ्चालनं क्रियते यत् तेषु कस्यापि शोषणं न स्यात्।

न्यूनतमस्य वेतनमानस्य कृते अधिनियमस्य आवश्यकता भवति ?

जानन्तु –

(क) भवतां राज्ये निर्माण-कार्यस्य कर्तॄणां कर्मकराणां कृते न्यूनतमं वेतनमानं किं निर्धारितम् अस्ति ?

(ख) भवन्तः किम् अनुभवन्ति यत् निर्माण-कार्यस्य कर्तॄणां कर्मकराणां कृते न्यूनतमं वेतनमानं वर्तते तत् सम्यक् अस्ति उत् न्यूनम् अस्ति अथवा तद् अधिकम् अस्ति ?

(ग) न्यूनतमस्य वेतनमानस्य निर्धारणं कः करोति ?

अहमदाबादस्य एकस्मिन् वस्त्रोद्योगे कार्यरताः कर्मकराः। विद्युता चलनशीलै तन्त्रवापैः सह वर्धितया प्रतिस्पर्धया कारणतः १९८०, १९९० तमयोः दशकयोः अधिकतराः वस्त्र-उद्योगाः पिहिताः जाताः आसन्। पावरलूम इति विद्युता चलनशीलान् तन्त्रवापान् कथयन्ति। अयं ४-६ तन्त्रवापानाम् एकः लघु-एकाङ्कः अस्ति। एतेषां तन्त्रवापानां स्वामिनः स्वयं तैः सह कार्यं कुर्वन्ति अपि च स्वकीयैः परिवार-जनैः सह बहिष्टात् आगतान् कर्मकरान् अपि कार्ये नियोजयन्ति। इदं सर्वैः अनुभूतं तथ्यम् अस्ति यत् विद्युता सञ्चलनशीलेषु तन्त्रवापेषु कार्यस्थितयः बहुजटिलाः भवन्ति।

तालिकायाः एकस्यां सङ्ख्यायां विभिन्नानां पक्षाणां सुरक्षया सम्बन्धिताः केचन महत्त्वपूर्णाः अधिनियमाः प्रदत्ताः सन्ति । तत्र प्रदत्तयोः द्वितीययोः तृतीययोः च कोष्ठकयोः ज्ञापितम् अस्ति यत् एते अधिनियमाः किमर्थम् अपि च केषां कृते आवश्यकाः सन्ति। कक्षायां चर्चायाः आधारेण अस्याः तालिकायाः रिक्तस्थानानि पूरयन्तु।

तालिका –१

अधिनियमः	**एतस्य आवश्यकता किमर्थम् अस्ति ?**	**अयम् अधिनियमः कस्य हितस्य रक्षार्थम् अस्ति ?**
न्यूनतमस्य पारिश्रमिकस्य कृते अधिनियमः। एतस्मिन् अधिनियमे इदं सुनिश्चितम् अस्ति यत् कस्यापि जनस्य पारिश्रमिकम् एकस्मात् निर्धारितात् न्यूनतम-राशेः न्यूनं न स्यात्।	बहूभ्यः कर्मकरेभ्यः तेषां स्वामिनः उचितं पारिश्रमिकं न यच्छन्ति । परन्तु कर्मकराणां कृते कार्यस्य आवश्यकता भवति अतः ते विरोधम् अपि न कर्तुं शक्नुवन्ति परिणामतः ते अल्पेन एव पारिश्रमिकेण कार्यं कर्तुं सज्जाः भवन्ति।	अयम् अधिनियमः सर्वेषां कर्मकराणां, विशेषतः ये कर्मकराः क्षेत्रेषु निर्माण-कार्येषु उद्योगेषु गृहेषु च कार्यं कुर्वन्ति तेषां हितानां रक्षार्थं निर्मितः आसीत्।
कार्यस्थले पर्याप्तायाः सुरक्षा-व्यवस्थायाः प्रबन्धार्थम् अधिनियमाः । उदाहरणार्थं पूर्वसूचनायाः कृते ध्वनि-सङ्केतः, अपि च आपातकालीन-द्वारादीनि सम्यक्-प्रकारेण कार्यं कुर्वन्ति न वा इत्यादि-विषये जागरूकता स्यात्।		
वस्तूनां गुणवत्ता निर्धारितानां मानकानाम् अनुरूपं स्यात् एतदर्थम् अधिनियमाः स्युः । उदाहरणार्थं विद्युतः उपकरणानि सुरक्षा-मानकानाम् अनुरूपं भवेयुः।	विद्युत्-उपकरणानि, भोजनम्, औषधानि इत्यादीनाम् अनुचितायाः गुणवत्तायाः कारणात् उपभोक्तृणां जीवनं सङ्कटापन्नं भवितुं शक्नोति।	
आवश्यक-वस्तूनां यथा- शर्करा, मृत्-तैलम्, अन्नम् इत्यादिकानां मूल्यानि नियन्त्रणे भवेयुः तदर्थम् अधिनियमाः आवश्यकाः भवन्ति।		एवंविधानां निर्धनानां हितानां रक्षार्थं ये निर्धनाः एतेषां वस्तूनाम् अधिकं मूल्यं न निर्वोढुं शक्नुवन्ति ।
कार्यस्थलेषु बालश्रमस्य वारणार्थम् अधिनियमाः।		
कर्मकर-सङ्घटनम् अथवा सङ्घटनं निर्मातुं सम्बन्धिताः अधिनियमाः।	सङ्घटनेषु सङ्घटिताः भूत्वा कर्मकराः संयुक्त-शक्तेः आश्रयेण समुचितस्य वेतनस्य अपि च समुचितानां कार्यस्थितानां कृते स्वविचारं प्रकटयितुं शक्नुवन्ति।	

अधिनियमस्य निर्माणम् एव केवलं पर्याप्तं न भवति । सर्वकारेण अयम् अपि निश्चयः करणीयः भवति यत् अधिनियमानां क्रियान्वयनम् अपि स्यात् । एतस्य अभिप्रायः अयं भवति यत् अधिनियमानां क्रियान्वयनम् अत्यावश्यकं भवति । यदा कश्चित् अधिनियमः बलवत्तरेभ्यः जनेभ्यः दुर्बलानां जनानां रक्षणार्थं निर्मीयते तदा तस्य क्रियान्वयनम् इतोऽपि महत्त्वपूर्णं भवति । उदाहरणार्थं प्रत्येकं कर्मकरः समुचितं वेतनं प्राप्नुयात् एतस्य निश्चयस्य कृते सर्वकारेण नियमितरूपेण कार्यस्थलानां नैरन्तर्येण निरीक्षणं करणीयं भवति । यदि कश्चित् अधिनियमस्य उल्लङ्घनं करोति तदा सः दण्डनीयः भवति । यदि कर्मकरः निर्धनः अस्ति अथवा सः शक्तिहीनः अस्ति तदा सः अल्पेन वेतनमानेन अपि कार्यं कर्तुं सज्जः भवति यतो हि तस्य भयं भवति यत् सः इत्थं न करिष्यति तदा सः एतस्याः वृत्तेः अपि च्युतः भविष्यति । स्वामिनः अपि एतत् तथ्यं सम्यक्तया जानन्ति । ते स्वकीयस्य बलस्य प्रयोगं कुर्वन्ति यतोहि तस्मात् कर्मकराः न्यूनेन एव वेतनेन कार्यं कर्तुं सज्जाः भवेयुः । एतस्याम् अवस्थायाम् इदम् आवश्यकं भवति यत् सम्बन्धितस्य अधिनियमस्य क्रियान्वयनं सम्यक्-प्रकारेण भवेत् ।

एतेषाम् अधिनियमानां निर्माणेन सर्वकारः व्यक्तीनाम् अथवा निज-समूहानां गतिविधीः नियन्त्रयितुं शक्नोति । यस्मात् च सामाजिकस्य न्यायस्य सुनिश्चितीकरणं स्यात् । एतेषु बहूनाम् अधिनियमानां प्रादुर्भावः भारतीये संविधाने प्रदत्तेभ्यः मौलिकेभ्यः अधिकारेभ्यः जातः अस्ति । उदाहरणार्थं शोषणतः मुक्तेः अधिकारस्य अर्थः अस्ति यत् केनापि कर्मकरेण न्यूनेन पारिश्रमिकेण यत् कार्यं कार्यते तत् अथवा बद्धकर्मकर-रूपेण केनापि कर्मकरेण कार्यं कारयितुं न शक्यते । संविधाने इदम् अपि उक्तम् अस्ति यत् १४ वर्षेभ्यः न्यून-वयसः कस्यापि बालस्य उद्योगे अथवा कस्मिन् अपि आकरे भयङ्करे व्यवसायिके कार्ये वा नियोजनं न कर्तुं शक्यते ।

व्यवहारे एते अधिनियमाः कथं पुरतः आयान्ति ? एते अधिनियमाः सामाजिकीनां चिन्तानां व्याख्यानं कथं कुर्वन्ति ? अस्मिन् अध्याये वयम् एवंविधानां केषाञ्चित् प्रश्नानां समीक्षणं करिष्यामः ।

२००१ तमस्य वर्षस्य जनगणनायाः अनुसारं भारते ५-१४ आयुषः १.२ कोटिः बालकाः विभिन्नेषु व्यवसायेषु वृत्तिं कुर्वन्ति । एतेषु बहवः बालाः भयङ्करेषु व्यवसायेषु निरताः सन्ति । अक्तूबर-मासस्य २००६ तमे वर्षे सर्वकारेण चतुर्दश-वर्षेभ्यः न्यून-आयुषां बालकानां गृहेषु, भोजनालयेषु, उपाहारगृहेषु, चायादिकानाम् आपणेषु, तेषां वृत्तौ नियोजनस्य कार्यकरणे च प्रतिबन्धः कृतः । बाल-श्रम-निरोध-अधिनियमे संशोधनं कृत्वा इदानीम् एषः प्रावधानः कृतः अस्ति यत् एतेषां लघुबालकानां वृत्तेः नियोगः एकः गभीरः अपराधः अस्ति । यदि कश्चित् जनः एतस्य अधिनियमस्य उल्लङ्घनं करोति तदा तस्य मनुष्यस्य कृते न्यूनतमं मासत्रयं यावत्,अधिकतमं वर्षद्वयं यावत् कारवासस्य दण्डः अपि च तस्य कृते १०,००० तः २०,००० रूप्यकाणि यावत् दण्डस्य प्रावधानं भवितुं शक्नोति । केन्द्र–सर्वकारेण राज्य-सर्वकाराः निर्दिष्टाः यत् गृह-भृत्यरूपेण कार्यं कुर्वतां बालानां मुक्तिः भवेत् अपि च तेषां पुनर्वासस्य कृते योजनानां निर्माणं कुर्युः । अधुना यावत् महाराष्ट्र-तमिलनाडु-कर्नाटक-सर्वकारैः एव तथा योजनाः प्रकाशिताः सन्ति । एतस्य अधिनियम-निर्माणस्य एकवर्षाद् अधिक-कालस्य अनन्तरम् अपि अद्य ७४ प्रतिशतं गृह-बाल-श्रमिकाः १६ वर्षेभ्यः अपि न्यून-आयुवर्गस्य सन्ति ।

भोपाल-गैस-दुर्घटना

चतुर्विंशति-वर्षेभ्यः पूर्वं भोपाले संसारस्य भीषणतमा औद्योगिकी त्रासदा अभवत् भोपाले यूनियन-कार्बाइड् इति नामकस्य अमेरिकीयस्य समूहस्य एकः उद्योगः आसीत् यस्मिन् उद्योगे कीटनाशकाः निर्मीयन्ते स्म। दिसम्बर-मासस्य द्वितीये दिनाङ्के १९८४ तमे वर्षे रात्र्याः द्विवादने यूनियन-कार्बाइड-इत्यस्य संयन्त्रात् मिथाइल-आइसोसाइनाइड (मिक) इति वातः स्रवितुम् आरब्धवती। अयं बहुविष-युक्तः वातः भवति।

अनया दुर्घटनया काचित् पीडिता अज़ीज़ा सुल्ताना -
"प्रायः सार्ध-द्वादश-वादने अहं स्वस्य शिशोः तीव्रस्य काशस्य ध्वनिं श्रुतवती। प्रकोष्ठे अल्पतरः प्रकाशः आसीत्। अहं दृष्टवती यत् सम्पूर्णः प्रकोष्ठः श्वेतेन धूमेन आच्छादितः आसीत्। अहं जनानां करुण-क्रन्दनं श्रुतवती। सर्वे वदन्ति स्म पलायतां पलायताम् इति तदनन्तरम् अहम् अपि काशेन पीडितः अभवम्। एवम् अनूभूयते स्म यथा अहम् अग्नौ श्वास-निश्वासं स्वीकरोमि। नेत्रे सम्पूर्णतया ज्वलनं प्रारब्धवती।

अग्रिमः प्रातःकालः

सामूहिकः अन्तिमः संस्कारः

त्रिषु दिनेषु ८००० तः अपि अधिकाः जनाः मृत्योः मुखं प्रविष्टाः। लक्षाधिकाः जनाः गभीर-रूपेण प्रभाविताः।

विषयुक्तस्य वातस्य सम्पर्के आगताः अधिकतराः जनाः निर्धनाः अपि च कर्मकर-वर्गस्य परिवारेभ्यः आसन्। तेषु प्रायः ५०००० जनाः अद्यापि एतावन्तः रुग्णाः सन्ति यत् ते किञ्चित् अपि कार्यं कर्तुं न शक्नुवन्ति। ये जनाः अस्य वातस्य प्रभावे आगताः पुनरपि कथञ्चित् जीविताः तेषु बहवः जनाः गभीर-श्वास-विकारैः नेत्र-रोगैः अन्याभिः समस्याभिः सह पीडिताः जाताः। बालेषु अद्भुताः रोगाः विकृतयः च जायन्ते। अस्मिन् चित्रे दृश्यमाना बालिका एतस्याः घटनायाः उदाहरणम् अस्ति।

वातेन प्रभावितः बालकः

इयं त्रासदा काचित् दुर्घटना न आसीत् । यूनियन-कार्बाइड-इति समूहेन अधिकस्य लाभांशस्य कृते, ज्ञात्वा एव सुरक्षार्थम् उपायाः न कृता । दिसम्बर-मासस्य द्वितीयस्य दिनाङ्कस्य त्रासदायाः बहुपूर्वम् अपि उद्योगेषु वातस्य स्रावः अभवत् । एतासु घटनासु एकस्य कर्मकरस्य मृत्युः जातः अपि च बहवः कर्मकराः आहताः जाताः आसन् ।

यूनियन-कार्बाइड-इत्यस्य समूहस्य कर्मचारि-सङ्घटनस्य सदस्यानाम् आन्दोलनम्

वात-निवारक-मन्त्रिणा सह वार्तां कुर्वन्तः वात-पीडिताः जनाः

प्रमाणैः एतत् सर्वथा सिद्धम् आसीत् यत् एतस्य महाविनाशस्य कृते यूनियन-कार्बाइड इति समूहः एव दोषी अस्ति परन्तु समूहेन स्वकीयः दोषः न स्वीकृतः ।

एतदनन्तरं या अधिनियम-प्रक्रियाः प्रचलिता तस्यां सर्वकारेण पीडितानां पक्षतः यूनियन-कार्बाइड-इति समूहस्य विरोधे न्यायालयीय-अभियोगः चालितः । १९८५ तमे वर्षे सर्वकारेण ३ अर्बुद-डालर-इति राशिः एतेषां क्षति-पूर्त्यै याचिता परन्तु १९८९ तमे वर्षे केवलं ४७ कोटि-डालर-इत्यस्य क्षति-पूर्तौ स्वस्य सम्मतिः प्रदत्ता । एतस्याः त्रासदायाः ये जनाः रक्षिताः तैः जनैः एतस्य निर्णयस्य विरोधे सर्वोच्च-न्यायालये पुनर्याचिकाः प्रदत्ता । परन्तु सर्वोच्च-न्यायालयेन अपि एतस्मिन् निर्णये किञ्चित् अपि परिवर्तनं न कृतम् ।

यूनियन-कार्बाइड-इति समूहेन स्वस्य उद्योगः तु पिहितः परन्तु अत्यधिकायां मात्रायां विष-युक्ताः रसायनाः तत्र एव त्यक्ताः । एते रसायनाः वृष्ट्या जलेन सह मिलित्वा भूमिं प्रविशन्ति तस्मात् तत्रत्यं जलं दूषितं भवति । इदानीम् एतत् सयन्त्रं डाओ-केमिकल-नामक-समूहस्य अधिकारे वर्तते । सः समूहः एतस्य स्वच्छतां कर्तुं सिद्धः नास्ति ।

यूनियन-कार्बाइड इति संयन्त्रं परितः विकीर्णानि रसायनस्य पुटकानि

न्यायस्य कृते युद्धम् अधुना अपि प्रचलति

चतुर्विंशतेः वर्षाणाम् अनन्तरम् अपि जनाः सङ्घर्षं कुर्वन्ति । पेयजलस्य स्वास्थ्य–सुविधानाम् अपि च यूनियन-कार्बाइड- इति अस्य विषेण ग्रस्तानां जनानां कृते वृत्तीनां याचनाः कुर्वन्ति । ते यूनियन-कार्बाइड-इत्यस्य अध्यक्षम् एण्डरसन इत्याख्यं दण्डयितुम् आन्दोलनं चालितवन्तः सन्ति ।



निर्माण-स्थलेषु दुर्घटनाः सामान्याः सन्ति । एतासां दुर्घटनानाम् अनन्तरम् अपि तत्र सुरक्षायाः उपकरणानाम् अपि च अन्यासां जागरूकतानां च प्रायः अवहेलनं भवति ।

एकस्य कर्मकरस्य मूल्यं कियत् भवति ?

यदि भवन्तः भोपालस्य महाविनाशस्य कारणानि अवगन्तुम् इच्छन्ति तदा सर्वप्रथमम् एतत् अवगन्तव्यं स्यात् यत् यूनियन-कार्बाइड-इति समूहेन भारते एव किमर्थं स्वकीयः उद्योगः उद्घाटितः ।

वैदेशिकानां समूहानां भारते आगमनस्य एकं कारणम् इदम् अपि अस्ति यत् अत्र श्रमिकः न्यूनेन धनेन अपि कार्यं कुर्वन्ति । यदि एते समूहाः अमेरिकायाम् अपि च अन्यस्मिन् कस्मिन् अपि विकसिते देशे कार्यं कुर्युः तदा भारतस्य निर्धनानां कर्मकराणाम् अपेक्षया तत्रत्यानां कर्मकराणां कृते अधिकं वेतनं देयं स्यात् । भारते न केवलं ते समूहाः अल्पेन पारिश्रमिकेन कार्यं कारयितुं शक्नुवन्ति अपितु अत्रत्याः कर्मकराः अधिकं कालं यावत् अपि कार्यं कर्तुं शक्नुवन्ति । अत्रत्यानां कर्मकराणां कृते आवास-प्रभृतीनाम् अपरासां व्यवस्थानां कृते अपि अधिकस्य व्ययस्य आवश्यकता न भवति । अनेन प्रकारेण एते व्यावसायिक-समूहाः न्यूनेन धनेन अधिकं लाभांशम् अर्जयितुं शक्नुवन्ति ।

व्यये न्यूनतायाः ये उपायाः सन्ति ते इतोऽपि भयङ्कराः भवितुं शक्नुवन्ति । व्यये न्यूनताम् आनेतुं सुरक्षायाः उपायानां प्रायः अवहेलनम् एव क्रियते । यूनियन-कार्बाइड-इत्यस्य उद्योगे एकम् अपि सुरक्षायाः उपकरणं सम्यक्-प्रकारेण कार्यं न करोति स्म अथवा तेषाम् उपकरणानां सङ्ख्या अत्यल्पा आसीत् । १९८० तः १९८४ तमस्य वर्षस्य मध्ये मिक इति संयन्त्रस्य कर्मकराणां दलस्य सङ्ख्या १२ तः व्यावकल्य ६ इति कृता आसीत् । कर्मकराणां कृते सुरक्षा-प्रशिक्षणस्य अवधिः तु ६ मासेभ्यः न्यूनीकृत्य केवलं १५ दिनानि कृता अस्ति । मिक-इति उद्योगस्य कृते रात्र्याः पर्यायस्य कर्मकरस्य पदम् एव समाप्तं कृतम् आसीत् ।

यूनियन-कार्बाइड इत्यस्य भोपालस्थेषु अमेरिकीयेषु च संयन्त्रेषु सुरक्षा-व्यवस्थायाम् अन्तरं ज्ञातुम् अधः प्रदत्तं भागं पठन्तु –

"पश्चिम-वर्जीनिया-अमेरिकायां कम्प्यूटरीकृत पूर्व सूचना प्रदान यन्त्रम् निरीक्षणस्य व्यवस्था च अपि विद्यमाना आसीत् । भोपालस्य यूनियन-कार्बाइड-इति उद्योगे वातस्य स्रावं ज्ञातुं केवलं कर्मकराणाम् अनुमानस्य आधारेण एव कार्यं चाल्यते स्म । पश्चिम-वर्जीनिया इत्यत्र अपाये उपस्थिते जनाः सुरक्षितानि स्थानानि प्रति नीयन्ते स्म तथा व्यवस्था तत्र कृता आसीत् परन्तु भोपाले एतादृशी व्यवस्था नासीत् एव ।

विभिन्नानां देशानां मध्ये सुरक्षायाः मानकेषु एतावत् बृहद् अन्तरं किमर्थम् अस्ति ? अपि च दुर्घटनानाम् अनन्तरं पीडितेभ्यः एतावत् न्यूनं क्षतिपूर्तिधनं किमर्थं दीयते ?

एतस्य प्रश्नस्य उत्तरम् इदम् अस्ति यत् भारतीयानां कर्मकराणां मूल्यम् अधुना अपि अधिकं न मन्यते । एकः कर्मकरः वृत्तिं त्यजति चेत् तस्य स्थाने शीघ्रम् एव अपरस्य कर्मकरस्य उपलब्धता भवति । अस्माकं देशे निरुद्योगिता

तथा अधिका वर्तते यत् अल्पेन वेतनेन अपि बहवः जनाः असुरक्षितासु परिस्थितिषु अपि कार्यं कर्तुं सज्जाः भवन्ति । कर्मकराणाम् एतस्य दौर्बल्यस्य लाभं स्वीकृत्य स्वामिनः कार्यस्थलेषु सुरक्षायाः स्वकीयं दायित्वं न पालयन्ति । अनेन प्रकारेण भोपाल-गैस-त्रासदायाः एतावतां वर्षाणाम् अनन्तरम् अपि स्वामिनः स्वकीयां क्रूरां प्रकृतिं न त्यजन्ति तस्याः परिणामतः निर्माणस्थलेषु आकरेषु उद्योगेषु वा प्रतिदिनं याः दुर्घटनाः भवन्ति तासां दुर्घटनानां समाचाराः प्रतिदिनं श्रुतिपथम् आयान्ति ।

सुरक्षा-अधिनियमानां क्रियान्वयनम्

अधिनियमानां निर्मात्र्या तेषां क्रियान्वयन-कारयित्र्या संस्थायाः रूपेण सर्वकारस्य इदं कर्तव्यम् अस्ति यत् सुरक्षा-सम्बन्धितानाम् अधिनियमानां व्यवहार-पथे उपयोगः अथवा प्रयोगः सम्यक्तया भवति उत न भवति एतत् सर्वकारस्य दायित्वम् अस्ति । सर्वकारेण इदम् अपि ध्यातव्यं यत् २१ अनुच्छेदे प्रदत्तस्य जीवन-सम्बद्ध-अधिकारस्य उल्लङ्घनं न भवेत् । यदा यूनियन-कार्बाइड-संयन्त्रे सुरक्षायाः मानकानाम् अनेन प्रकारेण मुक्ततया अवहेलनं भवति स्म तदा सर्वकारः किं करोति स्म ?

प्रथमः विषयः भारते सुरक्षायाः अधिनियमाः शिथिलाः आसन् । अपरः तेषां दुर्बलानां सुरक्षायाः अधिनियमानाम् अपि सम्यक्-प्रकारेण व्यवहार-पथे आनयनं न भवति ।

सर्वकारीयाः अधिकारिणः एतम् उद्योगं भयङ्कराणाम् उद्योगानां श्रेण्यां परिगणयितुं सज्जाः न आसन् । सघने जनसङ्ख्या-युक्ते क्षेत्रे एतस्य उद्योगस्य उद्घाटने तेषां विमतिः न आसीत् । यदा भोपालस्य कैश्चित् नगर-निगम-अधिकारिभिः एतस्मिन् विषये विरोधः कृतः यत् १९७८ तमे वर्षे मिक-उत्पादन-उद्योगस्य स्थापना सुरक्षायाः मानकानाम् अनुसारितया नास्ति तदा सर्वकारस्य कथनम् आसीत् यत् प्रदेशः नैरन्तर्येण भोपालस्थस्य संयन्त्रस्य कृते निवेशम् इच्छति निवेशः आवश्यकः इति येन जनानां कृते वृत्तेः व्यवस्था स्यात् । सर्वकारस्य चिन्तनानुसारं यूनियन-कार्बाइड-इति समूहात् एतस्य विषयस्य अभ्यर्थनम् असम्भवम् आसीत् यत् सः स्वच्छस्य प्रविधेः अथवा आधिक्येन सुरक्षितानां प्रक्रियाणां प्रयोगं कुर्यात् । सर्वकारीयाः निरीक्षकाः दोषपूर्णानां प्रक्रियाणां पौनःपुन्येन समर्थनं कृतवन्तः । यदा उद्योगे पुनः पुनः वातस्य स्रावः अभवत् तदा सर्वैः एतत् अवगतम् आसीत् यत् उद्योगे कुत्रचित् महती अव्यवस्था जायते परन्तु तदा अपि निरीक्षकाः जागरूकाः न जाताः ।

अधिनियम-निर्मात्र्याः तेषां क्रियान्वयन-कर्त्र्याः संस्थायाः एवं व्यवहारः सम्यक् नास्ति । जनानां हितानि परित्यज्य सर्वकारः निज-समूहाः च सुरक्षा-व्यवस्थायाः निरन्तरम् अवहेलनं कुर्वन्ति स्म ।

इयं कथञ्चित् अपि उत्तमा स्थितिः व्यवहारः वा नास्ति । यदा भारते स्थानीयाः वैदेशिकाः च व्यवसायिनः नूतनान् नूतनान् उद्योगान् उद्घाटयन्तः सन्ति तदा कर्मकराणाम् अधिकाराणां रक्षार्थं कठोराणाम् अधिनियमानां तेषां क्रियान्वयनस्य च आवश्यकता इतोऽपि वर्धिता अस्ति ।

भवन्तः इत्थं किमर्थम् अनुभवन्ति यत् कस्मिंश्चिद् अपि उद्योगे सुरक्षा-सम्बद्ध-अधिनियमानां क्रियान्वयनम् अतीव महत्त्वपूर्णं भवति ?

किं भवन्तः कासाञ्चित् अपरासां स्थितीनाम् उल्लेखं कर्तुं शक्नुवन्ति यत्र अधिनियमाः अथवा नियमाः तु विद्यमानाः सन्ति परन्तु तेषां क्रियान्वयने शिथिलतायाः कारणात् जनाः तेषां पालनं न कुर्वन्ति ? (उदाहरणार्थं –वाहनानां तीव्रा गतिः) अधिनियमानां क्रियान्वयने काः समस्याः भवन्ति ? किं भवन्तः क्रियान्वयने परिष्कारार्थं स्वविचारान् प्रकटयितुं शक्नुवन्ति ?



सद्यतनेषु दिनेषु एव एकः ट्रेवल-एजेंसी इति आदिष्टः यत् सः स्वस्य केभ्यश्चित् ग्राहकेभ्यः ८ लक्षं रूप्यकाणां क्षति-पूर्तिं कुर्यात् । एतेषां यात्रिणां कृते एतदर्थं क्षति-पूर्ति-धनं दीयते स्म यतोहि समूहस्य अनवधानतायाः कारणात् ते डिज्नीलैण्ड इति स्थानं न दृष्टवन्तः अपि च पेरिस-मध्ये ते क्रयणं कर्तुं न शक्तवन्तः ते वञ्चिताः जाताः आसन् । तदा पुनरपि भोपास-गैस-द्वारा त्रस्तेभ्यः जनेभ्यः कृते ये आजीवनं दुःखं पीडां हानिं च प्राप्तवन्तः तेभ्यः एतावत् न्यूनं क्षति-पूर्ति-धनं किमर्थं दत्तम् ?



भोपाले स्थितस्य यूनियन-कार्बाइड-समूहस्य समीपस्थेषु दूषितेषु क्षेत्रेषु स्थितानि हस्त-जल-यन्त्राणि सर्वकारेण रक्तवर्णेन रञ्जितानि कृतानि। पुनरपि स्थानीयाः जनाः तेषाम् उपयोगं कुर्वन्ति यतोहि तेषां पार्श्वे स्वच्छस्य जलस्य किमपि अन्यत् स्रोतः नास्ति।

पर्यावरणस्य रक्षार्थं नूतनाः अधिनियमाः

१९८४ तमे वर्षे अस्माकं पार्श्वे पर्यावरणस्य रक्षार्थं न्यूनतराः अधिनियमाः आसन्। एतेषाम् अधिनियमानां क्रियान्वयनस्य व्यवस्था तु इतोऽपि दयनीया आसीत्। पर्यावरणम् एकं मुक्तम् अथवा निर्मूल्यं वस्तु इति रूपेण स्वीक्रियते स्म। कस्मैचिद् अपि उद्योगाय वायौ जले च प्रदूषण-त्यागस्य स्वच्छन्दता आसीत्। कामं, नद्यः स्युः, वायुः भवेत्, भूमिगत-जलं वा भवेत् सर्वत्र पर्यावरणं प्रदूषितं जायमानम् आसीत् अपि च जनानां स्वास्थ्यस्य हानिः जायमाना आसीत्।

शिथिलैः सुरक्षायाः मानकैः न केवलं यूनियन-कार्बाइड- इति समूहः लाभं स्वीकृतवान् अपितु प्रदूषणं वारयितुम् अपि सः धनस्य व्ययं न कृतवान्। अमेरिकायाम् एषः एव समूहः एवं स्वदायित्वस्य निर्वहणात् विमुखः न भवितुं शक्नोति स्म।

भोपाल-त्रासदा पर्यावरणस्य विषयान् पङ्क्तिबद्धान् कृतवती। लक्षाधिकाः एवंविधाः जनाः उद्योगतः निर्गतेन विषयुक्त-वातेन ग्रस्ताः जाताः ये जनाः अनेन उद्योगेन कथञ्चित् अपि सम्बद्धाः न आसन्। एतेन जनाः अनुभूतवन्तः यत् वर्तमानाः अधिनियमाः कामं, कियन्तः अपि कठोराः स्युः, ते तु केवलं कर्मकराणां कृते एव सन्ति अथवा तैः एव सम्बद्धाः सन्ति। तेषु अधिनियमेषु सामान्यानां जनानां ये अधिकाराः सन्ति तेषु अवधानं न प्रदत्तम् अस्ति ये जनाः औद्योगिक-घटनानां कारणतः व्रणिताः भवन्ति।

पर्यावरण-वादिनां कार्यकर्तृणां तथा च अन्येषां जनानां यः विरोधः आसीत् तस्य विरोधस्य शमनार्थं भोपाल-गैस-त्रासदायाः अनन्तरं भारत-सर्वकारेण पर्यावरण-विषये नूतनाः अधिनियमाः निर्मिताः। पर्यावरणस्य ये हानिं कुर्वन्ति अपि च ये प्रदूषितं कुर्वन्ति ते एव जनाः उत्तरदायिनः सन्ति इति सर्वकारेण उक्तम्। एतस्य मूले इदं चिन्तनम् आसीत् यत् अस्माकम् एतस्मिन् पर्यावरणे भाविनः वंशानुक्रमस्य अपि अधिकारः अस्ति अपि च एतस्य पर्यावरणस्य, औद्योगिक-विकासाय नाशः कर्तुं न शक्यते।

न्यायालयैः स्वस्थस्य पर्यावरणस्य अधिकारः जीवनस्य मौलिक-अधिकार-रूपेण स्वीकृतः इत्थं विचिन्तयन् च बहवः महत्त्वपूर्णाः निर्णयाः कृताः। सुभाषकुमारं विरुध्य बिहार-राज्यं (१९९१) तमस्य अभियोगे सर्वोच्च-न्यायालयेन उक्तं यत् जीवनस्य अधिकारः संविधानस्य २१ अनुच्छेदस्य अन्तर्गतम् एकः मौलिकः अधिकारः अस्ति। अपि च तस्मिन् प्रदुषणमुक्त-वायोः जलस्य च अधिकारः अपि सम्मिलितः अस्ति। इदं सर्वकारस्य दायित्वम् अस्ति यत् सः प्रदूषणस्य निरोधं कर्तुं, नदीनां स्वच्छतार्थं ,ये दोषिणः सन्ति तेषां कृते अर्थ-दण्डं दातुं च अधिनियमानां प्रक्रियाणां च सुनिश्चितीकरणं कुर्यात्।

'स्वच्छं पर्यावरणम् एकं जन-सौविध्यम् अस्ति', किं भवन्तः एतस्य कथनस्य व्याख्यानं कर्तुं शक्नुवन्ति ?

अस्माकं कृते नूतनानाम् अधिनियमानाम् आवश्यकता किमर्थम् अस्ति ?

समव्यवसायि-समूहाः संविदाकर्मिणः च पर्यावरणस्य अधिनियमानाम् उल्लङ्घनं कथं कुर्वन्ति ?

जनसुविधारूपेण पर्यावरणम्

सद्यतनेषु वर्षेषु न्यायालयैः पर्यावरण-सम्बद्ध-विषयेषु बहवः कठोराः आदेशाः प्रदत्ताः सन्ति । एतादृशैः आदेशैः जनानां वृत्तौ अपि दुष्प्रभावः आगतः अस्ति।

उदाहरणार्थं पश्यामः न्यायालयेन आदेशः प्रदत्तः अस्ति यत् देहली-स्थितेषु आवासीय-क्षेत्रेषु ये उद्योगाः कार्यरताः सन्ति तेषां पिधानं स्यात् ते नगरात् बहिः स्थापिताः भवेयुः । तेषु केचन उद्योगाः समीपस्थेषु क्षेत्रेषु प्रदूषणं कुर्वन्ति स्म । एतेषाम् उद्योगानाम् अवकरेण यमुना नदी अपि प्रदूषिता भवति स्म । यतोहि एते उद्योगाः नियमानुसारितया न चाल्यन्ते स्म ।

न्यायालस्य क्रियान्वयनेन एका समस्या तु अपगता परन्तु एका नूतना समस्या प्रादुर्भूता उद्योगानां पिधानात् बहूनां कर्मकराणां वृत्तिः समाप्ता जाता । बहुभिः वृत्त्यर्थं दूरं गम्यते स्म । तत्र ते उद्योगाः पुनः चाल्यन्ते स्म । इदानीं प्रदूषणस्य समस्या तेषु क्षेत्रेषु अपि जायमानाः अस्ति एतानि क्षेत्राणि अपि प्रदूषणेन ग्रस्तानि जायन्ते कर्मकराणां सुरक्षायाः सम्बद्धः विषयः अपि यथावत् तिष्ठति स्म ।

भारते पर्यावरणीयेषु विषयेषु जातेन अनुसन्धानेन इदं तथ्यं दृष्टिगोचरं जातं यत् मध्यम-वर्गीयाः जनाः पर्यावरणस्य चिन्तां कर्तुं तु आरब्धवन्तः परन्तु ते प्रायः निर्धनानां चिन्तां दृष्टिपथे न स्थापयन्तः सन्ति। अतः एतेषु बहवः तु अवगच्छन्ति यत् नगरस्य स्वच्छतार्थं निवासानाम् अपसारणं स्यात् । अथवा प्रदूषण-कर्तारः उद्योगाः नगरतः बहिः स्थापनीयाः परन्तु इदं तथ्यं बुद्धिगतं न भवति यत् तथा कृते सति बहूनां कर्मकराणां वृत्तिः तेषां भोजनव्यवस्था अपि नष्टा भवति । यत्र एकस्मिन् पक्षे स्वच्छता-विषयिणी जागरूकता वर्धते तत्र एव अपरस्मिन् पक्षे जनानां श्रमस्य सुरक्षायाः विषये जनाः अधिकां चिन्तां न कुर्वन्तः सन्ति ।

अधुना आह्वानम् तथा समाधानस्य अन्वेषणस्य वर्तते यस्मिन् स्वच्छस्य वातावरणस्य सर्वेषां कृते लाभः भवेत्। एतस्य एकः उपायः अयम् अस्ति यत् वयम् उद्योगेषु स्वच्छतराणां प्रविधीनां प्रक्रियाणां च उपयोगं कुर्याम । एतदर्थं सर्वकारस्य कृते आवश्यकम् अस्ति यत् सः उद्योगानां कृते प्रोत्साहनं साहाय्यं च दद्यात् । यदि उद्योगः प्रदूषणं विस्तारयति तदा सः सर्वकारेण दण्डनीयः । अनेन प्रकारेण कर्मकराणां वृत्तेः संरक्षणम् अपि भविष्यति अपि च सर्वेषां समुदायानां कृते सुरक्षितस्य पर्यावरणस्य अपि अधिकारः लप्स्यते ।

यानेभ्यः उत्सर्जितः धूमः पर्यावरणीयस्य प्रदूषणस्य किञ्चित् महत् स्रोतः वर्तते । १९९८ तमस्य वर्षस्य अनन्तरं सर्वोच्च-न्यायालयेन स्वकीयेषु बहुषु निर्णयेषु अयम् आदेशः प्रदत्तः अस्ति यत् देहल्यां चलनशीलानि सर्वाणि सार्वजनिकानि वाहनानि कम्प्रेस्ड-नेचुरल-गैस इत्यस्य (सी.एन.जी)इन्धनस्य प्रयोगं कृत्वा चलेयुः । एतैः प्रयासैः देहली-प्रभृतीनां महानगराणां प्रदूषणे अतीव न्यूनता जाता परन्तु सेण्टर फॉर साइंस ऐण्ड एनवायरनमेण्ट इति (नयी-देहली) संस्थायाः एकस्या सद्यतनीयायाः सूचनायाः अनुसारम् उक्तम् अस्ति वायौ विषयुक्तानां पदार्थानां स्तरः अत्यधिकः अस्ति । एते विषयुक्ताः पदार्थाः पेट्रोल-वाहनानि अतिरिच्य डीजल-इत्यनेन यानि वाहनानि यथा कारयानानि बसयानानि चलन्ति तेषां कारणतः उत्पद्यन्ते ।

पिहितानाम् उद्योगानां बहिः दुःखिनः श्रमिकाः

वृत्तेः परिहरणानन्तरं बहवः कर्मकराः लघूनि लघूनि कार्याणि, व्यापारं, दैनिकं श्रमं वा कर्तुम् आरम्भं कुर्वन्ति । केचन श्रमिकाः पूर्वम् एव लघुषु उद्योगेषु कार्यं प्राप्नुवन्ति यत्रत्याः परिस्थितयः पूर्वापेक्षया अपि शोषणेन पूरिताः भवन्ति अपि च तत्र अधिनियमानां स्थितिः अपि दुर्बलतरा जायते ।

किं भवन्तः अनुभवन्ति यत् उपरि उद्धृतेषु विषयेषु सर्वेषां पक्षाणां कृते न्यायस्य प्राप्तिः अभवत् ?

किं भवन्तः पर्यावरणस्य रक्षायै अन्यान् उपायान् जानन्ति? कक्ष्यायां चर्चयन्तु ।

विकसिताः देशाः स्वस्य विषयुक्तान् भयङ्करान् उद्योगान् च विकासशीलेषु देशेषु नयन्ति यस्मात् च एतेषां देशानां निर्बलेभ्यः अधिनियमेभ्यः लाभं स्वीकुर्युः अपि च तेषां स्वस्य देशाः स्वच्छाः तिष्ठेयुः। दक्षिण-एशियाई-देशाः सामान्यतया भारतं, बाङ्गलादेशः, पाकिस्तानः इत्यादयः देशाः बहून् कीटनाशक-निर्मातॄन् ऐस्बेस्टॉस-निर्मातॄन् अथवा जस्ता इति धातोः निर्मातॄन् अपि काचस्य संसाधित-कर्तॄन् उद्योगान् अत्र स्वदेशं प्रति आह्वयन्ति।

निष्कर्षः

कामं, विपणिः स्यात्, कार्यालयः स्यात् अथवा कश्चित् उद्योगः स्यात् बह्वीषु स्थितिषु जनानाम् अनुचिताभ्यः कार्यपद्धतिभ्यः रक्षणार्थम् अधिनियमाः आवश्यकाः भवन्ति। निज-व्यावसायिक-समूहाः संविदा-कर्मिणः व्यवसायिनः च इत्यादयः अधिकस्य लाभांशस्य अर्जनस्य प्रयासे अनुचितान् उपायान् अपि स्वीकुर्वन्ति। उदाहरणार्थं ते श्रमिकेभ्यः न्यूनतमं वेतनमानं यच्छन्ति, बालेभ्यः श्रमं कारयन्ति कार्यस्य स्थितिषु अवधानं न कुर्वन्ति पर्यावरणस्य संरक्षणं न कुर्वन्ति परिणामतः ते उद्योग- समीपस्थानां जनानां हानिं कुर्वन्ति।

एतस्याम् अवस्थायां सर्वकारस्य एकं महत् दायित्वम् इदं भवति यत् सः निज-व्यवसाय-समूहानां याः विपरीताः प्रक्रियाः उपायाः वा सन्ति तेषां निरोधार्थम् अपि च सर्वेभ्यः जनेभ्यः सामाजिकं न्यायं प्रदातुम् अधिनियमानां निर्माणं कुर्यात्। तेषां क्रियान्वयनं कुर्यात् अपि च तेषां सततं निरीक्षणम् कुर्यात्। अर्थात् न केवलं सर्वकारेण अधिनियमाः निर्मातव्याः अपितु तेषां क्रियान्वयनम् अपि कुर्यात्। यदि अधिनियमाः शिथिलाः स्युः अपि च तेषां सम्यक्-प्रकारेण क्रियान्वयनम् अपि न स्यात् तदा तेभ्यः महती हानिः भवितुं शक्नोति। भोपाल-गैस-द्वारा त्रासदा, एतस्य तथ्यस्य एकम् उदाहरणम् एव अस्ति।

एतस्मिन् विषये सर्वकारस्य अपि दायित्वं भवति एव, सामान्याः जनाः अपि बलाघातं कृत्वा निज-समूहान् सर्वकारं च समाजस्य हितार्थं कार्यं कर्तुं बाध्यं कर्तुं शक्नुवन्ति। यथा अस्माभिः पूर्वं दृष्टम्। पर्यावरणं तथा विषयः अस्ति यत्र जनैः जनहितार्थं बलाघातं कृतम् अपि च न्यायालयैः अपि पर्यावरणस्य अधिकारं मौलिक-अधिकाररूपेण जीवनस्य अभिन्नाङ्गत्वेन स्वीकृतम्। अस्मिन् अध्याये वयम् एतस्मिन् तथ्ये अपि बलाघातं कृतवन्तः यत् जनैः एतस्य विषयस्य कृते स्वविचारः प्रस्तोतव्यः यत् स्वस्थस्य वातावरणस्य सुविधा सर्वेषां कृते भवेत्। तथैव श्रमिक-अधिकाराणां (श्रमस्य अधिकारस्य कृते उत्तमस्य पारिश्रमिकस्य कृते मानवोचितानां कार्यस्थितीनां अधिकारः) क्षेत्रे अपि अधुना परिस्थितयः बहु दयनीयाः सन्ति। जनैः एतदर्थं स्वस्य विरोधस्य प्रदर्शनं करणीयम् यत् श्रमिकाणाम् अधिकाराणां रक्षार्थं कठोराः अधिनियमाः निर्मिताः स्युः यतोहि यस्मात् सर्वेषां कृते जीवनस्य अधिकारः लभ्येत।

अभ्यासः

१. द्वाभ्यां श्रमिकाभ्यां सह वार्तां कृत्वा जानन्तु यत् तौ अधिनियम-द्वारा निर्धारितं वेतनमानं प्राप्नुवन्तौ न वा । एतदर्थं भवन्तः निर्माण-श्रमिकैः कृषि-श्रमिकैः औद्योगिक-श्रमिकैः अथवा कस्मिंश्चित् आपणे कार्यं कुर्वद्भिः श्रमिकैः सह वार्तां कर्तुं शक्नुवन्ति ।

२. वैदेशिकेभ्यः समूहेभ्यः भारते स्व-उद्योगस्य उद्घाटनेन कः लाभः अस्ति ?

३. किं भवन्तः अनुभवन्ति यत् भोपाल-गैस-त्रासदा-द्वारा पीडितेभ्यः जनेभ्यः सामाजिकः न्यायः लब्धः ? चर्चयन्तु ।

४. यदा वयम् अधिनियमानां क्रियान्वयनस्य वार्तां कुर्मः तदा एतस्य कः अभिप्रायः भवति? अधिनियमानां क्रियान्वयनस्य दायित्वं कस्य अस्ति ? अधिनियमानां क्रियान्वयनम् एतावत् महत्वपूर्णं किमर्थम् अस्ति ।

५. अधिनियमानां माध्यमेन विपणयः कार्यं कर्तुं कथं प्रेरयितुं शक्यन्ते ? स्वस्य उत्तरेण सह उदाहरणद्वयं यच्छन्तु ।

६. चिन्तयन्तु भवन्तः एकस्मिन् रासायनिके उद्योगे कार्य-कर्तारः श्रमिकाः सन्ति । सर्वकारेण समूहाः आदिष्टाः सन्ति यत् वर्तमानात् स्थानात् १००किलोमीटर-परिमितं दूरं कस्मिंश्चित् अपरस्मिन् स्थाने स्वस्य उद्योगस्य स्थापनां कुर्वन्तु । एतस्मात् भवतां जीवने कः प्रभावः भविष्यति ? स्वस्य चिन्तनं सम्पूर्णायाः कक्षायाः समक्षं पठित्वा श्रावयन्तु ।

७. एतस्मिन् एकाङ्के भवन्तः सर्वकारस्य विभिन्नानां भूमिकानां विषये पठितवन्तः । एतस्मिन् विषये एकम् अनुच्छेदं लिखन्तु ।

८. भवतां क्षेत्रे पर्यावरणस्य प्रदूषकाणि कानि कानि स्रोतांसि सन्ति ? (क) वायोः (ख) जलस्य (ग) मृदायाः च प्रदूषणस्य विषये चर्चां कुर्वन्तु । प्रदूषणं नियन्त्रयितुं कीदृशाः प्रयासाः क्रियन्ते ? किं भवन्तः काञ्चन अन्यान् उपायान् वक्तुं शक्नुवन्ति?

९. पूर्वं पर्यावरणं कथं पश्यन्ति स्म ? किम् अधुना चिन्तने किञ्चित् परिवर्तनम् आगतम् अस्ति ? चर्चयन्तु ।

बालकेषु एवं भार-निक्षेपः बहुः अनुचितः अस्ति । पश्य अहम् एतं बालकं स्वस्य पुत्रस्य साहाय्यार्थं वृत्तौ नियुक्तवती ।

१०. प्रसिद्धः व्यङ्ग्य–चित्रकारः आर.के.लक्ष्मणः एतेन व्यङ्ग्यचित्रेण किं कथयितुम् इच्छति ? एतस्य चित्रस्य २००६ तमे वर्षे निर्मितेन तेन अधिनियमेन कः सम्बन्धः अस्ति यं भवन्तः १२३ तमे पृष्ठे पठितवन्तः ।

११. भवद्भिः भोपाल-गैस-त्रासदायाः विषये प्रचलितस्य सङ्घर्षस्य विषये पठितम् अस्ति । सम्पूर्णस्य विश्वस्य विद्यार्थिनः एतस्य न्यायस्य कृते जायमाने सङ्घर्षे स्वकीयं योगदानं यच्छन्ति । ते विरोध-प्रदर्शन-प्रभृतीनि जागरूकतायाः अभियानानि यावत् आन्दोलनानि चालयन्ति । तेषां गतिविधीनां विषये भवन्तः www.studentsforbhopal.com इति जालपुटे अपि पठितुं शक्नुवन्ति । एतस्मिन् जालपुटे बहूनि चित्राणि, वृत्तचित्राणि, पीडितानां कथनानि च उपलब्धानि सन्ति ।

एतस्य जालपुटस्य अन्येषां संसाधनानां च प्रयोगं कृत्वा स्वस्य कक्ष्यायां प्रदर्शनार्थं भोपाल-गैस-त्रासदा-आधारिताम् एकां भित्तिपत्रिकां प्रदर्शनीं च सज्जीकुर्वन्तु । सम्पूर्णं विद्यालयं स्वकीयाः रचनाः द्रष्टुम् अपि च तद्विषये चर्चयितुं आमन्त्रितं कुर्वन्तु ।

शब्द-सङ्कलनम्

उपभोक्ता - या व्यक्तिः विपण्यां विक्रेतुं न अपितु निजाय उपयोगाय किञ्चित् वस्तु क्रीणाति सा उपभोक्ता इति उच्यते ।

उत्पादकाः - एवंविधः जनः अथवा संस्थानं यः विपण्यां विक्रेतुं वस्तूनि निर्माति । बहुधा उत्पादकाः स्वस्य उत्पादनस्य कञ्चित् भागं स्वस्य निजाय उपयोगाय अपि स्थापयन्ति उदाहरणार्थं यथा कृषकाः ।

निवेशः – भविष्यति काले उत्पादनस्य वर्धनार्थं परिष्कारार्थं च नूतने यन्त्रे अथवा भवने अथवा प्रशिक्षणे यत् धनं व्ययीभवति सः एव निवेशः इति उच्यते ।

श्रमिकाणां सङ्घटनम् –(यूनियन) श्रमिकाणां सङ्घटनम् । सामान्यतया श्रमिक-सङ्घटनानि उद्योगेषु कार्यालयेषु च दृश्यन्ते परन्तु अन्य-प्रकारकाणाम् अपि श्रमिकाणां सङ्घटनानि भवितुं शक्नुवन्ति यथा- गृह-कर्मकराणां सङ्टनम् । सङ्घटनस्य नेतारः स्वस्य सदस्यानां पक्षतः स्वामिभिः सह वणिक्-करणं कुर्वन्ति, वार्तां च कुर्वन्ति । श्रमिक-सङ्घटनानि पारिश्रमिकस्य विषये श्रमस्य नियमावल्याः विषये नियुक्तेः विषये निलम्बनस्य विषये पदोन्नतेः सम्बन्धित-नियमेषु लाभविषये कार्यस्थलस्य सुरक्षायाः इत्यादिषु विषयेषु कार्यं कुर्वन्ति ।

॥ इति नवमोऽध्यायः ॥

एकस्य जीवितस्य आदर्शस्य रूपे संविधानम्

जीवनस्य अधिकारः एकः मौलिकः अधिकारः अस्ति । संविधानस्य माध्यमेन अयम् अधिकारः देशस्य सर्वेषां जनानां कृते प्राप्तम् अस्ति। यथा भवद्भिः अस्मिन् पुस्तके पठितम् अस्ति ,सामान्यैः जनैः एतस्य अधिकारस्य अर्थात् संविधानस्य २१ तमस्य अनुच्छेदस्य विभिन्नेषु सन्दर्भेषु उपयोगः कृतः। जनानाम् एतादृशैः प्रयासैः एव अयम् अधिकारः इतोऽपि सार्थकः व्यापकः च जातः। उदाहरणार्थं भवन्तः पठितवन्तः सन्ति यत् कथं हाकिम-शेख-महोदयः स्वास्थ्यस्य अधिकारं जीवनस्य अधिकारस्य अभिन्न-अङ्गत्वेन चरितार्थं कृतवान् । अनेन एव प्रकारेण मुम्बयी-महानगरस्य निर्धन-निवासिनां प्रयासैः वृत्तेः अधिकारः जीवनस्य अधिकारस्य भागरूपेण गृहीतः । अस्मिन् एव अध्याये भवन्तः पठितवन्तः यत् केन प्रकारेण न्यायालयेन "प्रदूषण-मुक्तं जलस्य वायोः च यः अधिकारः वर्तते सः जीवनस्य अधिकारस्य भागः अस्ति इति उक्तम् आसीत् । एतत् अतिरिच्य शिक्षायाः आवासस्य च अधिकारम् अपि न्यायालयैः जीवनस्य अधिकारस्य भागरूपेण स्वीकृतः ।

जीवनस्य अधिकारस्य इयं विस्तृता व्याख्या सामान्यानां जनानां प्रयासानाम् एव परिणामः अस्ति । यदा जनाः इत्थम् अनुभवन्ति यत् तेषां मौलिकानाम् अधिकाराणाम् उल्लङ्घनं जायमानम् अस्ति तदा ते न्यायालयं गत्वा न्यायस्य याचनां कुर्वन्ति । यथा भवद्भिः एतस्मिन् पुस्तके बहुधा पठितम्, एतैः मौलिकैः अधिकारैः एव नूतनान् अधिनियमान् नीतीः च क्रियान्वयितुं साहाय्यं कृतम् अस्ति । एतत् सर्वम् एतस्मात् कारणात् सम्भवम् अभवत् यतोहि अस्माकं संविधाने केचन विशिष्टाः अधिनियमाः सन्ति ये भारतस्य सर्वेषां जनानां प्रतिष्ठायाः स्वाभिमानस्य च रक्षां कुर्वन्ति । मौलिक-अधिकाराणाम् अधिनियमानां शासनेन सम्बन्धितेषु विभिन्नेषु प्रावधानेषु एतस्य विषयस्य व्याख्या कृता अस्ति ।

एतैः उदाहरणैः स्पष्टं भवति यत् अस्माकं संविधानम् अतीव परिवर्तनशीलम् अपि अस्ति । अनेन आधारेण संविधानेन प्रदत्तेषु प्रतिष्ठायाः न्यायस्य विचारेषु च नवीनरूपेण आगतानां विषयाणां सूच्याः अपि समावेशः भवेत् । अस्य परिवर्तनशील-गुणस्य कारणात् संविधानस्य प्रावधानानां नूतनाः व्याख्याः कर्तुं शक्यते । अनेन आधारेण संविधानम् एकं जीवद्-अभिलेख-रूपेण स्वीकर्तुं शक्यते । स्वास्थ्यस्य अधिकारः अथवा आवासस्य अधिकारः इत्यादयः तथा विषयाः सन्ति ये १९४९ तमे वर्षे संविधान-सभायाः सदस्यैः प्रस्तुते संविधाने लिखित-रूपेण विद्यमानाः न आसन् । परन्तु भावनायाः स्तरेण ते निश्चित-रूपेण विद्यमानाः आसन् । एतस्य अभिप्रायः अयम् अस्ति यत् संविधाने एतादृशाः लोकतान्त्रिक-आदर्शाः तस्मिन् काले अपि विद्यमानाः आसन् येषां माध्यमेन जनाः राजनैतिकीनां प्रक्रियाणां प्रयोगं कृत्वा सुनिश्चितं कर्तुं शक्नुवन्ति स्म यत् सामान्यानां नागराणां जीवने एते आदर्शाः वास्तविकतायाः रूपं स्वीकुर्युः ।

यथा एतस्य पुस्तकस्य अध्यायेषु चर्चा कृता अस्ति संवैधानिकान् आदर्शान् यथार्थं रूपं दातुं बहु प्रयासः कृतः अस्ति । अपरस्मिन् पक्षे एतेषु अध्यायेषु इदम् अपि उक्तम् अस्ति यत् अधुना बहुकिमपि सम्भवितव्यम् अस्ति। देशस्य विभिन्नेषु भागेषु जनता-द्वारा क्रियमाणाः विभिन्नाः सङ्घर्षाः पौनःपुन्येन एतं विषयं स्मारयन्ति यत् समाजस्य अधिकतराणां जनानां जीवने समानता प्रतिष्ठा-स्वाभिमान-प्रभृतयः प्रश्नाः च अधुना अपि अपूर्णाः सन्ति। यथा सप्तम-कक्षायाः पुस्तके भवन्तः पठितवन्तः आसन् यत् संचार-माध्यमानि अपि एतेषु सङ्घर्षेषु अवधानं न कुर्वन्ति । परन्तु एतस्य अयम् अभिप्रायः नास्ति यत् एतेषु आन्दोलनेषु अवधानं न स्यात् ।

एतस्य पुस्तकस्य विभिन्नेषु अध्यायेषु एतद् बोधयितुं चेष्टा कृता अस्ति यत् संविधाने के लोकतान्त्रिकाः आदर्शाः प्रदत्ताः सन्ति अपि च तैः जनानां दैनिके जीवने कीदृशः प्रभावः आगच्छति। एतस्य मूले अस्माकम् उद्देश्यम् अस्ति यत् भवतां कृते तथा साधनानि उपलब्धानि भवेयुः येषां माध्यमेन भवन्तः स्वस्य सन्निकट-वर्ति-संसारं ज्ञातुं प्रयासं कर्तुं शक्नुयुः अपि संविधानेन निर्दिष्टेन मार्गेण चलन्तः तस्मिन् भागग्रहणं कर्तुं शक्नुयुः ।

सन्दर्भाः

पुस्तकानि

ऑस्टिन, ग्रेनविल,१९६६,दि-इंडियन कॉन्स्टीट्यूशन : कॉर्नरस्टोन ऑफ ए नेशन,ऑक्सफोर्ड: क्लेरेंडन प्रेस।

ऑस्टिन, ग्रेनविल,१९९९, वर्किंग ए डेमोक्रेटिक कॉन्स्टीट्यूशन: दि इंडियन एक्सपीरियन्स,नयी दिल्ली: ऑक्सफोर्ड

लॉयर्स क्लेक्टिव. २००७,स्टेयिंग अलाइव: फस्-र्ट मॉनीटरिंग एंड इवैल्युएशन रिपोर्ट २००७ ऑन द प्रोटेक्शन ऑफ वूमैन फ्राम डोमेस्टिक वॉयलैंस एक्ट,२००५,नयी दिल्ली: लॉयर्स क्लेक्टिव।

रामास्वामी,गीता.२००५,इंडिया स्टिंकिंग: मैनुअल-स्कैवेंजर्स इन आंध्रा प्रदेश एंड देयर वर्क,नयी दिल्ली: नवनय पब्लिकेशन।

समाचार-पत्राणां लेखाः

पी. साईनाथः, "हूज सैक्रिफाइस इज इट ऐनीवे?" द हिन्दु,६ सितम्बर १९८१

विधिक-प्रकरणम्

ओल्गा टेलिस वर्सेस बॉम्बे म्यूनिसिपल कॉर्पोरेशन (१९८५)३ एस सी सी ५४५।

पश्चिम बंग –कृषि-श्रमिक-समिति विरोधे पश्चिम-बंगाल-राज्यम्(१९९६)

स्टेट (देहली-ऐडमिनिस्ट्रेशन)वर्सेस लक्समन-कुमारः (१९८५) ४ एस सी सी ४७६।

सुभाष-कुमारः वर्सेस स्टेट ऑफ विहारः (१९९१) १ एस सी सी ५९८।

बेबसाइट्स (जाल-पुटाः)

भोपाल-गैस-त्रासदी,http://www.studentsforbhopal.org/whatHappened.htm.Accessed on 12 जनवरी २००८

सी. के.जानू,www.countercurrents.org Accessed on 12 नवंबर २००७.

नेपाले लोकतन्त्र.http://www.himalmag.com Accessed on 15 दिसंबर २००७.

हस्ताभ्यां मलस्य उत्थापनम्, www.hrdc.net/sahrdc/hrfeatures/HRF 129.html.Accessed on 2जनवरी २००८.

सूचनायाः अधिकारः Right to information (R T I)

सूचनायाः अधिकारः

सूचनायाः अधिकार-अधिनियमस्य मूलम् उद्देश्यं जनानां सशक्तीकरणम् अस्ति, सर्वकारस्य क्रिया-कलापेषु पारदर्शितायाः उत्तरदायित्वस्य च वर्धनं, भ्रष्टाचारस्य वारणं, लोकतन्त्रं जनसेवायै दृढसङ्कल्पीकर्तुं सज्जीकरणम्। भवन्तः सूचनायाः अधिकारस्य उपयोगं कृत्वा सर्वकारस्य विविधानां क्रिया-कलापानां विषये आवश्यकीं सूचनां प्राप्तुं शक्नुवन्ति।

सूचनाधिकार-अधिनियमस्य प्रयोग-विधिः

आवेदनं सामान्य-पृष्ठे कर्तुं शक्यते। भवन्तः एतत् आवेदनं शुल्क-सहितं सम्बन्धितस्य विभागस्य सूचनाधिकारिणे (PIO) प्रेषयन्तु। एतत् आवेदनं भवन्तः पत्रालयस्य माध्यमेन अपि प्रेषयितुं शक्नुवन्ति।

आवेदन-शुल्कम्

केन्द्र-सर्वकारस्य विभागैः सम्बन्धित-विषयेषु भवद्भिः १० रूप्यकाणि आवेदन-शुल्क-रूपेण देयानि भविष्यन्ति। तत् शुल्कं प्रस्तुतधन-माध्यमेन धनादेश-माध्यमेन पत्रादेश-माध्यमेन (पोस्टल-ऑर्डर) अथवा वित्तकोशीय-देयादेश-माध्यमेन अपि दातुं शक्यते। राज्यसर्वकारस्य विभागानां कृते एतत् शुल्कं पृथक् अस्ति।

आर.टी.आई.सम्बन्धिने अधिकाय ज्ञानाय प्रवेशं कुर्वन्तु www.cic.gov.in,www.rti.gov.in

0861

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

ISBN 978-81-7450-833-1